महाराजाधिराज-कामेश्वरसिंह-ग्रन्थमालायाः
अष्टादशपुष्पम्

महामहोपाध्यायश्रीगोविन्दठक्कुरकृतः

पूजाप्रदीपः

कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः

मधुश्रावणी
शकाब्दः १९०७

मूल्यम्--२५.०० रूप्यकाणि
(पञ्चविंशतिरूप्यकाणि)

महाराजाधिराज-कामेश्वरसिंह-ग्रन्थमालायाः
अष्टादशपुष्पम्

महामहोपाध्याय श्रीगोविन्दठक्कुरकृतः

पूजाप्रदीपः

सम्पादकाः

१ प० श्रीजयमन्तमिश्रः, कुलपतिः

२ प० श्रीरामसेवक झा, दर्शनविभागाध्यक्षः

३ प० श्रीप्रभुनारायण शर्मा, धर्मशास्त्रोपाचार्यः

४ प० श्रीरामचन्द्र झा, ज्यौतिषविभागाध्यक्षः

कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः,
कामेश्वरनगरम्, दरभङ्गा

मधुश्रावणी
शकाब्दा १९०७

मूल्यम्--२५.०० रूप्यकाणि
(पञ्चविंशतिरूप्यकाणि)

सर्वाधिकारः प्रकाशकाधीनः

प्रथमसंस्करणम्—१०००

प्रकाशनवर्षम्—१९८५ ई०

प्रकाशकः

कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः,

कामेश्वरनगरम्, दरभङ्गा

मूल्यम्--२५.०० रूप्यकाणि (पञ्चविंशतिरूप्यकाणि)

मुद्रकः

रमण प्रेस, बंगलागढ, दरभङ्गा ।

आमुखम्

अथायं प्रकाश्यते सकलशास्त्रमर्मज्ञेन मिथिलामहीमण्डनभूतेन परमभागवतेन सिद्धपुरुषेण महामहोपाध्याय-पण्डितप्रवर-श्रीगोविन्दठक्कुरेण विरचितो धर्मं जिज्ञासमानानामुपासकानाञ्च मार्गप्रदर्शकः पूजाबोधननिपुणः पूजाप्रदीपः ।

लोकोपकारायैव धृतशरीरा ज्ञानविज्ञानधना अज्ञातधर्मरहस्यान् कुमार्गे प्रवृत्तान् निवर्त्तयन्ति, ततस्तथा च धर्मरहस्यप्रबोधनेन पुनस्तान् सन्मार्गे प्रवर्त्तयन्ति ।

अत्र सन्मार्ग-कुमार्गज्ञानञ्च शास्त्ररहस्यज्ञानाधीनम् । तच्च रहस्यं सदाचारं विना न सम्भवतीति तदर्थं सतां तद्विरचितग्रन्थानां वा सङ्गोऽपेक्षितः ।

आशासे सिद्धपुरुषविरचितेनानेन ग्रन्थेन पठतां नूनमेव धर्मरहस्यावगमः स्यादिति ।

ग्रन्थेऽस्मिन् निखिला अपि पूजाविषयाः स्नानध्यानविविधन्यासादयो मन्त्रादयश्च सम्यङ् निरूपिताः । मध्ये मध्ये समागतान्युपदेशवचनानि चात्र स्वर्णे सुगन्ध इव प्रतीयन्ते ।

अस्माभिः सम्पादितस्यास्य ग्रन्थस्योपयोगितामवलोक्यैव प्रकाश्यतामानीय विदुषां पुरः प्रस्तूयते ।

एतद्ग्रन्थस्य मैथिलीलिपिनिबद्धस्य देवनागरीलिपिनिबद्धा प० श्रीधर्मनाथझाशर्मा भूयांसं धन्यवादमर्हति ।

कल्पतां ग्रन्थकुसुममिदं परमामोदायोपासकानां मार्गदर्शनाय चाज्ञातमार्गाणां तोषाय सुधियां मङ्गलाय जगतां चेति शम् ।

सतामनुचरः

मधुश्रावणी
१९।८।८५ ई०

जयमन्तमिश्रः
कुलपतिः
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः,
दरभङ्गा

भूमिका

"अहिंसार्थाय भूतानां धर्मप्रवचनं कृतम्" --- व्यासः ।

वर्त्तमानोऽयमस्माकं समाजः पुरा बहुषु वर्गेषु विभक्त आसीत् । वर्गाश्च ते मानव-राक्षस-पैशाचादयः । अत एवास्माकं स्मृत्यादिग्रन्थेषु मानवानामिव तेषामपि राक्षसादीनामाहारव्यवहाराश्च वर्णिता उपलभ्यन्ते । मानवैः सह तेषां स्वाभाविको विरोधः, आहारव्यवहारभेदात् । यद्यपि मशकादिमानवान्ताः सर्वेऽपि जीवास्तद्भक्ष्या आसन्, परं तत्रापि बुद्धिजीवित्वान्मुख्या मानवाः, तेष्वपि ब्राह्मणा एव प्रमुखतां लभन्तेस्म । राक्षसादिष्वपि वर्णभेदा आसन्, ब्राह्मणादयो वर्णास्तत्रापि, तेच विद्वांसः कर्मकाण्डनिपुणाश्चापीति शास्त्रेषु वर्णितम् । यथाऽऽदिकाव्ये सुन्दरकाण्डे हनुमत्कर्त्तृकवेदकर्मकश्रवणमुपस्थापयन्नाह वाल्मीकिः—

"षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् ।
शुश्राव ब्रह्मघोषान् स विरात्रे ब्रह्मरक्षसाम् ॥इति ।

परन्तु वेदज्ञा अपि ते ब्रह्मराक्षसाः परदाराहरणं तद्गमनं ब्राह्मणादिवधं च स्वधर्मं मन्यमानास्तथैवाचरन्तिस्म ।

सत्यमेवोक्तं—"न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः ।
स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः" ॥
"भूयोऽपि सिक्तः पयसा घृतेन न निम्बवृक्षो मधुरत्वमेति" इत्यादि ।

यथा तत्रैव सीतां प्रति रावणोक्तिः—

"स्वधर्मं रक्षसां भीरु सर्वथैव न संशयः ।
गमनं वा परस्त्रीणां हरणं सम्प्रमथ्य वा ॥ इत्यादि ।

एवमेव रावणवधकाव्ये रामं प्रति रक्षसां स्वधर्मकथनम्—

अद्यो द्विजान् देवयजीन् निहन्म:
कुर्म: पुरं प्रेतनराधिवासम् ।
धर्मो ह्ययं दाशरथे, निजो नो
नैवाध्यकारिष्महि वेदवृत्ते ॥इत्यादि ।

ईदृशैर्धार्मिकैस्तै: पिशाचराक्षसादिभि: समये समये सहस्राणि ज्ञानविज्ञानधना: शाकफलोपजीविन: ऋषय: कवलीकृता: । यदधिकृत्य रामेणोक्तं राक्षसान् प्रति—

"आत्मम्भरिस्त्वं पिशितैर्नराणां
फलेग्रहीन् हंसि वनस्पतीनाम्" इत्यादि ।

यद्यपि मानवा इव तेऽपि देवोपासका आसन् । तेषां देवेषु जगदम्बाया आशुतोषस्य च मुख्यत्वम् । इमौ च देवौ मानवोपास्यावपि, परन्तु पूजाप्रक्रियायां मानवानां तेषां च महान् भेद: "वयं यदन्ना देवास्तदन्ना" इति नियमात्। भगवान् विष्णुस्तु घण्टानादैरुद्घोषित: शत्रुस्तेषां परं प्राप्तेऽवसरे जगदम्बयाऽऽशुतोषेणापि च ते नो मुक्ता इति पौराणिकै: काव्यज्ञैश्च साध्ववगम्यते । महानाटके लङ्कादहनकालिकीं रावणचिन्तामुल्लिखति ग्रन्थकार:—

"तुष्टा हि रुद्रा दशभि: शिरोभि—
स्तुष्टो न चैकादशको हि रुद्र: ।
अतो हनूमान् दहतीति कोपात्
पङ्क्तेर्हि भेदो न पुन: शिवाय" ॥इति।

जगदम्बाया अवतरणं यदर्थं तदर्थमेव जगत्पितुरप्यवतार:, यथा दुर्गासप्तशत्याम् —

"इत्थं यदा यदा बाधा दानवोत्था भविष्यति ।
तदा तदाऽवतीर्य्याहं करिष्याम्यरिसङ्क्षयम्" ॥

इति जगदम्बोक्ति: । एवमेव श्रीमद्भगवद्गीतायां—

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

इति भगवदुक्तिः । उभयत्रापि दानवपदेन दुष्कृत्पदेन च जीवाहारिणो राक्षसादय एव गृह्यन्ते । राक्षसादयोऽपि विद्वांसस्तस्मात्तेषामपि स्वानुकूलाः पूजादिसम्पादका ग्रन्था आसन् । परमेषां ते ग्रन्था वेदानुयायिनां ग्रन्थतो नितान्तं भिन्ना यतोहि "नैवाध्यकारिष्महि वदेवृत्ते" इति ते स्वीकुर्वन्तिस्म ।

देवाश्च मानवपक्षपातिन इति तेऽपि राक्षसादीनां शत्रव एव । अतएव च धर्मग्रन्थेषु देवासुरसङ्ग्रामादिचर्चा श्रूयते ।

शनैः शनैर्बहुकालो व्यतीतः, बहवो ज्ञानविज्ञानघना ऋषयो विगताः । अवशिष्टाश्च ते परस्परं विचिन्त्य लोककल्याणाय "सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डितः" इति नीत्या विवादमपाकर्त्तुं तैः सह सन्धिं चक्रुः । तत्कालीना आचारग्रन्था मुख्यतया स्मृतिपदेन धर्मशास्त्रपदेन चाभिधीयन्ते । ब्राह्मणग्रन्थानामपि वेदनामधेयत्वं तस्मादेव कालात् । अतस्तत्र ग्रन्थेषु समेषां व्यवस्था तिलतण्डुलवन्मिश्रितामिश्रिततया निपुणं प्रतिपादिता । एतत्परिणामोऽपि सुखदोऽभूत् । सर्वेऽपि रक्षसादयस्ते मानवसङ्घेष्वेव सङ्गता विलीना वेति नाद्य तेषां नामान्यपि क्वापि श्रूयन्ते । परन्त साहचर्येण यथाऽस्माभिस्ते बहुक्षेत्रेषु प्रभावितास्तथैव प्रकृतिपरवशैस्तैरपि वयं भक्षणपूजनादिषु प्रभाविता एव । अस्यैव फलं यद्धार्मिकक्षेत्रेष्वपि मानवानां पारस्परिकं सामञ्जस्यं नाद्यावधि सञ्जातं भोजनादौ च तन्नास्त्येव । अस्तु ।

एक एव परमात्मा मातृरूपेण पितृरूपेण मातापितृरूपेण करचरणादिरहितशालग्रामनर्मदेश्वरादिरूपेण निर्गुण-सगुणादिरूपेण प्रकारान्तरेण वा भक्तभावनयोपास्यते । न तत्र क्वापि मौलिको भेदः । परमिन्द्रियपरवशैरस्माभिरेव तत्र भेदः कल्प्यते स्थाप्यते च । अस्तु ।

आशासे—ग्रन्थस्यास्य प्रकाशनेनोपासकानामवश्यमेव नेत्रोन्मीलनं स्यात्, तथा ते चैतस्याध्ययनेन पुनः स्वमार्गं परिचीय तमनुसरिष्यन्तीति।

अस्माकं वेदेषु मुख्यतया कर्मकाण्डपरा उपासनाकाण्डपरा ज्ञानकाण्डपराश्च त्रिविधा मन्त्रा उपलभ्यन्ते। तस्माद् वेदानधिकृत्य लिखिता ग्रन्था अपि प्राधान्येन त्रैविध्यमेव भजन्ते।

तत्रायं प्रकृतग्रन्थः पूजाप्रदीप उपासनाविषयकत्वादुपासनाकाण्डीयग्रन्थेष्वेव परिगण्यते। अत्र मुख्यतया पञ्चदेवानां शिवाम्बिकागणेशविष्णुदिवाकराणां प्रसङ्गादन्येषामप्युपासना निपुणं वर्णिता। उपासकानां कृते भूशुद्धिविविधन्यासादयोऽपि बिषया अतीव प्राञ्जलतयाऽत्र निरूपिताः। सिद्धपुरुषतयाऽवगतनिखिलशास्त्रतत्त्वेन ग्रन्थकारेण हिंसोल्लेखो नाकारि कुत्रापि। अस्तु।

श्रीमैथिलीजन्मभूमिथिलाऽलङ्कारभूतो महामहोपाध्यायपदवीकः सिद्धपुरुषः परमभागवतः श्रीगोविन्दठक्कुरः प्रकृतग्रन्थप्रणेता। अयं "घुसौते नगवार" मूलको भटसिमरि ग्रामवासी मैथिलोऽग्रजन्मा हयग्रीवोपासकः श्रीवैष्णवश्चासीत्। अस्य पिता श्रीकेशवठक्कुरो माता च "सोनोदेवी" इति तदीय काव्यप्रदीपग्रन्थस्यादौ पठितेन पद्येनैवावगम्यते। पद्यञ्च-

"सोनोदेव्याः प्रथमतनयः केशवस्यात्मजन्मा
श्रीगोविन्दो रुचिकरकवेः स्नेहपात्रं कनीयान्।
श्रीमन्नारायणचरणयोः सम्यगाधाय चित्तं
नत्वा सारस्वतमपि महः काव्यतत्त्वं व्यनक्ति॥

इति। श्रीबृद्धिकरठक्कुरोऽस्य पितामहः प्रपितामहश्च श्रीरविकरठक्कुरः। ग्रन्थकारस्यैव वैमात्रेयो भ्राता श्रीरुचिकरठक्कुरः कविषु प्रसिद्धः। कुलेऽस्मिन् बहवो महामहोपाध्याया अभवत्। कुलमिदं महामहोपाध्यायमालाऽलंङ्कृतमिति निःसंशयं वक्तुं शक्यते। श्रीगोविन्दठक्कुरस्यात्मजेषु कौमुदीचतुष्टयकर्त्ता श्रीदेवनाथठक्कुरः सतां मण्डले परमां प्रसिद्धि लेभे।

काव्यप्रदीपस्यान्ते सम्मुलिखितश्लोकेनावगम्यते यदनेन ग्रन्थचतुष्टयमकारि, यथा —

"दीपिकद्वितयं कन्ये प्रदीपद्वितयं सुतौ।
स्वमतौ सम्यगुत्पाद्य गोविन्दः शर्म विन्दति॥

इति । परं साम्प्रतं तु काव्यप्रदीपः पूजापूदीपश्चेति ग्रन्थद्वयमेवोपलभ्यते। भवेदवशिष्टं दीपिकाख्यं ग्रन्थद्वयमप्रकाशितं विनष्टं वेति ।

ग्रन्थकारेण स्वग्रन्थानामादावन्ते वा क्वापि स्वाविर्भावकालतिरोभाव-कालो वा न सूचितः,तेन तस्य कालोऽधुनाऽपि सन्दिग्ध एव। मिथिलातत्त्वविमर्शे समुद्धृतेन पद्येन केवलं तच्छरीरत्यागकाल एव ज्ञायते न तच्छरीरग्रहणकालः । यथा—

"मासे कार्त्तिकनाम्नि चन्द्रसुखदे पक्षे तृतीयातिथा-
बब्दे लक्ष्मणभूपतेः परिगते मासेषुससूचिते ।
गोविन्दं हृदये निधाय सदये गोविन्दपादोदके
कायस्याद्धमगात् त्रिविष्टपमहो गोविन्दसट्ठक्कुरः ॥

इत्येन, ५१२ लक्ष्मणसंवत्सरे कार्तिकशुक्लतृतीयायां गङ्गातटे श्रीगोविन्दस्य शरीरत्यागोऽभूदिति बोध्यते ।"शतायुर्वै पुरुषः" इति श्रुत्या तच्छरीरग्रहणकालश्च ४१२ लक्ष्मणसंवत्सरो वा तत्समीपवर्तिसंवत्सरान्तरं वाऽनुमातुं शक्यते । अस्तु।

अद्वितीयस्यास्य पूजापूदीपाख्यनिबन्धग्रन्थस्य प्रकाशनेन न केवलमुपासकानामेव प्रत्युत् सर्वेषां धर्मशास्त्ररहस्यजिज्ञासूनां कृते का० सिं० द० संस्कृत विश्वविद्यालयाधिकारिभिर्महोपकारः कृत इति ते नूनमेव साधुवादार्हाः :

आशासेऽस्य प्रकाशनेनावश्यमेव सम्पूर्णे भारते विशेषतो मैथिलीजन्मभूमि-मिथिलायाञ्च गोविन्दप्रदर्शिता पूजापद्धतिरेवानुसरणीया स्यादिति ।

अन्ते च गुणैकपक्षपातिनो विद्वज्जनान् प्रकाशनाशेषदोषक्षमायै भूयः भूयः सम्प्रार्थ्य विरम्यते विस्तरादिति ।

मधुश्रावणी
१६।८।८५

श्रीप्रभुनारायणशर्मा
उपाचार्यः
स्नातकोत्तरधर्मशास्त्रविभागः
का० सिं० द०सं० वि० वि० दरभङ्गा ।

म० म० गोविन्दठक्कुरकृतपूजाप्रदीपस्य

विषयसूची

क्रमसंख्या	बिषयाः	पृष्ठम्
१	मङ्गलाचरणम्	१
२	स्नानादिविधिः	२
३	तर्पणादिविधिः	३
४	भूतशुद्धिं विना पूजा विपरीतफलदा	६
५	स्वस्तिकादिलक्षणम्	७
६	मातृकान्यासः	९
७	प्रपञ्चयागः	१३
८	प्राणायामविधिः	१५
९	वायुपूजा	२५
१०	इन्द्रादिवाहनानि	३२
११	पूजोपयुक्तासन-मुद्रालक्षणानि	३७
१२	देवार्चनावशिष्टजलमहत्त्ववर्णनम्	३७
१३	भौमविघ्ननिवारणविधिः	४४
१४	आसनोपवेशनविधिः	४५
१५	मातृकान्यासविधिः	४६
१६	अथ संहारक्रमः	४७
१७	अथान्तः पूजा	५१
१८	अथ वाह्यपूजा	५२
१९	वाह्यपूजायां संक्षेपः	५७
२०	मातृकान्यासः	५८

क्रमसंख्या	विषयाः	पृष्ठम्
२१	विष्णुपूजायां विशेषः	६१
२२	बाह्यपूजा	६१
२३	सरस्वतीमन्त्राः	६४
२४	भूतलिपिमन्त्रः	६६
२५	अथ मन्त्रन्यासः	६६
२६	अथ स्थितिप्रकारः	६७
२७	अथ संहारः	६७
२८	निशि ताम्बूलभक्षणं निषिद्धम्	७३
२९	अनध्यायविचारः	७३
३०	अथ लक्ष्मीमन्त्राः	७५
३१	अथावरणपूजा	७९
३२	श्रीमन्त्रेषु साधारणधर्माः	८०
३३	श्रीसूक्तम्	८१
३४	भुवनेश्वरीमन्त्राः	८२
३५	दुरितात्रिपुरान्नपूर्णामन्त्राः	८८
३६	अथ दुर्गामन्त्राः	९१
३७	अथत्रिपुरभैरवीमन्त्राः	९४
३८	मूर्त्तिन्यासः	९६
३९	भूषणन्यासः	९७
४०	आवरणपूजा	९८
४१	अथ गणपतिमन्त्राः	९९
४२	अत्र श्रीप्रभृतिध्यानम्	१०४
४३	अथ सोममन्त्राः	१११
४४	अथ सूर्यमन्त्राः	११३
४५	अथाग्निमन्त्राः	११८
४६	अथ शिवमन्त्राः	१२०

४७	गायत्रीमन्त्रः	१३७
४८	अथ विष्णुमन्त्रः	१४२
४६	केशवादिन्यासः	१४३
५०	नारायणमन्त्रः	१४५
५१	श्रीराममन्त्रः	१५२
५२	श्रीनृसिंह मन्त्रः	१५४
५३	श्रीचक्रमन्त्रः	१५६
५४	अथ गोपालमन्त्राः	१५७
५५	अथ सृष्टिप्रकारः	१६०
५६	अथ सृष्टिक्रमः	१६६
५७	अथ विभूतिपञ्जरन्यासः	१८५
५८	अथ बाह्यपूजा	१८८
५९	अथ छत्रजादिध्यानम्	१८९
६०	अथ पुरश्चरणपद्धतिः	१६१
६१	पुरश्चरणकर्त्तुर्भोजनादिविचारः	१६५

म० म० गोविन्दठक्कुरकृतपूजाप्रदीपस्य

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
ना सेवन्ते	नासेवन्ते	१	१०
बीजसेत्यन्वय:	बीजेनेत्यन्वयः	३	६
वध्वा	बद्ध्वा	३	११
तपयामि	तर्पयामि	३	१४
अस्त्रण	अस्त्रेण	३	२३
दुरितोऽपि विनाशनः	दुरितोपविनाशनः	४	१
ऊर्ध्वोदम्बरके	ऊर्ध्वं द्वारके मध्ये	४	७
यजेदिति	यजेत्	४	७
पार्श्वस्थिता	पार्श्वस्थिते	४	६
पूजनीयेति	पूजनीये" इति	४	१२
वामदक्षिणोरुपरि	वामदक्षिणोपरि	६	१७
वन्देत्	वन्देद्	७	८
मायादतलमस्तकम्	मापादतलमस्तकम	८	२४
मनुनाहं सदेवस्य	मनुना हं सदेवस्य	६	४
बुध्येति	बुद्ध्या ।इति	६	८
मतः। पक्षद्वयमपि	मतः पक्षद्वयमपि	९	९
गुरुतल्तगमनेत्यर्थ	गुरुतल्पगमनमित्यर्थः	९	२१
शिरोबदनहृद्द्युपादेष	शिरोवदनहृद्युग्मपादेषु	१०	३
पञ्चाङ्ग क्षे	पञ्चाङ्गपक्षे	१०	२१
सवषट्शिखा । हुमिति	सवषट्शिखा हुमिति	१०	२३

अशुद्धम्	शुद्धम्	पृ०	प०
द्यु क्तामिति	द्यु क्तमिति	१०	२६
सक्रुद्भावेन	सुहृद्भावेन	११	१०
तत्ते जे रता	तत्तोजोरेतो	११	२४
यथाविधिः	यथाविधि	१२	२२
नाङ्गा	नङ्ग	१३	१
नाङ्ग	नङ्ग	१३	१२
जस्राम्	नम्राम्	१३	१७
ज्ञा न्द्रियाणि	ज्ञानेन्द्रियाणि	१४	१८
तस्माद	तस्माज्	१४	१८
नाशु संयमम्	नासुसयमम्	१५	७
नाशुसंयमः	नासुसंयमः	१५	८
मासतोऽघंशः	मासतोंऽहसः	१५	११
षद्भिरषीह	षड्भिरषीह	१५	१६
षणवस्य	प्रणवस्य	१५	१८
वक्ष्यमाणा	वक्ष्यमाण	१६	१७
वचनान्त	वचनान्तर	१६	२५
पदये	पूरये	१८	५
वाक्य	वाक्ये	१८	१०
एव	रेव	१८	११
विन्यसत्	विन्यसेत्	१९	११
तुष्टी	तुष्टिः	२०	२
रतिधृ । तिः	रतिधृंतिः	२०	२
ज्योत्स्नाख्यः	ज्योत्स्नाख्या	२०	३
समस्तान्यसतः	समस्तान् न्यसतः	२०	१५
कल्पविशेषोक्ता	कल्पविशेषोक्तान्	२०	२१
जीवब्रह्मणोरैक्ये	जीवब्रह्मणोरैक्यम्	२१	५

अशुद्धम्	शुद्धम्	पृ०	पं०
माघायाद्भिः	मर्धायाद्भिः	२२	१८
विषयमन्त्रम्	मन्त्रविषयम्	२३	१६
बीजेनैव	बीजेनैव ।	२३	१६
गन्धादिभिर्निवेद्यान्ते	सुगन्धादिनिद्यधान्ता	२९	२४
पञ्चोपचारिकीम्	पञ्चोपचारिकी	२९	२४
अघोप	अथोप	२९	१८
देवानीत्यादि	देयानीत्यादि	३०	१६
सुखं	सुखो	३२	२४
छगण	छाग	३३	१
दम्भोणि	दम्भोलि	३३	६
कृपाल	कृपाण	३३	६
उच्छिष्टभोजिनः	चोच्छिष्टभोजिनः	३५	२४
अस्त्रमन्त्रे, जलक्षेपे	अस्त्रमन्त्रैर्जलक्षेपे	४४	११
विघ्नकर्त्ता च	विघ्नकर्त्तारश्च	४४	१४
व्युत्क्रमाग्नीलानि	व्युत्क्रमाल्लीनानि	४५	१७
विद्यञ्चापि	विद्याञ्चापि	४६	२२
ममिताभरण	ममिताभरणा	४७	१४
रवाद्यो	रवाद्यधो	४७	१६
आकारादि	अकारादि	४७	१८
करैव विरतं	करेण विरतां	४७	२२
वास	वासोऽ	४७	२४
रविन्दंवर्णं	रविन्दवर्णं	४७	२४
मारभ्य	मारभ्य ।	४७	२४
धृताक्षगुणपुस्तकाः	धृताक्षगुणपुस्तका	६५	९
व्याख्यामक्षगुण	व्याख्यामक्षगुणं	६६	१६
भवद्भतये	भवद्भूतये	७१	१०

अशुद्धम्	शुद्धम्	पृ०	पं०
दोषानिमान्	दोषानिमाँश्च	७४	३
ययजेत्	यजेत	७४	३
दीर्घसावादि	दीर्घासावादि	७७	६
मात्रः	मात्र	७७	९
पुलिनेति	पुलिनेऽति	७८	२१
शम्भपत्नी	शम्भुपत्नी	७	२५
गामनीम्	गामिनीम्	८१	१४
पाद्मिनीं	पद्मिनीं	८१	२१
माकतिं	माकूतिं	८२	२
युष्टिं	यष्टिं	८२	१०
दहि	देहि	८२	१९
तालवृत्तञ्च	तालवृन्तञ्च	८५	६
ताम्बूल	ताम्बूलं	८५	६
सन्दीप्ताः	सन्दीप्ता	८५	८
मालिक्य	माणिक्य	८५	२०
शोभिनाः	शोभनाः	८७	२
ध्याननं	ध्यानं	८७	३
हविन्यतु	सविन्यास	८७	२३
सम्भूतै	समुद्भूतै	९१	२
गौरीपतिञ्च्	गौरीपतिं	१०१	१७
रतिपतिञ्च्	रतिपतिं	१०१	१८
तद्वीतिधौतपर्यन्तं	तद्वीचिधौतपर्यन्तं	१०६	४
दिनेशो	दिनेशं	१०७	२०
मपास्महे	मुपास्महे	१११	४
अम्बुजार्च्य	अम्बुजार्च्य	११२	२१

अशुद्धम्	शुद्धम्	पृ०	प०
समुखः	सुमुखः	११२	२१
बन्धककान्ति	बन्धूककान्ति	११४	५
आमावास्या	अमावास्या	११९	१
भक्त्वा	भुक्त्वा	११६	३
सङ्काशं	शङ्काशान्	१२३	११
षण्मखं	षण्मुखं	१२५	२
भानोद्यन्नेत्रमीशं	भानूद्यन्नेत्रमीशं	१३१	८
वारिता	वारिते	१३३	१४
स्फुर्य	स्फुर	१३४	६
एकैवं	एकैकं	१४१	२१
रथ	रक्त	१४३	१८
मिन्दरा	मिन्दिरा	१४७	२७
प्रधानं	प्रधानो	१४८	१६
जानुद्वय	जानुद्वये	१५२	११
धतातपत्रं	धृतातपत्रं	१५३	१७
प्राक्तो	प्रोक्तो	१५४	१६
कुशानं	कुशानां	१५७	३
चिरमश्लेषणो आपाः	चिरमश्लेषतोऽत्रपाः	१६२	२४
गोगोपसंघावत्तं	गोगोपसंघावृतं	१६३	५
गोगिन्द	गोविन्द	१६३	६
वरदं	च वरदौ	१६५	८
विविधः	विविधाः	१६५	१५
प्रभृतार्णकराम्बुजः	प्रभृतार्णकराम्बुजाः	१६५	१५
मध्योश्च	मध्यश्च	१७०	११
शिष्टषु	शिष्टेषु	१७१	२२
मालामन्त्र	मालामन्त्रं	१७१	२४

श्रीशक्तिकाम	श्रीशक्तिकामो	१७४	७
दधान	दधानं	१७६	९
विद्रम	विद्रु म	१८१	१०
धतचामर	धृतचामर	१८३	१५
तलान्तात्	तलास्ताः	१८३	१५
स्मिचन्द्रिको	स्मितचन्द्रिको	१८७	१२
रुचिरासुरमात्मजायाम्	रुचिरामसुरात्मजायाम्	१८७	१६
श्लिष्यन्त आर्द्र	श्लिष्यन्तमार्द्र	१८७	१७
रलङ्क	रलङ्कृ	१८९	२०
स पूज्य	सम्पूज्य	१९१	८
वघ्नभूता	विघ्नभूता	१९२	१०
निजगृहम्	निजं गृहम्	६१५	४

॥ इति ॥

ओं नमो गोपीजनवल्लभाय

महामहोपाध्याय गोविन्दठक्कुरकृतः

पूजाप्रदीपः

इन्द्रादिप्रौढवृन्दारकरभसनमन्मौलिमन्दारतार—
स्रग्भारभ्रासिभृङ्गीदनुतनययशो वाऽपि चन्द्राङ्कलेखा ।
तन्वङ्गीनेत्रभङ्गीपटुनटनतटीभ्रूकुटीर्मीनकेतो—
रव्यादव्याजभव्या तनुरसुररिपोर्भव्यमव्याहतन्नः ॥१॥

स्थेमानं स्थगनयनगतिं शिथिलयन् मानं समुन्मूलयन्
व्याहारं स्खलयन् मतिम्मलिनयन् मन्दाक्षमान्दोलयन् ।
गोपीभिर्मधुर्निर्विशेषमधिकानन्दं समास्वादितः
स्वान्ते सन्ततमस्तु मेयदुकुलोत्तंसीयवंशीरवः ॥२॥

न ग्लायन्ते त्रिदशगुरवे यस्य विद्यां विदन्तो
ना सेवन्ते जलधितनयां येन दृष्टाः कृपार्द्रम् ।
नाकाङ्क्षन्ति क्वचिदपि सुधां यस्य काव्यं पिवन्तः
सन्तस्सोयं जयति जगति श्रीभवानन्दरायः ।३॥

आहूताऽपि पदं ददाति न पुरो न प्रार्थितापीक्षते
साकूतं परिभाषिताऽपि बहुशः किञ्चिन्न चाभाषते ।
आश्लिष्टाऽपि न सम्मुखानि रचयत्यङ्गानि मूढाशया
कोपोद्रेकरपङ्कदेवरमणः श्रेणी यदीयो द्विषाम् ॥४॥

श्रीमत्केशवतनयो गोविन्दस्तन्निदेशवशवर्ती ।
प्रकटयति धर्मपदवीं पूजाकर्म प्रदीपेन ॥५॥

पर्यस्तानां निबन्धेषु विधीनामविरोधिनाम् ।
पूजाकर्मणि संक्षेपात्सङ्ग्रहः क्रियते मया ॥६॥

अपि विविधनिबन्ध - प्रोद्धृतैर्वाक्यजातै —
विहितरुचिरगुम्फः किम्बुधैर्न्नादृयेद्यः ।
उपकृतकुसुमानां मालिकानान्तरुभ्यो
भवति हि पटमाला गुम्फनङ्गौरवाय ॥७॥
सम्प्रदायानुरोधेन प्राप्तमप्युज्झितं मया ।
किञ्चिदप्राप्तमप्येतत्पद्धतौ कथयिष्यते ॥८॥

आसाद्य बुद्धिभाजां सकलदशासंस्पृशः स्नेहान् ।
सुमहति पात्रे निहितः पूजादीपः प्रदीप्यतामेषः ॥९॥

तत्र प्रथमं स्नानादि । तद्यथा --

अथ प्रातस्समुत्थाय धीमान् ब्राह्मे मुहूर्त्तके ।
ब्रह्मरन्ध्रस्थिते पद्मे सहस्रदलशोभिते ॥
श्रीगुरुं परमात्मानं व्याख्यामुद्रालसत्करम् ।
द्विनेत्रं द्विभुजं पीतं ध्यायेदखिलसिद्धिदम् ॥
एवं ध्यात्वा च तत्पादं स्रुतपीयूषधारया ।
प्रक्षालितं निजं देहं सञ्चिन्त्य स्थिरमानसः ॥
स्वीयहृत्कमले ध्यात्वा यथावत्स्वेष्टदेवताम् ।
तत्प्रभापटलव्याप्तन्देहं स्वं परिचिन्तयेत् ॥
प्रणम्याज्ञां गृहीत्वास्या ऋष्यादिन्यासपूर्वकम् ।
मन्त्रार्थं संस्मरंस्तीर्थङ्गत्वा शास्त्रोक्तवर्त्मना ॥
स्नात्वा पश्चात्स्वमन्त्रेण ऋष्यादिन्यासपूर्वकम् ।
ध्यात्वेष्टदेवतां तीर्थमावह्याङ्कुशमुद्रया ॥
अमृतीकृत्य तत्तीर्थं मुद्रया धेनुसंज्ञया ।
वमित्यमृतबीजेन रक्षयेतच्छरेण वै ॥
तज्जले देवतामूर्त्तिं ध्यात्वा तच्चरणस्रुते ।
तीर्थे निमज्य त्रिर्विद्वान्मनसा मन्त्रमुच्चरन् ॥
कृत्वाऽघमर्षणं भूयः सन्ध्यादिकृतिपूर्वकम् ।
जप्त्वा मूलमन्त्रन्त्वष्टाविंशति - प्रमितिन्ततः ॥
वक्ष्यमाणेन मन्त्रेण तावत्संख्यं प्रतर्पयेत् ।

अभिषिञ्चेत्ततो मूर्ध्नि तद्वत्कलशमुद्रया ॥
तत्तद्देवस्य गायत्रीं जपित्वा पङ्क्तशस्तथा ।
ओं घृणि सूर्य आदित्येत्यष्टार्णेन च भानवे ॥
अर्घन्दत्वाऽथ मूलेन दशधा मन्त्रितैर्जलैः ।
आचम्य दिक्पतिन्नत्वा गच्छेद्देवगृहन्ततः ॥

अमृतीकृत्यामृतवीजसेत्यन्वयः । स्नात्वा निमज्जनं विधाय कृत्वाऽघमर्षणमिति द्विजविषयम् ।

तर्पणविधिस्तु—

सन्तर्प्य पीठमन्त्रैः सकृत् - सकृत् प्रथममच्युतन्तत्र ।
आवाह्य पूजयेत्तं तोयैरेवाधिपः समुपहारैः ॥
बध्वा धेनुमुद्रया तोयैः सम्पाद्य तर्पणं बाच्यम् ।
तत्तदञ्जलिना तं स्ववर्णचैकीकृतेन तर्पयेत् ।
भूयः स्वकालविहितान् सकृत्सकृत्तर्पयेच्च परिवारान् ॥
तर्पयामिपदं योज्यं मन्त्रान्ते स्वेषु नामसु ।
द्वितीयान्तेषु च पुनः पूजाशेषं समापयेदिति ॥

ओं घृणि सूर्येत्याद्यपि द्विजविषयम्, वैदिकत्वात्तन्मन्त्रस्य । शूद्रादिना तु ह्रीं ह्रीं स इत्यादि मन्त्रेणार्घो देयः । अग्रेप्येवं द्रष्टव्यम् । ततो द्वारादिपूजा । तत्र प्रथमम्—

आचम्य विधिना कुर्यात्सामान्यार्घन्तु तद्यथा ।
अस्त्रेण पात्रं संशोध्य ह्रीं मन्त्रेण प्रपूर्य च ॥
तीर्थमन्त्रेण चावाह्य तीर्थं सावित्र्यमण्डलात् ।
तज्जले गन्धपुष्पाणि निःक्षिपेत्तारमुच्चरन् ॥
अस्त्रेण शोधिते स्पृष्ट्वा तन्मूलं जपेत्तृचः ।
दर्शयेद्धेनुमुद्राञ्च सामान्यार्घोयमीड़ितः ॥
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिङ्कुरु ॥

एषु तीर्थं मनुः प्रोक्तो दुरितोऽपि विनाशनः ।
तज्जलैरस्त्रमन्त्रेण द्वारमभ्युक्ष्य पूजयेत् ॥

तीर्थावाहनमङ्कुशमुद्रयेत्यग्रे वक्ष्यते । तज्जलैः - सामान्यार्घजलैः पूजयेदित्यनुवृत्तौ - विघ्नं द्वारोर्द्ध्वशाखायां महालक्ष्मीं सरस्वतीम् । एतत्त्रयपूजनञ्चतुर्थशाखायां द्वारस्य दक्षिणमध्यवामभागेषु । तदुक्तं पद्धतौ--

द्वारस्य दक्षिणे वामे गणेशञ्च सरस्वतीम् ।
ऊर्ध्वोदुम्बरके मध्ये तयं द्वारिप्रियं यजेदिति ॥
ततो दक्षिणशाखायां विघ्नं क्षेत्रेशमन्यतः ।
तयोः पार्श्वस्थिता गङ्गायमुने पुष्पवारिभिः ॥
धातारञ्च विधातारं शङ्खपद्मनिधीन्तथा ॥
देहल्यामर्चयेदस्त्रं प्रतिद्वारमिति क्रमात् ॥

दक्षिणवामशाखयोः क्रमेण गङ्गायमुने पूजनीयेति पूर्णपद्धतौ—

गङ्गाञ्च यमुनान्तद्वदक्षसव्योस्तु शाखयोरिति ।

केचि त्तु—विघ्नेशदक्षिणवामपार्श्वयोर्गङ्गायमुने, एवं क्षेत्रेशपार्श्वयोरपीत्याहुः । एवं धात्रादयोऽपि । ततस्तत्तद्देवतास्तत्तद्द्वाराधिपान् यजेत् । ततः अस्त्रपूजानन्तरम् –

विष्णोर्द्वाराधिपा नन्दसुनन्दचण्डसंज्ञकाः ।
प्रचण्डो प्रबलश्चैव प्रबलो भद्र एव च ॥
सुभद्रश्चैव संप्रोक्ताः शैवा द्वाराधिपाः पुनः ।
नन्दिसंज्ञो महाकालो गणेशो वृषभस्तथा ॥
भृङ्गिरिटिस्तथा स्कन्द उमाचण्डेश्वरस्त्वमी ।
वक्रतुण्डश्चैकदन्तो महोदरगजाननौ ॥
लम्बोदरोऽथ विकटो विघ्नराजो द्वयोः परः ।
धूम्रवर्णस्त्विमे वैघ्नाः शाक्ता या मातरः स्मृताः ॥
ब्राह्मी माहेश्वरी भूयः कौमारी वैष्णवी तथा ।
वाराह्यनन्त्यैन्द्राणी चामुण्डा सप्तमी मता ॥

अष्टमी स्यान्महालक्ष्मीः प्रोक्ता विश्वस्य मातरः ।
इन्द्रो यमोऽथ वरुण कुबेरः त्रैपुरा मताः ॥

नन्द्यादयो द्विक्रमेण पूर्वादिद्वारपालाः । इन्द्रादयस्त्वेकैकम् ।

अनन्तरं देशिकेन्द्रो दिव्यदृष्टावलोकनात् ।
दिव्यानुत्सारयेद्विघ्नानस्त्राद्भिश्चान्तरीक्षगान् ॥

पार्ष्णिघातैस्त्रिभिर्भौमानिति विघ्नान्निवारयेत् । दिव्यत्वं मूलमन्त्रोच्चारणसहितत्वम् । शरतीक्ष्णत्वं - न्यस्तमूलमन्त्रत्वमिति केचित् । पार्ष्णित्वात् - पूर्वं पूर्णापद्धतौ ।

सिद्धार्थाक्षतकुसुमं न बाचाऽस्त्रधिया गुरुः ।
अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ॥
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ।
इत्यन्तेऽस्त्रं समुच्चार्य मण्डपान्तः परिक्षिपेत् ॥

इति विघ्नं निवार्य किञ्चित्स्पृशन् वामशाखां देहलीं लङ्घयेद्गुरुः । अङ्गं सङ्कोचयन्नन्तः प्रविशेद्दक्षिणां घृणांशेन शाखास्पर्श इति व्याख्यातार ।

नैऋत्यान्दिशि वास्तोर्णं ब्रह्माणञ्च समर्च्चयेत् ।
पञ्चगव्यार्घतोयाभ्यां प्रोक्षयेद्यागमण्डपम् ॥
ततः - तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञान्दातुमर्हसि ॥
इत्युक्ताञ्च गृहीतस्य जपस्थानं बिशोधयेत् ।
चतुष्प्रकारान्तद्बुद्धि विद्ध्याद्वीक्षणादिभिः ॥
वीक्षणं मूलमन्त्रेण शरेण प्रोक्षणं मतम् ।
तेनैव ताड़णङ्कुर्याद् मंलाभ्युक्षणं मतम् ॥
चन्दनागुरुकर्पूरैर्धूपयेदन्तरं सुधीः ।

अन्तरम् - मण्डपस्य ।

उक्तेषु चासनेष्वेकञ्चैलाजिनकुशोत्तरम् ।
वेदिकायां प्रविन्यस्य प्रोक्षयेत्सलिलैः शुभैः ॥
आधारादिपृथिव्यन्तास्तत्र सम्पूज्य देवताः ।
मेरुपृष्ठमृषिश्छन्दः पृथिव्याः सुतलं मतम् ॥
देवता कूर्म आख्यातः संस्मरेदृषि - पूर्वकान् ।
पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥
त्वञ्च धारय मां भद्रे पवित्रङ्कुरु चासनम् ।
इति मन्त्रञ्जपन् पीठे प्राङ्मुखो वाप्युदङ्मुखः ।
स्वस्तिकादिक्रमेणैव ऋजुकायो विशेद्बुधः ॥

आधारादिः - आधारशक्त्यादिः ।

विशेन्मृद्वाऽऽसने योगी प्राङ्मुखो वाप्युदङ्मुखः ।
बद्धपद्मासनो मौनी समाहित - जितेन्द्रियः ॥
स्थापयेद्दक्षिणे भागे पूजाद्रव्याणि देशिकः ।
सुवासिताम्बु सम्पूर्णं सव्ये कुम्भं सुशोभनम् ॥
प्रक्षालनाय करयोः पश्चात्पात्रं निवेशयेत् ॥

मृद्वाऽऽसने कुशाजिनयोरुपरि क्लृप्ते कम्बलादौ । पद्मासनपदेन वामदक्षिणोरुपरि दक्षिणवामचरणन्यासमात्रमिह विवक्षितम् । कृताञ्जलिपुटो भूत्वेत्यादिभिरन्यथा विरोधात् । ततः प्रथमं भूतशुद्धिमातृकान्यासौ । तौ च पूजादावावश्यकौ ।

देवो भूत्वा यजेद्देवं नादेवो देवमर्च्चयेदित्यनेनादेवस्य देवपूजानिषेधे स्थिते तावुक्त्वा इत्युच्यतां कृततनुर्विदधीत तद्वन्न्यासमित्यभिधानेन तयोर्देवभावार्पकत्वावगतेः ।

भूतशुद्धिविहीनेन कृता पूजाऽभिचारवत् ।
विपरीतं फलन्दद्यादशक्त्या पूजनं यथा ॥

इति भूतशुद्धिः ।

जपाद्यं सर्वमन्त्राणां विन्यासेन विना लिपेः ।
कृतं तन्निष्फलं विद्यात्तस्मात्पूर्वं लिपिं न्यसेत् ॥

इति मातृकान्यासस्य च तथात्वे प्रमाणान्तरस्यापि सत्वात् ।

तत्र स पूर्वकृत्याभूतशुद्धिर्यथा—

स्नातो निर्मलधौतसूक्ष्मवसनो धौतांघ्रिपाण्यामलः
स्वाचान्तः स्वपवित्रमुद्रितकरः श्वेतोर्ध्वपीठोज्वलः ।
प्राचीदिग्वदनो निबध्य सुदृढ़ं पद्मासनं स्वस्तिकम्
आसीनः स्वगुरून् गणाधिपमथो वन्देत् बद्धाञ्जलिः ॥

स्वस्तिकादिलक्षणमुच्यते –

गुरुगणेशनमस्कारो वामदक्षिणपार्श्वयोः । अग्रे पश्चाच्च दुर्गाक्षेत्रपालयोरपि, तदुक्तम् नमस्कुर्यादित्यनुवृत्तौ--

वामे गुरूं दक्षिणे गणेशं दुर्गां पुरः क्षेत्रपतिञ्च पश्चादिति ।

सुदर्शनस्य मन्त्रेण रक्षाङ्कुर्यात्समन्ततः ।
ओं सहस्रारधमस्त्रिं सुदर्शनमनुमतम् ॥
सुगन्धिपुष्पमर्द्दनेन सुरभीकृतहस्तको ।
क्षिपेदुत्तरतः पुष्पं मन्त्रं नाराचमुद्रया ॥

अथास्त्रमन्त्रेण विशोध्य पाणी त्रिकालदिग्बन्धहुताशशालो ।
विधाय भूतात्मकमेतदङ्गं विशोधयेद्बुद्धमतिः क्रमेण ॥

शालान् तालत्रय मूद्ध्वोद्ध्वं मन्त्रमन्त्रेण रक्षणार्थम् ।

ऊद्ध्वोद्ध्वमन्त्रमन्त्रेण कुर्यात्तालत्रयन्ततः ।
तेन संजनितं तेजो रक्षाङ्कुर्यात्समन्ततः ॥

इति वचनात् । हुताशशालो वह्निप्राकारः । वह्निरूपतया ध्यातेन जलेनात्मवेष्टनमिति यावत् । अनन्तरम् –

सुषुम्ना वर्त्मनात्मानं परमात्मनि योजयेत् ।
योगयुक्तेन विधिना चिन्मन्त्रेण समाहितः ॥
कारणे सर्वभूतानां तत्त्वान्यपि च चिन्तयेत् ।
बीजभावेन नीलानि व्युत्क्रमात्परमात्मनि ॥

सोहमिति - चिन्मन्त्रः । अतएव तत्र हंसमन्त्रेणानयनमुक्तम् । तत्त्वानि च शरीरे सूक्ष्मतया नीलानि पञ्चविंशतिश्चतुर्विंशतिर्वा उतानि । पक्षद्वयमपि प्रपञ्चसारे भूतेन्द्रियेन्द्रियार्थैरुद्दिष्टम् । तत्त्वं पञ्चविंशतिकम् ।

करणोपेतैरेतैस्तत्त्वाद्युक्तानि रहितवचनाद्यैरिति इन्द्रियाणि दश, तत्र बहिरिन्द्रियाणि पञ्च ज्ञानेन्द्रियाणि पञ्च । इन्द्रियाणामर्थाश्च दश । करणानि- अन्तःकरणमात्मनः । मनोबुद्धिरहङ्कारश्चित्तञ्च परिकीर्त्तितम् , इत्युक्तानि ।

इड़ाचक्रे धूम्रं सतगतिबीजं सनवकं
स्मरेत् पूर्वंमन्त्रं सकलभुवनोच्छोषणकरम् ।
स्वकन्देहन्तेन प्रततवपुषापूर्य सकलं
विशोष्य व्यामुञ्चेत्पवनमथ मार्गेण खमणः ।

तेनैव मार्गेण विलीनमारुतं बीजं विचिन्त्यारुणमाप्तपूक्षणैः ।

आपूर्य्यदेहं परिदह्यवामतो मुञ्चेत्समीरं सहभस्मनाटपरमतीव शुद्धं- मनृतांशुपथेन विधुं नयनललाट - वहिः । (......)चन्द्रससुतः सकलार्णमयीम् ।

लपर जपाभिपात्य रचयेच्चतया सकलं वपुरमृतौघवृष्टिमथ वक्रकराद्य- मिदम् । (.........)

टपरम् - विध्वृचमिति - चन्द्रबीजमित्यर्थः ।

ससुतः ललाटचन्द्रात् लपरजपादमृतावनुवृष्टिं निपात्य तया अवशिष्ट- भस्मना सकलं वपुः रचयेत्यन्वयः । वक्ष्यमाणवचनैरप्येतदनुसारेणैवान्वयः ।

विश्लेषयँस्तदा दोषानमृतेनामृताम्भसा ।
आपाद्य प्लावयेद्देहमायादतलमस्तकम् ॥

सञ्जाते निर्मले देहे देवताराधनक्षमे ।
आत्मलीनानि तत्त्वानि स्वस्थानं प्रापयेत्तदा ॥
आत्मानं हृदयाम्भोज - मानयेत्परमात्मनः ।
मनुनाहं सदेवस्य कुर्यान्न्यासादिकन्ततः ॥

कल्पोक्तम् - हंसदेवस्य । मन्त्रो हंस इति । सारसमुच्चये तु—
हंसमन्त्रेण परमात्मनि जीवात्मयोजनमेवोक्तम् । तथाहि—

संयोज्य जीवमथ दुर्गममध्यनाड़ी मार्गेण पुष्करनिविष्टशिवेषु सूक्ष्मे ।
हंसेन देवममरेन्द्रपुरो गतेन सार्द्धेन्दुनाभसितसाद्विदधीतबुध्येति ॥

तत्रास्ति । अतस्तन्मते - चिन्मन्त्रेणानयनमतः । पक्षद्वयमपि प्रामाणिकमेव ।

अमरेन्द्रपुरोगतेन लकारप्रथमेन रेफेणेत्यर्थः । अत्र पूरकम् - षोडशमात्रया, कुम्भकम् - चतुःषष्टिमात्रया, रेचकम् - द्वात्रिंशन्मात्रया विदध्यात् । अस्या-अपि प्राणायामविशेषत्वात् । प्राणायामे च तथात्वस्य वक्ष्यमाणत्वात् । केषाञ्चिन्मते - पापपुरुषस्य शोषणादिकम् यद्वदन्ति, ततः पुरुषनिभं पापमला-दिभवसञ्चितम् ।

ब्रह्महत्या शिरष्कञ्च सुवर्णस्तेयबृहद्भुजम् ।
सुरापान हृदायुक्तङ्गुरुतल्पकटिद्वयम् ॥
तत्संयोगिपद - द्वन्द्वमङ्गप्रत्यङ्ग - पातकम् ।
उपपातकरोमाणं रक्तश्मश्रुविलोचनम् ॥
खड्गचर्मधरं कृष्णं कुक्षौ दक्षिणतः स्मरेत् ।
ततस्संशोषयेदेनं पूरकादिक्रमेण वै ॥
गुरुतल्पेति - गुरुतल्पगमनेत्यर्थः ।

अथ मातृकान्यासः

तत्र मातृकामन्त्रस्य—

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्रीछन्द ईरितम् ।

सरस्वती समाख्याता देवता मातृका तु या ॥
हल: सुरा: समाख्याता वीजानि शक्तयस्तथा ।
शिरोवदनहृद्गुह्यपादेष ऋष्यादि विन्यसेत ॥
अक्लीवह्रस्वदीर्घान्तर्गतै: षड्वर्गकै: क्रमात् ।
षड़ङ्गानि विधेयानि जातियुक्तानि देशिकै: ॥
अङ्गुष्ठादिष्वङ्गुलीषु न्यसेदङ्गै: सजातिभि: ।
अस्त्रं तत्तनयो न्यस्येत्कुर्याज्जलत्रयन्तत: ॥
दिशस्तेनैव बध्नीयाच्छोटिकाभि: समाहित: ।
हृदादिषु च विन्यस्येदङ्गमन्त्रांस्तन: सुधी: ॥
हृदयाय नम: पूर्वं शिरसे वह्निवल्लभा ।
शिखायै वषडित्युक्तङ्कवचाय हुमीड़ितम् ॥
नेत्रत्रयाय वौषट् स्यादस्त्राय फड़िति क्रमात् ।
षडङ्ग मन्त्रानित्युक्तान षड़ङ्गेषु नियोजयेत् ॥
पञ्चाङ्गानि मनोर्यस्य तत्र नेत्रमनुत्यजेत् ।
अङ्गहीनस्य मन्त्रस्य स्वेनैवाङ्गानि कल्पयेत् ॥
जातयश्च नमस्स्वाहा वषडङ्कञ्च एव च ।
जातिषट्कमिति प्रोक्तं हृदाद्यस्त्रान्तसंयुतम् ॥

तृतीया च सकर्मकन्यासक्रियायाम् कर्मणामङ्गमन्त्राणां प्रयोजकत्वविवक्षया। अस्त्रं तत्तनयारित्यादि अस्त्रं तत्तनयोर्न्यस्येदित्यनुरोधात्पञ्चाङ्गपक्षेऽपि यद्यपि अस्त्रन्यास: करतलयोरेव युज्यते, तथाऽपि-रचयतु करद्वन्द्वे पञ्चाङ्गमङ्गुलिपञ्चके। इति क्रमदीपिकावचनस्वरसात्पञ्चाङ्ग क्षे कनिष्ठयोरेवास्त्रन्यास: ।

कवचायेति - पञ्चमस्वरयुक्तो हकारोहुमिति कवचमन्त्र: स वषट्शिखा । हुमिति - वर्मणि स्थितमिति क्रमदीपिका वचनात् । अन्यथा - तत्र छन्दोभङ्गापत्ते: ।

अतएव दुरितमन्त्रादौ दीर्घतल्लाभाय दीर्घं तदनुच्छेदमित्याद्युक्तामिति ।

नेत्रत्रयेति - प्रकृताभिप्रायेण, यत्र ओं नेत्रद्वयन्तत्र नेत्राभ्यामिति द्रष्टव्यम् ।

स्वेनैव जातियुक्तेन मूलेनैवेत्यर्थः । अत्र करन्यासे अङ्गुष्ठाभ्यां नमः इत्यादिकान्मन्त्रानुदाहरन्ति । तत्तु न सम्यगाभाति, प्रमाणस्यादृश्यमानत्वात् । तदङ्गपञ्चकन्तथा यथा समीरितङ्कर इति क्रमदीपिकाबचनेन - हृदयायनमः इत्यादीनामेव करन्यासे विहितत्वात् । करावयवस्याधिकबलत्वादित्यवेहि ।

अङ्गुष्ठादौ हृदयायनमः इत्यादीनां कोऽर्थ इति चेत् - अस्तु कश्चिद्विधानादेव हि तथा न्यासः, न खल्वाधारस्य नामन्यासे प्रयोजकम् । अकारादिन्यासे ललाटाय नमः इत्यादिमन्त्रत्वात् । न च—यन्नामगर्भोन्यसनीय मन्त्रस्तत्रैव तन्न्यास इति युक्तम् । ललाटादौ केशबकीर्त्यादिन्यासेऽतथाभावात् । तथाऽपि सकृद्भावेन पृच्छामीति चेत् उच्यते—

हृदयं बुद्धिगम्यत्वं प्रणामः स्यान्नमः पदम् ।
क्रियते हृदयेनातो बुद्धिगम्या नमस्क्रिया ॥

तुङ्गार्थं स्याच्छिरः स्वस्य विषयाहरणे द्विजम् ।
शिरोमन्त्रेण चोत्तुङ्गं विषयाकृतिरीरिता ॥

शिखा तेजस्समुद्दिष्टा वषडित्यङ्गमुच्यते ।
तत्तेजोऽस्य तनुः प्रोक्ता शिखामन्त्रेण मन्त्रिणः ॥

करग्रहण इत्यस्माद्धेतोः कवचसम्भवः ।
हूँ तेजस्तेजसा देवो गृह्यते कवचन्ततः ॥

नेत्रन्दृष्टिः समुद्दिष्टा वौषड् दर्शनमुच्यते ।
दर्शनं दशि येन स्यात्तत्तेजो नेत्रवाचकम् ॥

अमुत्र सादिकौधात् स्थः क्षेपश्च चलनान्धकौ ।
ताभ्यामनिष्टमाक्षिप्य चालयेत्फट्पदाग्निना ॥

प्रोक्तानीत्यङ्गमन्त्राणि सर्वतन्त्रेषु सूरिभिः ।
तत्तेजोऽस्येति तत्तेजे रता तेजोऽस्य तत्तनुः ॥

इति शिखामन्त्रार्थ इत्यर्थः ।

ज्ञात्वैव मङ्गमन्त्रार्थं - मङ्गन्यासङ्करोति यः ।
करप्रचेयास्तस्यार्थाः सोऽर्च्यते त्रिदशैरपि ॥

एवञ्च विरोधाद्यभावे सिद्धमङ्गुष्ठादावपि हृदयायनमः इत्याद्या मन्त्राः। एवमेव पुरश्चरणचन्द्रिकायां मन्त्ररत्नावल्याम् । अयञ्च विधिः सर्वकराङ्गन्याससाधारणः । तत्तन्मन्त्रेषु परं विशेषः ।

एवं कराङ्गन्यासौ विधाय मुद्रादिकञ्च दक्षिणाधोहस्तमारभ्य प्रादक्षिण्येन, मुद्रा-ज्ञानमुद्रा, दक्षिणतर्जन्यङ्गुष्ठयोरग्रयोरुपन्यासस्थानान्याह—

ललाटमुखवृत्ताक्षिश्रुतिघ्राणे च नेत्रयोः ।
ओष्ठदन्तोत्तमाङ्गास्ये दोःपत्स्यन्धस्तकेषु च ॥
पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेंऽशके ।
ककुद्य पैचकृत् पूर्वंपाणिपादयुगे ततः ॥

जठरानलयोर्मध्ये मातृकामे यथाक्रमम् । क्रमदीपिकामतेन हृदयादिषु अंशादिषु रेफादिन्यासः । भुजयोश्च सद्दोर्न्यासः, तथोक्तन्तत्र ।

केचित्त— दोःपदयुगोदरवक्त्रगतान् पुनरिति पाठः । तत्र चाविरोध एव ।

इत्यारचय्य वपुवर्णशतार्द्धकेन सार्द्धं क्षपेशसविसर्गकशोभयैस्तैः ।
विन्यस्य केशवपुरस्सरमूर्त्तियुक्तैः कीर्त्यादि शक्तिसहितैर्न्यसेत् क्रमेण ॥

केशवपुरस्सरेत्यादि विष्णुमन्त्रविषयम् ।

अत्र केवलानां वर्णानां सविसर्गाणाञ्च सृष्टिप्रकारेण विसर्गविन्दुसहितानां स्थितिप्रकारेण सविन्दूनां संहारक्रमेण विन्यासः स्थित्यादौ ध्यानेन विशेषश्च । तथा चोक्तम्—

न्यसेत्सर्गान्वितां सृष्ट्या ध्यात्वा देवीं यथाविधिः ।
सर्गविन्द्वन्तिकां न्यस्येत् टार्णाद्यां स्थितिवर्त्मना ॥

विद्यात्पूर्वोदितान्विद्वानृष्यादीनाङ्गसंयुतान् ।
ध्यायेद्वर्णेश्वरीमत्र वल्लभेन समन्विताम् ॥

सिन्दूरकान्तममिताभरणं त्रिनेत्रम्
विद्याक्षसूत्र - मृगपोतरसान्दधानम् ।
पार्श्वस्थितां भगवतीमपि काञ्चनाभाम्
ध्यायेत्कराब्जधृतपुस्तकवर्णमालाम् ॥

केवलवर्णन्यासोऽपि सृष्टिप्रकारेणैव, तत्र विशेषानभिधानेन औत्सर्गिकसृष्टिक्रमस्यैवान्वयात् । अकारमारभ्यानुक्रमेण क्षकारान्तवर्णन्यासश्च सृष्टिप्रकारः । स्थितिवर्त्मनेत्येव व्याचष्टे • टार्णाद्यामिति । तस्यायमर्थः-टकारमारभ्य क्षकारपर्यन्तं वर्णान्विन्यस्य अकारादि-ञकारान्तं विन्यसेदिति ।

विन्दुयुक्तामिमां न्यस्येत् संहृत्या प्रतिलोमतः ।
विद्यात्पूर्वोदितान्विद्वानृष्यादीनाङ्गसंयुतान् ॥
ध्येयावर्णमये पद्मे देवीवागवल्लभा शुभा ॥

अक्षस्रजं हरिणपोतमुदग्रटङ्कम
विद्याङ्करैव विरतं दधतीन्त्रिनेत्राम् ।
अर्धेन्दुमौलिमरुणामरविन्दुवासाम
वर्णेश्वरीं प्रभजतस्तनभारजस्राम् ॥

अत्रापि संहृत्येत्यस्य व्याख्या प्रतिलोमत इति । क्षकारमारभ्य अकारपर्यन्तं वर्णान्यस्य स्वस्वस्थाने । अतएव गोपालदशाक्षरे दश तथान्यासे तथैव व्यवस्थापयिष्यतीत्यर्थः । अपरे च मातृकान्यासप्रकारा विस्तरभयान्न लिखिताः ।

अथ प्रपञ्चयागः

प्रपञ्चयागं वक्ष्यामि सच्चिदानन्दसिद्धिदम् ।
वेदादिः वक्तिरजपा परमात्मा महामनुः ॥

वह्नेर्जायाऽत्र कथिताः पञ्चमन्त्राः शुभावहाः ।
तारशक्त्यादिकां न्यस्येदजपा ये द्विचान्तिकाम् ।।
मातृका सूक्ष्ममार्गेण सृष्ट्या देहे विधानवित् ।
ऋषिर्ब्रह्मा समुदिष्टश्छन्दो गायत्रमीरितम् ।।
समस्तवस्तुसंव्याप्तं परं तेजोऽत्र देवता ।
स्वाहाद्यैः पञ्चमनुभिः पञ्चाङ्गानि प्रकल्पयेत् ।
अस्त्रन्दिक्षु बुधः कुर्याद्भूयो हरिहराक्षरैः ।।

वेदादिः— ओङ्कारः । अजपा - हंसः । परमात्मासोहं हंसः क्रीं ओमेभिर्मन्त्रैर्यथाक्रमं हृदयं शिरः शिखाकवचनेत्राणि कुर्यात् ।

ध्यानमाह—

तारादिपञ्चमनुभिः परिचीयमानं मानैकगम्यमनिशं जगदेकमूलम् ।
सम्बित्समस्तगमनं पुरमच्युतन्तत्तेजः परं भजत सार्द्धसुधाम्बुराशिम् ।।

पञ्चभूतमया वर्णा बहुशः प्रागुदीरिताः ।
तस्माज्ज्ञानेन्द्रियात्मानः प्रपञ्चन्तन्मयं विदुः ।।
देहोऽपि तादृशस्तस्मिन्न्यस्य वर्णान्विलोमतः ।
तत्तस्थानयुतान्मन्त्रान् जुहुयात्पर - तेजसि ।।
एवं वर्णमयं होमं कृत्वा दिव्यतनुर्भवेत् ।।

तस्मादिति - तस्मादज्ञा न्द्रियाणि पञ्च श्रोत्रादीनि तदात्मानः तेषां भूतरूपत्वात् । अपरमपि प्रपञ्चं तन्मयं भूतमयं विदुरित्यर्थः । अत्र परतेजसि तत्तत्स्थानयुतान् जुहोमीति बुद्ध्या व्युत्क्रमेण वर्णन्यास एव होम इत्येके । व्युत्क्रमेण वर्णन्यासं विधायस्कं स्वाहा लंस्वाहेत्यादि मन्त्रैः तत्तत्स्थानयुतवर्णानां परतेजसि होम इत्यपरे ।

पवनसंयमनन्त्वमुना चरेद्यमिह जप्तुमसौ मनुमिच्छति ।
अथवाऽखिलेषु हरिमन्त्रजपविधिषु मूलमन्त्रतः ।
संयमनविधिर्मरुतो विधानाभ्यसंश्चरत तत्त्वसंख्यया ।।

तत्त्वानि द्वात्रिंशत्, इयञ्च शक्त्या प्राणायामस्य। ननु तदुपयुक्त॰ जपस्य। मूलमन्त्रस्तद्वीजम्, उपास्यमन्त्रस्य पृथगेवाभिधानादिति न युक्तः पक्षः।

अथवाऽङ्गजन्ममनुनाऽऽसु संयमं सकलेषु कृष्टमनुजापकर्ममित्यादिना वीजस्याप्यग्रिमश्लोकेऽभिधानात्। तस्मान्मूलमन्त्रोऽष्टाक्षरगोपालमन्त्रः क्रमदीपिकायां तस्यैव मूलमन्त्रत्वेनोक्तत्वात्, दशाक्षरो वा।

अथवा साधकः कुर्यात्प्रणवेनाशु संयमम्।
स्त्रीभिः शूद्रैश्च कर्त्तव्यो लौकिकेनाशु संयमः।
त्रिषड् द्वादशवारं वा पुरतः परतो जपात्॥

पुरतः परतश्चेत्यर्थः।

षोड़श इहचरेद्दिनशः परिपूयते स खलु मासतोऽघंशः।
शुचिः प्राणायामान् प्रणव सहितान्षोडशवशी
प्रभाते सायञ्च प्रतिदिवसमेनं वितनुते।
नरो यस्तंभ्रूण - प्रहणनकृतांरेभि - कलितम्।
पुनर्याति मासादिह दुरितहात्मौघदहनात्॥

ध्यायन्त्यमीषड्भिरपीह मासैर्जन्मान्तरोपार्जितपापपुञ्जात्।
सम्वत्सराद् ब्रह्मपदं तदेकं प्रकाशयेन्त्येव मदच्युताभ्याम्॥

प्रभाते सायञ्चेत्यत्र फलभूम्ना षोडश इहचरेदिति वचनाविरोधः। पण॰ वस्य च प्राणायामेषु साहित्यं जप्यमानतया।

अंशत्रयात्मकः सोऽयं कुम्भपूरकरेचकैः।
जपध्यानादिभिर्युक्तं सगर्भन्तं विदुर्बुधाः॥
उदपेतं विगर्भन्तु प्राणायामं परे जगुः॥

तत्स्वरूपमाह—

इड़या कर्षयेद्वाह्यं वाह्यं षोडशमात्रया।
धारयेत्पूरितं मन्त्री चतुःषष्ट्या तु मात्रया॥

सुषुम्ना मध्यमं सम्यग्द्वात्रिंशन्मात्रया शनैः ॥
नाड्या पिङ्गलया चैनं रेचयेद्योगवित्तमः ॥
प्राणायाममिमं प्राहुर्योग - शास्त्रविशारदाः ।
भूयो भूयः क्रमात्तस्य व्यत्यासेन समाचरेत् ॥
मात्रावृद्धिक्रमेणैव सम्यग्द्वादश षोडश ॥

इड़येति- पिङ्गलयेति च प्रथमप्राणायामाभिप्रायेणोक्तम । द्वितीयप्राणायामेऽपि पिङ्गलयैव पूरणात् । भूयोभूयः क्रमात्तस्य व्यत्यासेन समाचरेदिति येनैव संत्यजेत्तेन पूरयेदिति चाभिधानात् । यया नाड्या पूरणं तदन्यया रेचनमिति सकलप्राणायामानुगतम् । षोडशमात्रयेत्याद्युपलक्षणम् । मात्रावृद्धिक्रमेणैवेत्यनेन मात्रान्तरेणापि पूरणादेरभिधानात् ।

मात्रा च —नलिनीपत्रसंहत्यां सूक्ष्मसूच्यग्रभेदने ।
दले दलेषु यः कालः स कालो लववाचकः ॥
लवैः त्रुटिश्च त्रिशद्भिः कलां तावत्त्रुटिंविदुः ।
काष्ठा तावत्कला ज्ञेया तावत्कोष्ठानि मेषकः ॥
सोङ्गुलीस्फोटतुल्यः स्यात् मात्रास्तैरष्टभिः स्मृताः ।
कालेन यावता स्वीयो हस्तः स्व जानुमण्डलम् ॥

मार्कण्डेयपुराणे तु निमेषोन्मेषणे मात्राकाल उक्तम् । रेचयेन्मारुतं दक्षयेत्यादि—वक्ष्यमाणाक्रमदीपिकावचने तु सगर्भप्राणायामप्रकरणोक्तेनायं मात्राशब्दार्थः, तत्तावन्मन्त्रजपस्थलेषु तावन्मात्रानियमाभावात् । किन्तु तत्र मात्राशब्देन कालोपाधिमात्रमुच्यते । ननु तद्विशेषः ।

तथा च येनोपाधिना पूरककालस्य षोडशपरिमितत्वं तेनैव चतुःषष्टित्वद्वात्रिंशत्वे कुम्भकरेचककालयोरपि । एतावता पूरकचतुर्गुणकालेन कुम्भकस्तदर्द्धेन तु रेचक इति पर्यवसितेऽर्थेऽष्टाविंशतिसंख्यमिष्टफलदमिति । प्रथमश्लोके रेचकमात्रस्य कुम्भकमात्रस्य वाऽष्टाविंशत्यादिजपसंख्या प्राप्तौ तदितरद्वये कालद्वैगुण्यादिकं प्रतिपादितमिति मार्कण्डेयपुराणादिवचनान्तप्रकरणोक्ता गर्भमात्रप्राणायाममात्रापरतया तेनाविरोधः ।

अस्तु वा क्रमदीपिका वचनमपि प्रसङ्गाद् गर्भमात्रविषयमिति ।

अष्टाविंशतिसंख्यमिष्टफलदं मन्त्रं दशार्णं जपन्
नायच्छेत्पवनं सुसंसितमतिस्त्वष्टादशार्णेन चेत् ।
अभ्यस्यात्र विचारमन्यमनुभिर्वर्णानुरूपं जपन्
कुर्याद्रेचकपूर्वकर्मणि पुनः प्राणप्रयोगान्नरः ॥

इयमष्टाविंशत्यादिससंख्या रेचके । पूरककुम्भयोस्तदनुसारेणोहनीया । तदभिप्रायकमेतदुक्तम् , कुर्याद्रेचकपूर्वकर्मणि पुनः प्राणप्रयोगान्नर इति केचित् । तन्नाति मनोरमम् । एकवर्णेन प्राणायामे द्वात्रिंशतो रेचकजपसंख्यात्वे दशाक्षरेणाष्टाविंशतेस्तथात्वानौचित्यादशक्यत्वाच्च ।

यत्तु पूरकादीनां त्रयाणामष्टाविंशतिः संख्या । तथा हि - चतुर्भिः पूरकः , षोडशभिः कुम्भकः , अष्टाभिः रेचक इति । तदसत । अभ्यस्य प्रतिवारमित्यत्र तथात्वासम्भवेन वक्तव्यप्रकारस्यैवानुसरणीयत्वात् ।

तस्मादत्र मनुः - निपुणोऽविचारं जपन् रेचकपूर्वकर्मकुम्भकाख्यं कुर्यात् । स्वनैपुण्येन तु रेचकपूरकयोः संख्योहनीया । प्राणप्रयोगोऽत्र प्राणस्य प्रकृष्टं योगं पूरकेन विधायेत्यर्थः ।

यद्वा अस्यमनुभिर्वर्णानुरूपं जपन् प्राणप्रयोगान् कुर्यादित्यन्वयः । इयञ्च संख्या शक्तस्य । अशक्तौ तु-यया कयापि पूरणं तच्चतुर्गुणया धारणम् । तदर्द्धया रेचनमित्युक्तप्रायमिति । केचन

रेचयेन्मारुतं दक्षया दक्षिणः पूरयेद्वामया मध्यनाड्या पुनः
धारयेदीरितं रेचकादित्रयंस्यात्कलादण्ड विद्याख्यमात्रात्मकमिति ।

क्रमदीपिकावचःप्रमाणयन्तो रेचकं विधाय पूरककुम्भकौ कुर्वन्ति । तन्न सम्यगाभाति । नहि तत्र पाठिकक्रमे तात्पर्यम् । पूरकं विना रेचनीयाभावेन रेचकासम्भवात् ।

न च शारीरस्यैव समीरस्य रेचनमिति युक्तम् । इडया कर्षयेद्वाह्यं वाह्यं षोडशमात्रयेत्यादिलिखितशारदावचने वाह्यवायोरेव धारणरेचनयोरपि कर्मत्वेनावगमात् ।

किञ्च प्राणायाममिमं प्राहुरिति वाक्येन पूरकादिक्रमवत् कर्मत्रयस्यैव प्राणायामपदवाच्यत्वमवसीयते। नच तस्य नानार्थता, एकार्थतयैवोपपत्तेर्वक्ष्यमाणत्वात्। अपि च रेचकस्य प्राथम्ये द्वितीयप्राणायामे प्रथमतो वामनाड्या रेचनम्, ततो दक्षिणया पूरणम्। एवं तृतीयादिष्वपि तथाभावेन।

येनैव रेचयेत्तेन पूरयेद्धारयेत्ततः।
रेचयेच्च ततोऽन्येन शनैरेवं पुनः पुनः॥

इत्यादि वचनविरोधः स्यात्। वाक्यान्तरानुरोधे च सर्वप्राणायामेषु क्रमदीपिकावचनेन दक्षिणादि नाडीभिरेव रेचनादि स्यात्।

किञ्च रेचकस्य प्राथम्येऽन्ते प्राणायामे कुम्भितपवनस्य रेचनाकाङ्क्षा न निवर्त्तते। न च रेचकस्य प्राथम्ये रेचकादीनादिपदार्थानन्वयः। तत्र वाक्ये रेचकस्यैव प्रथमाभिधानेन तदन्वयात्। तस्मात्पूरकादि एव क्रमः। तद्वचनन्तु प्रथमप्राणायामे नाड़ीविशेषविधायकं मात्राविशेषविधायकञ्च। नतु क्रमतात्पर्यकम्, बहुतरवचनविरोधात्। नचैवं क्रमाप्राप्तौ ग्रन्थस्य क्रमदीपिकात्वव्याघातः। कुर्याद्रेचकपूर्वकर्मणि पुनः प्राणप्रयोगान्नर इत्यनेनैव क्रमप्रतिपादनादिति युक्तम्।

प्राणायामान् विधायेत्यथ निजवपुषा कल्पयेद्योगपीठम्
न्यस्येदाधारशक्तिप्रकृतिकमठे शेषक्ष्माक्षीरसिन्धून्।
श्वेतद्वीपः पञ्चरत्नोऽवलमहतिमा मण्डपङ्कल्पवृक्षम्
हृद्देशेऽशद्वयोरुद्वयवदनकटी पार्श्वयुग्मेषु भूयः॥
धर्माद्यधर्मादि च पादगात्रचतुष्टये हृद्यथ शेषमब्जम्।
सूर्येन्दुवह्नीन् प्रणवांशयुक्तान् स्वाद्यक्षरैस्सत्त्वरजस्तमांसि॥
आत्मादित्रयमादिबीजसहितं व्योमाग्निमायालवैः
ज्ञानात्मानमथाष्टदिक्षु परितो मध्ये च शक्तीर्नव।
न्यस्त्वापीठमनुञ्च तत्र विधिवत्तत्कर्णिकामध्यगम्
सान्द्रानन्दचितिप्रकाशममृतं सञ्चिन्तयेद्धाम तत्॥

आधारशक्तिप्रकृत्योर्द्वन्द्वः। धर्मादि – धर्मज्ञानवैराग्यैश्वर्याणि।

धर्मादि - अधर्माज्ञानावैराग्यानैश्वर्याणि । शेषमब्जमिति, अनन्त पद्मे न्यसनीयेत्यर्थः । सूर्यादिन्यासश्च - अं सूर्यमण्डलायनम इत्येवं विधीयत इति सम्प्रदायसिद्धम् ।

वह्निमन्त्रादौ स्वमण्डलान्तं प्रयजेत्पीठं स नवशक्तिकमित्यादौ स्वमण्डलान्तमित्याद्यपि तु तत एव सङ्गच्छते । प्रणवांशाः अकारोकारमकाराः क्रमेण तत्र येऽन्वीयन्ते । आदिबीजमोङ्कारः । अकारोकारमकाररूपबीजानीत्येके । तेषामाद्यक्षराण्येव बीजानीत्यपरे । केषाञ्चिमतेन - अंशोरुषु प्रादक्षिण्येन धर्मादिचतुष्कस्य मुखवामपार्श्वदक्षिणपार्श्वेषु धर्मादिचतुष्कस्य च न्यासः । तदुक्तम्—

अंशोरुयुग्मयोर्विद्वान् प्रादक्षिण्येन देशिकः ।
मुखपार्श्वनाभिपार्श्वे स्वधर्मादीनि विन्यसेत् ॥

इति कल्पवृक्षस्याधो रत्नवेदिकाऽपि न्यसनीया । अधस्तात्पूजयेत्तेषां वेदिकां मण्डलोज्वलाम् । इति वचनात्तस्यास्तत्र पूज्यत्वे आधारशक्त्यादितुल्यन्यायेन तन्न्यासस्य युक्तत्वात् ।

पद्मन्यासस्तु—

आनन्दकन्दं प्रथममस्मिन्नालमनन्तरम् ।
सर्वतत्त्वात्मकं पद्ममभ्यर्च्य तदनन्तरम् ॥
मन्त्री प्रकृतिपत्राणि विकारमयकेशरान् ।
पञ्चाश दूर्णबीजाढ्यां कर्णिकां प्रयजेदिति ॥

शारदायां पूजाप्रकरणेऽभिहितत्वादत्रापि तुल्यन्यायतया तथैव विधेयः । आधारशक्त्यादीनां ध्यानादिकमग्रे वक्ष्यते । शारदायाम्—

अनन्तंहृदये पद्ममस्मिन्सूर्येन्दुपावकान् ।
एषु स्वस्वकलान्न्यस्येन्नामाद्यक्षरपूर्विकाः ॥
तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ।
सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा ॥

एताः—सूर्यस्य ।

अमृता मानदा पूषा तुष्टी पुष्टी रतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्नाख्यः प्रीतिरङ्गदा ॥
पूर्णा पूर्णामृताकामदायिन्यः शीतदीधिते । इति ।
अथ- धूमार्चिरुष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी ।
सुश्री: स्वरूपा कपिला हव्यकव्यवहे अपि ॥

एताश्च वह्नेः । तं तपिन्यै नमः , एवं स्वस्वाद्यक्षरैः प्रत्येकं न्यसेत् । तं तपिन्यादि - सूर्यकलाभ्यो नमः , एवं समुदायेनापि न्यासमिच्छन्ति । शारदायां ऋष्यादिन्यासानन्तरमेव पीठन्यास उक्तः ।

ततश्चोपास्य मन्त्रस्य न्यासानृष्यादिकान् चरेत् ।
मन्त्रशास्त्रे तथा चोक्तं प्राप्तमन्त्रेण धीमता ॥
यस्य मन्त्रस्य ये न्यासाः कर्त्तव्याः सिद्धिमिच्छता ।
जपतर्पणहोमार्चाः सिद्धमन्त्रकृता अपि ॥
अङ्गन्यासादिभिर्हीना न दास्यन्ति फलान्यमी ॥
न्यासान्समस्तान्यसतः स्वदेहे त्रैलोक्यमेतद्वशमेति पुंसः ।
पापानि सद्यः प्रशमं प्रयान्ति त्रस्यन्ति भूतानि सपन्नगारिः ॥
आदौ ऋष्यादिविन्यासः कराङ्गन्यसनन्ततः ।
ततो यद्यत्करन्यासः पदन्यासस्ततः परम् ॥

यदीति पदन्यासेप्यनुषज्यते । अयञ्च क्रम औत्सर्गिकः , कल्पोक्तक्रमेण क्वचिद्बाधते । चन्द्रिकायाम्—

ततः कल्पविशेषोक्ता न्यासानन्यान् समाचरेत् ।
ततो मन्त्रपुटे वर्णे मातृकायाः सबिन्दुकैः ॥
विन्यसेन्मन्त्रवित्सम्यक् शास्त्रदृष्टेन वर्त्मना ।
ऋषिपाण्यङ्गविन्यासस्ततो मुद्राः प्रदर्शयेत् ॥
ध्यानं कुर्यात्ततो विद्वान् तत्तत्कल्पोक्तकर्मणा ॥

ऋषीत्युपलक्षणम् । तेन ऋषिच्छन्दोदेवतानां न्यासः । क्रमदीपिकायान्तु –

अङ्गन्यासं विधाय ऋष्यादिन्यास उक्तः । मुद्रास्तु—नारायणादीनां शंखाद्याः । ध्यानस्वरूपन्तु –

ध्यानमात्मनि देवस्य मननावेदनं मतम् ।
यज्जीवब्रह्मणोरैक्ये सोऽहं स्यादिति वेदनम् ॥
तन्निर्गुणं हृदम्भोजं कर्णिकाकेसरान्वितम् ।
स्वीयेष्टदेवतान्तत्र ध्यायेदागमबोधिताम् ॥
एवं यद्वेदनं तत्तु सगुणं ध्यानमुच्यते ॥
इति ध्यात्वात्मानं पटुविशदधीर्नन्दतनयम्
पुरो बुद्ध्यैर्वालाप्रभृतिभिरनिन्द्यापकृतिभिः ।
यजेद्भूयो भक्त्या सुरगुषि वहिष्ठैश्च विभवैः
विधानञ्च ब्रूमो वयमतुलसान्निध्यहृदयम् ॥

नन्दतनयमिति प्रकृताभिप्रायेण ।

आत्माग्रतश्चतुष्कोणं षड्स्रञ्च त्रिकोणकम् ।
सामान्यार्घजलेनैव कृत्वाङ्गानि प्रपूजयेत् ॥
आग्नेयादिषु कोणेषु हृदाद्यङ्गञ्चतुष्टयम् ।
नेत्रमग्रे दिक्षु चास्त्रन्तत्र मूलेन क्षालिताम् ॥
त्रिपादिकां प्रतिष्ठाप्य क्षालयेच्छङ्खमस्त्रतः ।
साधारं स्थापयेद्विद्वान्वामतो वह्निमण्डले ॥

तत्र गन्धसुमनोक्षतान्यथा निःक्षिपेद्धृदयमन्त्रमुच्चरन् । बहुवचनमत्राद्यर्थे । तेन गन्धादीनामपि प्राप्तिः । तानि च—

गन्धपुष्पाक्षतयवाकुशाग्रतिलसर्षपैः ।
सदूर्वैः सर्वदेवानामर्घोयं परिकीर्तितः ॥

इत्युक्तानि । पूरयेद्विमलपायसा सुधीरक्षरैः शिरोन्तकैः । पूरणमिदं शंखस्य ।

अक्षरैर्मातृकायाः प्रतिगतैर्दिक्सोमस्थितैः । शिरोन्तकैः—रकारान्तैः । सबिन्दुकैरित्यर्थः । क्वचिन्मातृकान्ते मूलस्यापि पाठ उक्तः ।

तत्र तीर्थमनुनाऽभिवाहयेत्तीर्थमुष्णरुचिमन्त्रणात्ततः ।
स्वीयहृत्कमलतो हविस्तथा गामिनीञ्च शिखया प्रदर्शयेत् ।
तज्जलं नयनमन्त्रवीक्षितं धर्मणा समवगुण्ठनादियुक्ता
मूलमन्त्रसकलीकृतं न्यसेदङ्गकैश्च कलयेद्दिशोस्ततः ॥

तत्र जले न्यसेदङ्गकैः तत्रेति शेषः ।

तीर्थावाहनमङ्कुशमुद्रया— तीर्थमावाहयेद्विद्वान् मुद्रयाऽङ्कुशसंज्ञयेति वचनात् । तीर्थमन्त्रश्च दर्शितः प्राक् ।

मूलमन्त्रसकलीकृतं तदभिमन्त्रितमित्यर्थः । अयञ्चार्थः शारदासम्वादो मूलमन्त्रं जपेत् । स्पृष्ट्वा न्यसेत्तस्याङ्गमङ्गविदिति तत आक्षिपेत् । सकलीकरणात्प्राक् धेनुमुद्रयाऽमृतीकरणम् । तथा चोक्तम् —

अमृतीकरणङ्कृत्वा चिन्तयेदिष्टदेवताम् ।
अङ्गन्यासेन सकलीकृत्यास्त्रेण दिशो दश ॥

कलयेदिति । गन्धपुष्पादिभिस्तत्र पूजयेदिष्टदेवताम् । अक्षतादियुतमच्युतीकृतं संस्पृशन् जपतु नित्यमिष्टशः । जलस्पर्शश्च - मत्स्यमुद्रयाऽच्छाद्य । तदुक्तम्—

अष्टकृत्वो जपेन्मूलमाच्छाद्य मत्स्यमुद्रया ।
दक्षिणे प्रोक्षिणीपात्रमाधायाद्भिः प्रपूरयेत् ॥
किञ्चित्कुर्याद्य सङ्गृह्य प्रोक्षण्यम्भसि योजयेत् ।
प्रोक्षिणीपात्रतोयेन तेनात्मानं त्रिवारतः ॥
प्रोक्ष्य पुष्पादिकञ्चापि मूलेन प्रोक्षयेत्सुधीः ।
दक्षिणेऽर्घे प्रोक्षणञ्च करेणैव न तु कुशैः ॥

प्रोक्षयेन्निजतत्त्वम् । ततोऽमुना--

पाद्यस्याचमनीयस्य मधुपर्कस्य चार्घ्यथ ।
पात्राण्याधारयुक्तानि स्वर्णादिरचितानि च ॥
स्थापयेत्पुरतस्तानि पूरयेच्छास्त्रवर्त्मना ।
पाद्यादिपात्राणि चार्घस्योत्तरोत्तरतः क्रमात् ॥

शास्त्रोक्तवर्त्माह—

पाद्यं श्यामाकदूर्वाब्जविष्णुक्रान्ताजलैः स्मृतम् ।
जातीलवङ्गकङ्कोल • जलैराचमनीयकम् ॥
आज्यन्दधि मधून्मिश्रं मधुपर्क-समीरितः ।
तेनैव मनुना कुर्यादद्भिराचमनीयकम् ॥
एकस्मिन्नथ वा पात्रे पाद्यादीनि प्रकल्पयेत् ।
सर्वोपचारवस्तूनामभावे भावयेद्धिया ॥

सर्वोपचारेति - य उपचारो न सम्पद्यते तं मनसा कल्पयेत्, सर्वत्रैवमित्यर्थः । अथ मूर्द्धनि मूलचक्रमध्ये निजनाथं गणनायकं समर्च्य न्यसनक्रमतश्च पीठमन्त्रैर्जलगन्धाक्षतपुष्पधूपदीपैः प्रयजेदथ मूलमन्त्रं तेजोऽसीति, ओमाधार-शक्तये नम इत्यादिभिः ।

एतच्च प्रस्तुतगोपालविषयमन्त्रम् । तदन्यत्र तत्तन्मन्त्रबीजेनैव विभूत्यादिन्यासो गोपालमन्त्रे, तस्य पूजा चाङ्गपूजा च सर्वत्र ।

ततस्सम्पूजयेद्देव गन्धाद्यैर्मूलमुच्चरन् ।
पञ्चकृत्वः पुनः कृत्वा पुष्पाञ्जलिमनन्यधीः ॥
उत्तमाङ्ग - हृदाधार - पादसर्वाङ्गके क्रमात् ॥

क्रमदीपिकायान्तु—

पुष्पाञ्जलिम्वितनुयादथ पञ्चकृत्वो मूलेन पादयुगले तुलसीदलेन ।
मध्येहृयारि युगलेनच मूर्ध्नि पद्मद्वन्द्वेन षड्भिरपि सर्वतनौ च सर्वैः ॥

श्वेतानि दक्षभागे सितचन्दपङ्किलानि कुसुमानि ।
रक्तानि वामभागेऽरुणचन्दनपङ्कसिक्तानि ॥

हयारिः— करवीरम् । रक्तानि - श्वेतातिरिक्तानीत्यर्थः , अन्यथा तुलस्यां तदन्वयानुपपत्तेः । तदेवं शारदाक्रमदीपिकोक्तपक्षयोर्विकल्प एव मन्त्रविशेषविषयतया वा क्रमदीपिकाव्याख्यातव्येति । तद्वच्च धूपदीपौ निवेद्य धिनुयात् ।

सुखवासाद्यन्दत्वा समर्च्चयेद् गन्धपुष्पाद्यैः ।
ताम्बूलगीतनर्त्तनवाद्यैस्सन्तोष्य चुल्लूकसलिलेन ॥
ब्रह्मार्पणाख्य मनुना कुर्याद्ब्रह्मार्पणं मन्त्री ॥

सुधारसैः — ललाटचन्द्रस्रुतैः , कृष्टमिति प्रकृताभिप्रायम् । ब्रह्मार्पणमन्त्रो वाह्यपूजायां वक्ष्यते । अत्र पूजायां नैवेद्यदानं नास्ति ।

विना नैवेद्यगन्धाद्यैरुपचारैः प्रपूजयेत् ।
गुरूपदिष्टविधिना शेषमन्यत्समापयेत् ॥

इति वचनात् । शेषम्—गोपालादिमन्त्रेषु विभूत्यादिपूजादिः । सर्वमेतत्प्रयुञ्जीत प्रोक्षणीस्थेन वारिणेति ।

सुप्रसन्नमथ नन्दतनूजं भावयन् जपतु मन्त्रमनल्पम् ।
सानुसंस्मृतियथाविधिसंख्यापूरणे स्वयमलं विदधीत ॥
प्रणवपुटितं वीजं जप्त्वा शतं सविनाष्टकम्
निजगुरुमुखादाप्तान् योगान् युनक्तु महामतिः ॥

सदमृतचिदानन्दात्माथो जपञ्च समर्पयेदिति जपविधिः । सम्यक्प्रोक्तो मनुद्धितयाश्रितः । जपञ्च समापयेदित्युपसंहारे एवं जप समापयेदित्यर्थः । अथो इति वीजं जपापेक्षानन्तर्यानुकम् युनक्तु इत्यनेन सम्बद्ध्यते । क्वचिज्जपञ्च समर्पयेदिति पाठः । तत्रार्थः सुव्यक्त एव—

जप्त्वा समर्पणङ्कुर्याद्दक्षिणे देवता करे ।

गुह्यातिगुह्य गोप्त्रीत्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे मातस्त्वत्प्रसादात्सुरेश्वरि ॥

इति जपसमर्पणमन्त्रः। अभीष्टदेवतायाः पुंस्त्वे पुल्लिङ्गोहः कर्त्तव्यः। देवतात्वेन तस्य सम्बोध्यत्वेन स्त्रीलिङ्गोपपत्तिरिति कैश्चिदुच्यते, तदयुक्तम्। तस्यानुपस्थितेः। विसृज्य तोयं प्रोक्षण्याः पूरयेत्तां यथा पुरा, इति।

अथ वायुपूजा

तत्र पूजाधारः—

शस्तं निर्जैवयेन तथैव चक्रे चित्रे पटे वा यजनं न भूमौ।
मोहादसौ स्थण्डिलगां यजेच्चेच्छज्ये त्रिवर्गादपि सिद्धमन्त्रः॥
शालग्रामे मणौ यन्त्रे मण्डले प्रतिमासु च।
नित्यं पूजा हरेः कार्या केवले भूतले न तु॥

भूमिनिषेधः मण्डलादिरहितभूमिपरः। पीठं श्रीखण्डादिनिर्मितं ज्ञेयम्।

यदुक्तम्— रत्नैर्विरचिता रम्याः सौवर्णा राजतास्तथा।
श्रीखण्ड-रक्तश्रीखण्ड-श्रीपर्णीवृक्षसम्भवाः॥
फलकाः पुण्यवृक्षोत्थाः स्वर्णादिसदृशाः फलैः।
आदौ लिखेद्यन्त्रराजन्तत्तत्कल्पोक्तलक्षणम्॥
सौवर्णे राजते ताम्रे पीठे भूर्ज्जे पटे भुवि।
विना यन्त्रेण चेत्पूजा देवता न प्रसीदति॥

कल्पोक्तयन्त्राभावे भूपुरावृत्तं चतुर्द्वारमष्टदलं लिखेत्। एकत्रैव यन्त्रेऽङ्गप्रधानतया पञ्चायतनदीक्षापक्षे पञ्चदेवताः पूजयन्ति। तत्र दिङ्नयामकं पठन्ति—

शक्तौ मध्यगते हरीन् हरभू देव्योहरौ शङ्करे।
भास्येनागसुता रवौ गणपती शाक्ताम्बिकास्थापिता॥
देव्यां विष्णुहरैकदन्तवरयो गौरीसुते शङ्करे।
नार्या विष्णव एव शङ्करदिशो व्यत्यासतो हानिदाः॥

अस्यायमर्थः— विष्णुशिवदुर्गागणेशसूर्याणाम्मध्ये या इष्टदेवता सा मध्ये पूजनीया। तदितरचतुष्टयम्-कोणचतुष्टये। तत्र शक्तौ मध्यगते, ईशानादि-

कोणचतुष्टये - विष्णुसूर्यगणेशदुर्गाः पूजनीयाः । विष्णौ मध्यगते - शिवगणेश सूर्यदुर्गाः पूजनीयाः । रवौ मध्यगते - विष्णुगणेशशिवदुर्गाः । इदमुपलक्षणम् । देवीपदस्य सामान्यदेवीपरत्वात् ।

न च - सामान्यपरत्वे अन्यदेव्या अपि कोणे पूजापत्तिः । सर्वत्र देवीपदस्य उपलक्षणपरत्वाल्लाघवादिति वाच्यम् । पञ्चदेवतान्तर्भूतदेवताया एव कोणेषु नियमः । अन्यदेव्यास्तदनन्तर्भूतत्वात् । देव्यामित्यत्र दुर्गामात्रपरत्वे बीजाभावात् ।

अतएवानेनापि मन्त्रान्तरादौ कोणेषु विष्ण्वादिपूजोक्ता । दुर्गायां मध्यगतायां विष्णुशिवगणेशसूर्याः । गणेशे मध्यगते - शिवसूर्यदुर्गाविष्णव एव ईशानादि कोणेषु पूजनीया इति ।

वायव्यादीशानपर्यन्तमर्च्या पीठस्योद्गौरवीपङ्क्तिमादौ ।
पूज्योऽन्यत्राप्याम्बिकेयः कराब्जैः पाशं दण्डं श्रृण्यभीतिदधानः ॥
आराध्याधारशक्त्याद्यमरचरणपारध्यथो मध्यभागे
धर्मादीन्वह्निरक्षःपवनशिवगतान् दिक्षु धर्मादिकांश्च ।
मध्ये शेषाब्जतेजस्त्रितयमथ गुणात्मव्रजं केशराणाम्
मध्ये मध्ये च शक्तीर्नव समभियजेत्पीठमन्त्रेण भूयः ॥

गुरुपङ्क्तिर्गुरुपरापरगुरवः ।

शेषाब्जेति पीठन्यासप्रकरणस्थवचनवद् गुणात्मनः शेषः ।

अधः कूर्मशिलारूढां शरच्चन्द्रनिभप्रभाम् ।
आधारशक्तिं प्रयजेत्पङ्कजद्वयधारिणीम् ॥
मूर्ध्नि तस्यास्समासीनं कूर्मं नीलाभ्रमर्च्चयेत् ।
पुनः कूर्मः कमटरूपः शुक्लवर्णोधराधरः ॥
ऊर्ध्वम्ब्रह्मशिलासीनमनन्तं कुन्दसन्निभम् ।
यजेच्चक्रधरं मूर्ध्नि धारयन्तं वसुन्धराम् ॥
तमालश्यामलास्तत्र नीलेन्दीवरधारिणीम् ।
अभ्यर्च्चयेद्वसुमतीं स्फुरत्सागरमेखलाम् ॥

रक्तश्यामहरिद्रेन्द्र - नीलाभापादरूपिणः ।
वृषकेसरिभूतेभरूपाद्धर्मादिकान् यजेत् ॥
गात्रेषु पूजयेत्तांस्तु अपूर्वानुक्तलक्षणान् ।
आग्नेयादिषु कोणेषु दिक्षु चार्थाम्बुजं यजेत् ॥
आनन्दकन्दं प्रथममस्मिन्नालमनन्तरम् ।
सर्वतत्त्वात्मकं पद्ममभ्यर्च्य तदनन्तरम् ॥
मन्त्री प्रकृतिपत्राणि विकारमयकेशरान् ।
पञ्चाशद्वर्णवीजाढ्यां कर्णिकां प्रयजेत्ततः ॥

पादरूपिणः—पीठस्य । एवं गात्रेष्वित्यत्रापि उक्तलक्षणामिति । धर्मादिव्यक्तैर्लक्षणैर्यथाक्रमं युक्तानीत्यर्थः ।

सितरक्तासिताः प्रोक्ता गुणा पीठोपरिस्थिताः ।
श्वेता कृष्णा रक्ता पीता श्यामा नवोपमा शुक्ला ॥
अञ्जनजवासमाने तेजोरूपश्च शक्तयः ॥

पूजयेदित्यनुवृत्तौ पीठशक्तिः । केसरेषु मध्ये च सवराभयाः । एवं पीठं सम्पूज्य—

मूलेन मूर्त्तिं सङ्कल्प्य ध्यात्वा देवं यथाविधि ।
आवाह्य पूजयेत्तस्यां मन्त्री मन्त्रस्य देवताम् ॥

मूर्तिं सङ्कल्प्य पीठोपरि स्थापयित्वा कल्पेषु मूर्तिकल्पनमन्त्रानुक्तौ मूलेनैव मूर्तिकल्पनम् । आवाहनपूर्वं कल्पद्रुमच्छायास्थितां मूर्तिं ध्यात्वा मूलमुच्चार्यामुकमूर्त्तये नम इति मूर्तिं पूजयेत् । मूलेन मूर्त्तिमिष्ट्वाऽस्मिन् छायायाङ्कल्पशाखिनाम्, इति वचनात् । आवाहनप्रकारस्तूर्णायागे—

मूलाधारे स्फुरद्दीपशिखाकारां शिवां स्मरेत् ।

शारदायाम्—मूलमन्त्रं समुच्चार्य सुषुम्नावर्त्मना सुधीः ।
आनीय तेजः स्वस्थानान्नासिकारन्ध्रनिर्गतम् ॥
करस्थमातृकाम्भोजे चैतन्यं पुष्पसञ्चये ।
संयोज्य ब्रह्मरन्ध्रेण मूर्त्तिमावाहयेत्सुधीः ॥

पुष्पसञ्चये मातृकाम्भोजे इत्यभेदेन चिन्तितेनान्वयः। मातृकाम्भोज-स्वरूपन्तु—

व्योमेन्दौ रसनार्णकर्णिकमयां द्वन्द्वैः स्फुरत्केसरम्
पत्रान्तर्गतपञ्चवर्गयशसोर्णादि - त्रिवर्गक्रमात् ।
आशासु त्रिसुलान्तुलाङ्गलियुजा क्षोणीपुरेणावृतम्
पद्मङ्गलिपतमत्र पूजयतु तां वर्णात्मिकान्देवताम् ॥

एवमावाह्य—

संस्थापनं सन्निधानं सन्निबोधमनन्तरम् ।
सकलीकरणं पश्चाद्विदध्यादवगुण्ठनम् ॥
अमृतीकरणङ्कृत्वा कुर्वीत परमाकृतिम् ।
क्रमादेतानि कुर्वीत सुमुद्राभिस्समाहितः ॥

चन्द्रिकायाम्—सन्निधानानन्तर सम्मुखीकरणमप्यस्ति ।
देवन्ध्यात्वा तच्छरीरान्मदुष्टनिकरं वहिः ।
विनिःसृत्य स्थिरीभूतं परिवारं विचिन्तयेत् ॥

परिवारगणं स्वेस्वे स्थाने सम्यगुपवेशयेत् । परिवाराणां स्थानान्यावरणपूजायां विज्ञातव्यानि । आवाहनादिस्वरूपं सिद्धान्तसारे—

स्वत एवाभिपूर्णस्य तत्त्वस्यैवार्च्चनादिषु ।
सादरं संमुखीभाव आवाहनमितीरितम् ॥
शिवस्यावाहितस्यास्य विद्याद्देऽत्र सन्ततम् ।
स्थिरीकरणमुद्दिष्टं स्थापनं भक्तितोऽर्च्चने ॥
पूजां प्रयुज्यमानान्तु गृहीत्वाऽनुग्रहादिकम् ।
कर्त्तुं सामर्थ्यमस्येह तत्सान्निध्यं प्रचक्षते ॥
आसमाप्तेस्तु पूजायां सान्निध्यं हि शिवस्य यत् ।
स सन्निबोध उद्दिष्टो विभोरप्यस्य भक्तितः ॥
आनन्दायतनं तत्त्वं सच्चिदानन्दलक्षणम् ।

तदत्र सकले व्याप्तं ध्येयं स्यादवगुण्ठनम् ॥
अपि भिन्नस्वभावानां यदि भिन्नं प्रयोजनम् ।
अङ्गानामङ्गिना सार्द्धममृतीकरणं हि तत् ॥

क्षमा तस्यापराधानां विज्ञेया परमाकृतिः । सोमशम्भुनाप्युक्तम्—

सादरं सम्मुखीभाव आवाहनमिहोच्यते ।
तस्मान्निवेशनन्तत्र स्थापनङ्कथितम्बुधैः ॥
जगन्नाथोहमस्मीति यत्स्वीकारोपदर्शनम् ।
विभुत्वेऽपि तदीशस्य सन्निधानं न बाध्यते ॥
आकर्मकाण्डपर्यन्तं सन्निधिर्यो परिक्षयः ।
स शम्भोर्व्यापकत्वेऽपि निरोधः परिगीयते ॥
शिवस्यानन्दबीजस्य बोधानन्दमयस्य च ।
स्वभक्तेषु प्रकाशो यस्तद्भवेदवगुण्ठनम् ॥
सकलीकरणंकृत्वा मन्त्रैः षड्भिरथैकताम् ।
अङ्गानामङ्गिना सार्द्धं विदध्यादमृतीकृतिम् ॥
यथा वृक्षस्समर्थश्च मार्त्तण्डः सुमरीचिभिः ।
तद्वदङ्गैर्निजैर्देवो ध्यातव्यः परमेश्वरः ॥

सकलीकरणस्वरूपन्तु स्फुटतया न कथितमेवं स्वरूपमावाहनादिविधेयम् ।

अथोपचारान्कुर्वीत मन्त्रवित्तन्त्रदर्शितान् ।
प्रयोजयेदर्चनायामुपचारस्तु षोडश ॥
आसनं स्वागतं चार्घ्यं पाद्यमाचमनीयकम् ।
मधुपर्काचमनस्नानवसनाभरणानि च ॥
सुगन्धसुमनोधूपदीपनैवद्य - वन्दनम् ।
अर्घाद्याः पञ्च पञ्चैव गन्धाद्या इति ते दश ॥
गन्धादिभिर्निवेद्यान्ते पूजा पञ्चोपचारिकीम् ।

एवं पञ्चोपचारादौ ताम्बूलावश्यकताव्यवहारो भ्रमनिबन्धन एव ।
दुर्लभेषूपचारेषु यत्कर्त्तव्यन्तदाह—

उपचारेषु सर्वेषु यत्किञ्चिद्दुर्लभं भवेत् ।
तत्सर्वं मनसा ध्यात्वा पुष्पक्षेपेण कल्पयेत् ॥

असम्पद्यमानोपचीयतया पुष्पं भावयित्वा दद्यादित्यर्थः ।

तत्र तत्र जलन्दद्यादुपचारान्तरान्तरे ।
देवतायाः शिरः कुर्यात्कुसुमोपहितं सदा ॥
पूजाकाले देवताया नोपविश्रामयेत्करम् ।
उपचारविधिं चाथ वक्ष्ये दत्वा सदासनम् ॥
स्वागतं कुशलप्रश्नं निगदेदग्रतो गुरुः ।
पाद्यं पादाम्बुजे दद्याद्देवस्य हृदयासुना ॥
स्वधामन्त्रेण वदने दद्यादाचमनीयकम् ।
अर्घन्दिशेत्ततो मूर्ध्नि शिरोमन्त्रेण देशिकः ॥
स्वधाऽमुना ततः कुर्यान्मधुपर्कं मुखाम्बुजे ।
तेनैव मनुना कुर्याददि्भराचमनीयकम् ॥

अर्घादिस्वरूपमुक्तं प्राक् । यद्वा अर्घन्दत्वा पाद्यन्दातव्यम् । तथा चोक्तं क्रमदीपिकायाम्—

दत्वाऽसनं स्वागतमित्युदीर्य तथार्घपाद्याचमनीयकानि । देवानीत्यादि । आचमनीयञ्च वारत्रयन्देयम् ।

स्वधेत्याचमनीयञ्च त्रिवारं मुखपङ्कजे ।
मुकुटोपरि पुष्पञ्च वषडित्यर्पयेत्सुधीः ॥

इदञ्च पुष्पदानमत्रैवोक्तम् । वषडिति मन्त्रः । अर्घादिदानेष्वपि नमोन्ता एव मन्त्राः । तथोक्तन्तत्रैव—

नमस्स्वधा च स्वाहा च वषडिति यथाक्रमम् ।
हृत्पुरस्सरमुच्चार्य्य पाद्यादीनि प्रकल्पयेत् ॥

केचित् स्वधामन्त्रेण वदन इति वचने स्वधेति स्थाने स्वधेति पाठक्रमेण आचमनीयदाने वमिति मन्त्रस्यान्ते तेऽपि लिखिताभ्यां तूर्णं यागेवनाभ्यां सम्य-

गवरोधने नानुग्रहीतव्याः। प्रथमवचनेति शब्देन स्वरूपवाचिनासम्बन्धा-त्स्वधेत्येव हि पाठः। न तु स्वधेति मन्त्रस्य क्वाप्यदर्शनात्स्वेधेति पाठेऽपि तन्मतस्यासिद्धिरेव। द्वितीये च नम.स्वाहेत्यादि सन्निधानेनापि स्वधेत्येव पाठनिर्णयः।

गन्धादिभः कारयेत्स्नानं वाससी परिधापयेत् ।
दद्याद्दिव्योपवीतञ्च हाराद्याभरणैस्सह ॥
न्यासक्रमेण मनुना पुटितैर्मातृकाक्षरैः ।
अभ्यर्च्य देवं गन्धाद्यै रङ्गादीन्पूजयेत्ततः ॥

आदिपदेन गोपालकल्पाद्युक्तविभूत्यादिकं सङ्गृह्यते। अङ्गपूजा चेयं देवशरीरे आवरणे त्वङ्गपूजा केशवादावन्यैव। अतएवैतदभिधाय शारदायां धूपादिदानानन्तरमुक्तम्। अङ्गादिलोकपालान्तं यजेदावरणान्यपि, इति। क्रमदीपिकायामपि—

गात्रैः पवित्रैरथगन्धपुष्पैः पूर्वं यजेन्न्यासविधानतोऽस्य ।
सृष्टिस्थिती स्वाङ्गयुगञ्च वेणुं मालामभिज्ञानरपाप्ममुख्यौ ॥

इत्युक्तेर्मन्त्रान्तरेषु सृष्ट्यादि न्यासाभावेन तदर्चनाभावेऽपि अङ्गपूजा समुचितैवेति। अनन्तरमाचारान्मूलेन पुष्पाञ्जलित्रयेण पूजाम्विधाय प्रागिव पुष्पाञ्जलिपञ्चकं दद्यात्। तत आवरणपूजा—

केसरेष्वग्निकोणादि हृदयादि प्रपूजयेत् ।
नेत्रमग्रे दिक्षु चास्त्रं ध्यातव्या अङ्गदेवता ॥
तुषारस्फटिकश्यामनीलकृष्णारुणार्च्चिषः ।
वरदाभयधारिण्यः प्रधानतनवः स्त्रियः ॥
अग्नीशासुरवायूनां दिक्षु चत्वार्य्यनुक्रमात् ॥

सोमशम्भुवचनं शिवपूजाविषयम्। केसरेष्वति स्थानविशेषानुपदेश-कल्पेषु। तदुपदेशे तु तत्रैवाङ्गपूजा। अङ्गावरणप्राथम्यमप्येवमेव चतुर्थ्य-न्तमङ्गानां नामोक्त्वा नमोन्ततदङ्गमन्त्रेण— ओं हृदयायनमः, ओं शिरसे स्वाहा नमः, इत्यादि क्रमेण पूजेति केचित्।

केचित्तु — ओं हृदयाय नमः, ओं ह्रीं शिरसे स्वाहा नमः, इत्यादिक्रमेण षड्दीर्घमुक्तहकारेण पूजामाहुः । प्रधानतनव इति मुख्यदेवतायाः शरीरभूता इत्यर्थः ।

पश्चादभ्यर्चनीयाः स्युः कल्पोक्ता वृत्तयः क्रमात् ।
अन्ते यजेल्लोकपालान्मूल पारिषदान्वितान् ॥
हेति जात्यधिपोपेतान् दिक्षु पूर्वादिषु क्रमात् ।
इन्द्रमग्निं यमं रक्षो वरुणं पवनं विधुम् ॥
ईशानं पन्नगाधीशमध ऊर्ध्वं पितामहम् ॥

रक्षः निर्ऋतिमधोनिर्ऋतिवरुणयोर्मध्ये । ऊर्ध्वमीशानयोर्मध्ये । जात्यधिप इति भावप्रधानो निर्द्देशः । तेनाधिपत्वोपेतानित्यर्थः । तथा च सुराधिपतय इत्यादि विशेषणानि लभ्यन्ते । चन्द्रिकायाम्— पत्राधीश्वरवर्णास्त्रपरिवाराङ्गसंयुतान् । इन्द्रादीनर्चयेदित्युक्तम् । पत्रम् - वाहनम् ।

कनककपिशनीलश्यामलश्वेतधूम्रामलसितशुचिरक्ता वर्णतो वासराद्याः ।
करकमलविराजत्स्वायुधादिव्यवेशा विविधमणिगणस्रक्स्फूरद्भूषणाढ्याः ॥

ऐरावतस्तथा मेषो महिषः प्रेतसंज्ञकः ।
मकराख्यो मृगः पश्चात्तुरगो वृषभस्तथा ॥
कूर्मो हंसः क्रमादेषां वाहनानि विदुर्बुधाः ॥

क्वचिदनन्तस्य रथो वाहनमुक्तः ।

अथ विकशितकिंशुकाभ्रमग्निं छगणगतं शितशक्तियुक्तहस्तम् ।
मणिमयमुकुटं यजेत्सुगन्धैः कुसुमरवैर्वृत रत्नकुण्डलञ्च ॥

इति सारसमुच्चयवचनस्थछगणपदस्य छगणो मेष इति व्याख्यानमस्ति । शातातपोऽपि—

भगन्दरजलकपापप्रायश्चित्तमेषीदाने—

देवानां यो मुखं हव्यवाहनस्सर्वपूजितः ।
तस्य त्वं वाहनं पूज्यं देवेशेन्द्रं महर्षिभिः ॥

इत्यादि मन्त्रमुक्तवान्। प्रसिद्धिस्तु - वह्नेश्छगणवाहनत्वेनैव। अस्त्राण्येषामस्त्रावरण एव वक्ष्यन्ते। पूजामन्त्रस्वरूपन्तूर्णयागे—

इन्द्राय वज्रहस्ताय सुराधिपतये पदम्।
सवाहनपदं पश्चात्परिवाराय इत्यपि॥
नमोऽन्तञ्चैवमन्येषां वाहनादिकमुद्धरेत्॥

ग्रन्थान्तरस्वरसेन साङ्गायेत्यपि योजयन्ति। पीतवर्णायेत्याद्यपीति कश्चित्। तथा चोक्तम्प्राक्। केचित्तु साङ्गाय सायुधायेत्यादि प्रकारेण सामान्यत एवास्त्रादिकं मन्त्रे योजयन्ति।

दम्भोणिशक्त्यभिदण्डकृपालपाशचण्डाङ्कुशद्वयगदात्रिशिखारिपद्माः।
अर्च्या वहिर्निजस्वलक्षितमौलियुक्ताः स्वस्वायुधाभयसमुद्यतपाणिपद्माः॥
कनकरजततोयदाभ्रचम्पारुणहिमनीलजलप्रवालभासः।
क्रमत इति रुचान्तरक्तपूर्वारुचिरविलेपनमाल्यवस्त्रभूषाः॥

निजस्वलक्षितमौलियुक्ता इति किरीटनिर्मितस्वस्वनामकायुध - चिह्ना इत्यर्थः। स्वस्वायुधेति स्वं स्वमायुधमित्यर्थः। तेन वज्रस्य हस्ते वज्रमेवायुधमित्यर्थः। केषाञ्चिन्मते वायुर्ध्वजायुधस्तथोक्तन्तूर्णयागे —

वायवे ध्वजहस्ताय प्राणाधिपतये नम इति शक्तिगदे स्त्रीरूपे। उत्तरदिक्पूज्यश्च कुबेर इति। क्वचित्कुबेरस्य वाहनं मनुष्योऽस्त्रं गदेति। एवमावरणपूजाम्विधाय धूपादिदानम्। शारदायान्तु - आवरणपूजापूर्वमेव धूपदीपयोर्द्दानमुक्तम्। तत्र प्रकारः

सारङ्गारेर्घृतविपुलितैर्ज्जञ्जरैः सम्विकीर्ण-
र्गग्गुल्वाद्यै र्घनपरिमलैर्धूपमापाद्य मन्त्री।
दद्यान्नीचैर्द्दनुजमथनायापरेणाथ दोष्णा।
घण्टां गन्धाक्षत-कुसुमकै-रर्चितां वादयानः।
तद्वद्दीपं सुरभि घृतसंसिक्तकर्पूरवर्त्याः।
दीप्तं दृष्ट्याद्यति विशदधीः पद्मपर्यन्तमुच्चैः॥

कृत्वा दत्त्वा स्तुतिमभिविधायार्ऽर्पयित्वा च पाद्यम् ।
साचामं कल्पयतु विपुलस्वर्णपात्रे निवेद्यम् ॥

गुग्गुलाद्यै रित्यनेन—

अगुरूशीरगुग्गुलवशर्करामधुचन्दनैः ।
धूपयेदाज्यसम्मिश्रैर्नीचैर्देवस्य देशिकः ॥

इति शारदावचनोक्तान्युच्यन्ते । अपरेण वामेन नीचैर्देवस्याधस्तात्पद्म-पर्यन्तमुच्चैः कृत्वेत्यर्थः । घृतेनेत्युपलक्षणम् ।

वर्त्या कर्पूरगर्भिण्या सर्पिषा तिलजेन वा ।
आरोप्य दर्शयेद्दीपानुच्चैः सौरभशालिनः ॥

तैलस्यापि विधानात् । तैलञ्च शिवपूजादीपे स्मृतौ निषिद्धम् । नैवेद्य-संस्कारमाह—

अस्त्रोक्षितं तदविमुद्रिकयाभिरक्ष्य वायव्यतोयपरिशोषितमग्निविष्टम् ।
सन्दह्य वामकरसौधरसाभिपूर्णं मन्त्रामृतीकृतमथाभिमृशन् प्रजप्यात् ॥
मनुमष्टशः सुरभिमुद्रिकया परिपूर्णमर्चयतु गन्धमुख्यैः ।

तन्नैवेद्यान्नैवेद्यं पुरतः कृत्वाऽस्त्रेण प्रोक्ष्य ओङ्कारेण तत्र पुष्पं क्षिप्त्वाऽ-भिरक्षणादिकङ्कुर्यात् । तथोक्तम् –

संस्थाप्य पुरतः प्रोक्ष्य तोरणं सुमनो न्यसेत् ॥
हरिमन्वयेदथकृतप्रवराञ्जलिरास्यतोऽस्य विसरेच्चमहः ।
वीतिहोत्रदयितान्तमुच्चरन् मूलमन्त्रमथनिःक्षिपेज्जलम् ॥
अर्पयेत्तदमृतात्मकं हविर्दोर्युतं सकुसुमं समुद्धरन् ॥
निवेदयामि भवते जुषाणेदं हविर्हरे ।
नैवेद्यार्पणमन्त्रोऽयं सर्वार्चासु निजाख्यया ॥

निजाख्यया - तद्देवनाम्ना । अमृतोपस्तरणमसि स्वाहेत्याचामयेत्ततः ।

ग्रासमुद्रां वामदोष्णा विकचोत्पलसन्निभाम् ।
दश ब्रुवन् दक्षिणेन प्राणादीनाञ्च दर्शयेत् ॥

प्राणापनव्यानोदानसमानाः क्रमाच्चतुर्थ्या युक्ताः ।

तारा धारा बध्वा विद्धाः कृष्णाध्वनस्तथैते मनवः ।
ततो निवेद्य मुद्रिकां प्रधानया करद्वये ॥
स्पृशन्ननामिकां निजमन्त्रं जपन् प्रदर्शयेत् ।

नन्दजोम्बुमथविन्दु युङ्नतिः पार्श्ववाम रुदरात्मनेऽनि च ।

रुद्धतेऽपि च निवेद्यमात्मभूर्मां सपार्श्वमनिलस्तयाभियुक् । नतिपर्य्यन्तेनध्वां इति रूपं मन्त्रश्चायङ् गोपालपूजायामन्यत्रोहः कर्त्तव्यः ।

ततो घृतादि सन्दीप्तान् पिष्टकादि विनिर्मितान् ।
पारावतभ्रमाकारान् उच्चैर्द्दीपान् प्रदर्शयेत् ॥
आरात्तिकमिति प्रोक्तं घण्टावादनपूर्वकम् ।
पानीयममृतीकृत्य मुद्रया धेनुसंज्ञया ॥
चुलूकोदकममृतापिधानमसि च द्वयम् ।
अनेन देवता हस्ते धृत्वा चाथ विचिन्तयेत् ॥
गतसारन्तु नैवेद्यं ततश्चैतत्समुद्धरेत् ।
ऐशान्यां तद्भुजे दत्वा किञ्चित्स्थनं विशोधयेत् ॥

नैवेद्योद्धारपूर्वं पानीयामृतदानान्तरं जलान्तरन्दत्वा पूर्वं विनिःसृतं तेजो देवतामुखे उद्वासनीयम् । तदुक्तम् क्रमदीपिकायाम् –

सम्पाद्य पानीयसुधां समर्प्य दत्वा तदुद्वास्य मुखाच्चिरास्ये । इति ।

तद्भुजे—देवभजोच्छिष्टभोजिने ।

तेच—विष्वक्सेनः स्मृतो विष्णोस्तेजश्चण्डो विवस्वतः ।
चण्डेश्वरी तथा शक्तेश्चण्डेशः शङ्करस्य च ॥
लम्वोदरो गणपतेरमी उच्छिष्टभोजिनः ॥
इत्युक्ताः

गण्डूषदन्तधवला चमतानुलेपहस्तानुमृज्य मुखवासकमाल्यपुपाः ।
ताम्बूलमप्यभिसमर्प्य सुवाद्यनृत्यगीतैः स्वदृप्तमभिपूजयतात्पुरेव ॥
गन्धादिभिः सपरिवारमथार्घमस्मै दत्वा विधाय कुसुमाञ्जलिमादरेण ।
दत्वा प्रणम्य शिरसा चुलुकोदकेन स्वात्मानमर्पयतु तच्चरणात्त मूले ॥

ओमितः पूर्वं प्राण बुद्धिशरीर धर्माधिकारतो जाग्रत्स्वप्न सुषुप्त्यवस्थ स्वमनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा मां मदीयञ्च सकलं हरये समर्पये । ओं तत्सदिति प्रोक्तो मन्त्रः । स्वात्मसमर्पणे ।

अयञ्च मन्त्रो विष्णुमात्रपूजायाम् । पूजायेयं गन्धादिभिर्द्दीपान्तैरेव । तथोक्तम्—चन्दनादि प्रदीपान्तरुपचारैः पुनर्यदि । शारदायां पञ्चोपचारैरित्युक्तम् —

प्रसन्नार्च्येयमाख्याता सर्वदेवप्रसादिनी ।
यथाशक्ति जपङ्कृत्वा तं जपं सर्वसिद्धये ॥
दक्षिणे देवता हस्ते अर्पयेत्पूर्ववत्सुधीः ।
अर्पणमन्त्राः पूर्वमेवोक्ताः यथाशक्तीति ।

अष्टोत्तर सहस्रम्, अष्टोत्तरशतम्वा दश वा यदुक्तम्—

संख्यानुक्तौ शतं साष्टा सहस्रं द्वादशापि वा ।
स्वच्छत्रचामरै राज्ञामुपचारैः प्रपूजयेत् ॥
पुष्पाञ्जलिम्पुनर्द्दत्वा साष्टाङ्गं प्रणमेन्मुहुः ।
दोर्भ्यां पद्भ्यां तथा कृत्वा प्रणमेच्छिरसा दृशा ॥
वचसा मनसा चेति प्रणामोऽष्टाङ्ग ईरितः ।
बाहुभ्याञ्च सजानुभ्यां वचसा शिरसा धिया ॥
पञ्चाङ्गकः प्रणामोऽयं पूजासु प्रवराविमौ ।
परिवारगणं सर्वमुपसंहर मुद्रया ॥
तम्मूर्त्तावुपसंहृत्य देवतां प्रीतमानसः ।

क्षमस्वेति विसृज्याथ मन्त्रेण व्यापकं त्रिशः ॥
विधाय देवतां पश्चात् स्वीयहृत्सरसीरुहे ।
सुषुम्ना वर्त्मना पुष्पमाघ्रायोद्वासयेत्सुधीः ॥
निर्माल्यं शिरसा धार्य्यं सर्वाङ्गस्वनुलेपनम् ।
नैवेद्यञ्चोपभुञ्जीत दत्त्वा तद्भक्तिशालिने ॥

ततो गुरोर्नमस्कारत्रयम् :—

शिष्टं गन्धं शंखतोये विलोड्य पाणौ कृत्वा दक्षिणे मूलमन्त्रम् ।
सप्तावृत्या सञ्जपेत्सर्वतीर्थीभूतं ध्यात्वा प्रोक्षयदात्मनोऽङ्गम् ।
देवार्च्चनावशिष्टं यत्सलिलं शंखमध्यस्थम् ।

अङ्गे लग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति ।
एतान्यन्यानि पूजायां साधनानि बहून्यपि ॥
उत्तमानि च मध्यानि न्यूनानि विविधानि वै ।
स्वस्थः समर्थः कुर्वीत उत्तमैरेव साधनैः ।
मध्यमो मध्यमैरेव न्यूनो न्यूनैस्तु साधनैः ॥
आपन्नश्चेत्समर्थोऽपि न्यूनैरेव समाचरेत् ॥
पूजाकर्मविशेषेण देशकालानुसारतः ।
यथाशक्ति यथान्यायं यथालोकावगर्हितम् ॥
पूजा विस्तरतः कर्त्तुं यो न शक्नोति मानवः ।
स इहाङ्गेन्द्रवज्राद्यैः पूजयेदिष्टदेवताम् ॥
अथवा देवतामात्रन्ध्यात्वा सम्यक् प्रपूजयेत् ।
अथवा मानसीङ्कुर्यादात्मपूजामथापि वा ॥
अथवा केवलां पूजां वाह्याङ्कुर्याद्विचक्षणः ।
अर्च्चामात्रेऽसमर्थश्चेद्द्यादर्च्चन – साधनम् ।
सम्पूज्यैव जपङ्कुर्यान्न मन्त्रङ्केवलञ्जपेत् ।

अथपूजोपयुक्तासनमुद्रालक्षणानि—

जानूर्व्वोरन्तरे कृत्वा सम्यक् पादतले उभे ।

ऋजुकायोविशद्योगी स्वास्तिकन्तदुदीरितम् ॥
वामोरूपरि दक्षिणञ्चरणं संस्थाप्य वामं पुन
र्यम्योरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम् ।
अङ्गुष्ठे हृदये निधाय चिबुकं नासाग्रमालोकये-
देताद्याधिविघातकारियमिनां पद्मासनं प्रोच्यते ।
अथ मुद्राः प्रवक्ष्यामि सर्वतन्त्रेषु गोपिताः ।
यभि र्विरचिताभिस्तु मोदन्ते सर्वदेवताः ॥
दक्षिणाङ्गुष्ठतर्ज्जन्योरग्रलग्ने पराङ्गुलिः ।
प्रसार्य्यं संहतोत्ताना एष व्याख्यानमुद्रिका ॥
दक्षाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु ।
सावकाशात्मकस्वस्तिङ्कुर्यात्मा कुम्भमुद्रिका ॥

अनङ्गुष्ठाऋजवोहस्तशाखा भवेन्मुद्रा हृदये चापि शीर्षे ।
अधोङ्गुष्ठा खलु स्वतिः शिखायां करद्वन्द्वाङ्गुलयः ।
नारा च मुष्ट्यु हुतवाहु युग्मकाङ्गुष्ठा सर्ज्जन्युहितोध्वनिस्तु-वर्त्मनस्युः ।
विष्वग्विभक्तः कथितारथ मुद्रा यत्राक्षिणी तर्ज्जनि मध्यमे स्वाः ।
नेत्रत्रयं यत्र भवेहनामा षडङ्गमुद्रा कथिता यथावत् ॥
अञ्जल्याध्यानमुद्रा स्याद्वासुदेवाभिधास्य च ।
कनिष्ठाङ्गुष्ठकौ शक्तौ करयोरिति वेतरम् ॥
तर्ज्जनीमध्यमालग्ना संहता भग्नवर्ज्जिताः ।
मुद्रैषा गालिनी प्रोक्ता शंखस्योपरि चालिता ॥

चालितेति-शंखस्योपरिचालिता सती गालिन्याख्यां लभत इत्यर्थः ।

ऋज्वीञ्च मध्यमांकृत्वा तर्ज्जनीं मध्यपर्वणि ।
संयोजति यत्किञ्चिन्देषाचङ्कुशसंज्ञिका ॥
वामाङ्गुष्ठन्तु सङ्गृह्य दक्षिणेन च स्वस्तिना ।
कृत्वोत्तानां ततो स्वातिमङ्गुष्ठन्तु प्रसारयेत् ॥
वामाङ्गुल्यस्तथा श्लिष्टाः संयुक्ताः स्वप्रसारिताः ।

दक्षिणाङ्गुष्ठसंसृष्टा मुद्रैषा शंखसञ्ज्ञिका ॥
मिथः कनिष्ठिके बद्ध्वा तर्ज्जनीभ्यामनामिके ।
अनामिकोद्ध्र्वसंश्लिष्टं दीर्घमध्यमयोरधः ।
अङ्गुष्ठाग्रद्वयंन्यस्येद्योनिमुद्रेयमीरिता ।
अन्योन्याभिमुखाश्लिष्ट - कनिष्ठानामिके पुनः ॥
तथैव तर्ज्जनीमध्ये धेनुमुद्रा समीरिता।
अधोमुखे दक्षहस्ते तादृशं वामहस्तकम् ।।
धारयेन्मत्स्यमुद्रेयमर्घ - संस्थापने मता।
हस्ताभ्यामञ्जलिम्बद्ध्वाऽनामिकामूलपर्वणोः ॥
अङ्गुष्ठे निःक्षिपेत्सेयं मुद्रा चावाहिनी मता ।
अञ्जलिस्तु पुष्पैः पूर्णः ।
सम्यक् प्रपूरितः पुष्पैः कराभ्याङ्कल्पितोञ्जलिः ।
आवाहनी समाख्याता मुद्रा देशिकसत्तमैः ॥

इति वचनात् ।

अधोमुखी त्वियञ्चेत्स्यात् स्थापिनी मुद्रिका भवेत् ।
उछ्रिताङ्गुष्ठ स्वस्त्योश्च संयोगात्सन्निधापनी ॥
अन्तःप्रवेशिताङ्गुष्ठा सैव सम्बोधिनी मता ।
उत्तानमुष्टियुगला सम्मुखीकरणी मता ॥
देवताऽङ्गे षडङ्गानां न्यासः स्यात्सकला कृति ॥

तथा च षडङ्गमुद्रैव सकलीकरणमुद्रेति तात्पर्यम् । अन्यथामुद्रा प्रकरणे तत्स्वरूपाभिधानमर्थान्तरं स्यात् ।

सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्ज्जनी ।
अवगुण्ठनमुद्रेयमभितो भ्रामिता मता ॥

अन्योन्याभिमुखेत्यादिना धेनुमुद्रा उक्तेति ।

अमृतीकरणङ्कुर्यान्तथा साधकसत्तमः ।

अन्योन्यग्रथिताऽङ्गुष्ठा प्रसारितपराऽङ्गुलिः ॥
महामुद्रेयमुदिता परमीकरणे बुधैः ।
प्रयोजयेदिमा मुद्रा देवताध्यानकर्मणि ॥
अधःकृतो वामदक्षहस्तः प्रसृतोऽमुद्रिका ।
ऊर्ध्वीकृतो वामहस्तः प्रसृतोऽभयमुद्रिका ॥
हस्तौ तु सम्मुखौ कृत्वा संलग्नौ स्वप्रसारितौ ।
कनिष्ठाङ्गुष्ठकौ लग्नौ मुद्रैषा चक्रसंज्ञिका ।
स्पृशेत्कनिष्ठोपकनिष्टकेद्वे स्वाङ्गुष्ठमूर्ध्ना प्रथमे च मुद्रा ।
तथापरा तर्ज्जनिमध्यमे स्यादनामिकामध्यमिके च मध्या ॥
अनामिका तर्ज्जनिमध्यमाः स्यात्तद्वच्चतुर्थी स कनिष्ठिका स्ताः ।
स्यात्पञ्चमी तद्वदिति प्रदिष्टाः प्राणादिमुद्रा निजमन्त्रयुक्ताः ॥

तथेत्यादितर्ज्जनी मध्यमे स्वाङ्गुष्ठमूर्ध्ना स्पृशेदेवं द्वितीयाऽपालमुद्रा भवतीत्यर्थः । एवमग्रेऽपि । निजमन्त्रयुक्ताः- प्राणादिमन्त्रयुक्ताः ।

अधोमुखे वामहस्त ऊर्द्ध्वास्यं दक्षहस्तकम् ।
क्षिप्त्वाऽङ्गुलीरङ्गुलिभिस्संगृह्य परिवर्त्तयेत् ॥
एषा संहारमुद्रा स्याद्विसर्ज्जनविधौ मता ।
वक्ष्येऽहमुपचाराणां मुद्रास्तन्त्रेषु चोदिताः ॥
प्रसारयेदुभौ हस्तौ हृद्देशे विनियोजितौ ।
अङ्गुल्यो विस्तृताः कार्या मध्याङ्गुष्ठौ च विन्यसेत् ॥
देवस्यासनविन्यासे पद्ममुद्रां प्रदर्शयेत् ।
ईषन्नम्राङ्गुलिर्द्दक्षा संयोज्याङ्गुष्ठकं वरम् ॥
स्वागता स्वतिका मुद्रा मध्या मूलगताऽङ्गुलिः ।
उपचारे स्वागते तु प्रयोक्तव्यं विपश्चिता ॥
स्वस्तिमुद्रा द्विहस्तौ च मुद्रात्वर्घस्य कीर्त्तिता ।
तौ च प्रसारितौ हस्तौ पाद्यमुद्रा प्रसारिता ॥
देशिनी मूलगाङ्गुष्ठा दक्षिणाधः कनीयसी ।
प्रसार्य्य मध्यमास्तिस्रो मुद्रा चात्मप्रकीर्त्तिता ।

युक्तावनामिकाङ्गुष्ठौ तिस्रो न्यासप्रसारिताः ।
मधुपर्के तु सा मुद्रा सङ्कल्प्य कलशं करे ॥
कृत्वा स्वस्ति तथा स्नाने मध्यमाङ्गुष्ठकौ युतौ ।
अन्याः प्रसारितास्तिस्रो मुद्रा वस्त्रस्य कीर्त्तिता ॥
कनिष्ठाङ्गुष्ठकौ लग्नौ तिस्रो मध्याः प्रसारिताः ।
यज्ञोपवीतमुद्रेयं कथिता मन्त्रपारगैः ॥
मधुपर्का समुत्ताना मद्राऽलङ्करणी मता ।
युक्त निर्व्वासिका स्वास्तिर्गन्धमुद्रेति कीर्तिता ॥
उत्थिताऽधोमुखीमध्या बद्धाङ्गुष्ठा यदीतरा ।
पुष्पमुद्रा तदाख्याता पुष्पदानविवर्द्धिनी ॥
अङ्गुष्ठस्तर्ज्जनीलग्नास्तिस्रः सङ्कुचिताः पराः ।
मुद्रा धूपप्रदाने स्याद्देवानान्तुष्टिकारिणी ॥
उत्तानात्पौष्पिकी मुद्रा दीपमुद्रेति गीयते ।
पञ्चाङ्गुल्यग्रसंलग्ना प्रोत्थितोद्ध्वर्मुखी यदि ॥
त्रिधा निबद्धा मुद्रेयं नैवेद्यस्य प्रकीर्तिता ।
मध्यमाऽनामिकाऽङ्गुष्ठाः संलग्नाग्राअधोमुखाः ॥
अन्ये प्रसारिताऽङ्गुल्यो गोमुखी सा प्रकीर्तिता ।
त्यक्तप्रदेशिनी स्वस्ति सूची मुद्रेति कीर्तिता ॥
रक्षामुद्रेति सैवोक्ता समन्ताद्भ्रमणं यदि ।
द्वौ करौ पृष्ठसंलग्नौ भ्रामयेद्ग्रथिताऽङ्गुलिः ॥
छोटिकेति समाख्याता प्रणामे तां प्रदर्शयेत् ।
देशिन्यंङ्गुष्ठयो र्मध्ये दत्वाऽङ्गुलिचतुष्टयम् ॥
निधाय सम्पुटीकृत्य लग्नाङ्गुष्ठौ समुच्छ्रितौ ।
कुम्भमुद्रे दृशी सम्यक् हृल्लग्ना कच्छपी मता ॥
प्रसार्य्य दक्षिणं हस्तङ्कनिष्ठाम्याखिलाङ्गुलीः ।
क्रमादाकुञ्चयेद्दीर्घं मुद्रा संहारिणी मता ॥
मिथः पृष्ठार्प्पितौ हस्तावन्योन्यग्रथिताङ्गुलीः ।
कृत्वा बद्ध्वा परावृत्य मत्वा सा स्यात्क्षमापनी ॥

प्रपितामहसिद्धान्तसारवेत्ता पितुर्मुखात् ।
अथ पद्धतिमेतस्य गोविन्दो रचयत्ययम् ॥

ब्राह्मे मुहूर्त्ते उत्थाय ब्रह्मरन्ध्रस्थसहस्रदलपद्मे, व्याख्यामुद्रापरं परमात्मस्वरूपं द्विनयनं द्विभुजम्, प्रीतं गुरुं ध्यात्वा तत्पादपद्मस्रुतामृतधाराक्षालितन्देहम् ।

भ्रातुः श्री रुचिनाथस्य प्रसादेन महीयसा ।
श्रीगोविन्देन विज्ञाय मन्त्रशास्त्रमनेकशः ॥
श्रीमद्रायभवानन्दनिदेशवशवर्तिना ।
पूजाकर्मणि मानानि निबद्धानि सतां मुदे ॥

इति श्रीभवानन्दरायकृते पूजाप्रदीपे प्रमाणपरिच्छेदः ।

विचिन्त्य हृदयाम्बुजे-इष्टदेवतां ध्यात्वा-तत्प्रभापटलव्यापृतं देहं विचिन्त्य प्रणम्य तदनुज्ञांगृहीत्वा मन्त्रस्य ऋषिच्छन्दो दैवतानि शिरोवदनहृत्सु विन्यस्य मन्त्रार्थं संस्मरन् जलाशयं गत्वा-स्वशाखोक्तक्रमेण स्नात्वाऽऽचम्य मन्त्रस्य ऋषिच्छन्दोदैवतानि स्मृत्वा तानि मस्तकादिषु विन्यस्य जले इष्टदेवतां ध्यात्वा-तीर्थमन्त्रेणाङ्कुशमुद्रया तीर्थमावाह्य वमिति-धेनुमुद्रया अमृतीकृत्य फडिति संरक्ष्य तज्जले-देवतामूर्त्तिन्ध्यात्वा-तच्चरणस्रुतत्वेन-ध्याते तीर्थे मनसा मन्त्रमुच्चरन् वारत्रयं निमज्य द्विजश्चेदन्तर्ज्जलेऽघमर्षणङ्कृत्वोत्थाय तर्पणान्तङ्कर्म कृत्वा मूलमन्त्रमष्टाविंशतिकृत्वो जप्त्वा अष्टाविंशतिवारन्देवतान्तर्पयेत् ।

तत्र प्रकारः—जले देवतायाः पीठं विचिन्त्य जलैरेव सम्पूज्य तत्तन्मन्त्रैस्सकृत् सकृत् पीठं सन्तर्प्य तत्र देवमावाह्य सर्वोपचारबुद्धया जलैरेव देवमभ्यर्च्य धेनुमुद्रया तर्पणद्रव्यन्तोये सम्पाद्य-सुवर्णादिस्थितेनाञ्जलिना देवतामुखे तर्पयेत् ।

तत्र मन्त्रः— मूलमन्त्रान्ते द्वितीयान्तन्देवतानामोक्त्वा तर्पयामीति ।

ओं नमो नारायणाय-नारायणन्तर्पयामीति। तत एकैकाञ्जलिना स्व-स्वकालविहितान्-परिवारान् सन्तर्पयेत्। ततः कलशमुद्रया वारत्रयमभि-षिच्य तत्तद्देवतागायत्रीन्दश कृत्वा जपेत।

तत्र—क्लीं त्रिपुरादेवि विद्महे, कामेश्वरि धीमहि। तन्नः क्लीन्नः प्रचो-दयादिति-त्रिपुरायाः। त्रैलोक्यमोहनाय विद्महे, स्मराय धीमहि। तन्नो विष्णुः प्रचोदयादिति विष्णोः। वामदेवाय विद्महे पुष्पवाणाय धीमहि। तन्नोऽनङ्गः प्रचोदयात्, इति कामदेवस्य। तत्पुरुषाय विद्महे। वामदेवाय धीमहि। तन्नो रुद्रः प्रचोदयादिति शङ्करस्य। सुदर्शनाय विद्महे, महाज्वा-लाय धीमहि-तन्नोश्चक्रम्प्रचोदयादिति-सुदर्शनस्य। ओं घृणि सूर्य आदित्य इति मन्त्रेण ह्रीं ह्रीं सः इति मन्त्रेण वा सूर्यायार्घन्दत्वा-मूलमन्त्रेण दश-धाभिजप्तजलैराचम्य-दिक्पतीन्नमस्कुर्यात्। ततो मण्डपनिकटङ्गत्वा पवि-त्रादिपाणिनाऽचम्य समुपविश्य-सामान्यार्घङ्कुर्यात्। यथा-अस्त्रमन्त्रेणार्घ-पात्रम्प्रक्षाल्य-वमितिजलैरापूर्य —

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिङ्कुरु॥

इति तीर्थमन्त्रेण तत्राङ्कुशमुद्रया सूर्यमण्डलात्तीर्थमावाह्य-ओङ्कारेण पुष्पादिकं निःक्षिप्य फडिति शोधयित्वा-तज्जलं स्पृशन्मूलमन्त्रं त्रिर्ज्जप्त्वा धेनु-मुद्रान्दर्शयेत्।

ततस्तज्जलेनास्त्रमन्त्रेण द्वारमभ्युक्ष्य-द्वारोर्द्ध्व-शाखयान्दक्षिणशाखो-परि विघ्नेशन्तत्रैवमध्ये महालक्ष्मीन्तत्रैव वामशाखोपरि सरस्वतीं पुष्प-तोयाभ्यां सम्पूज्य दक्षिण-शाखायां विघ्नेशम् बामशाखायां क्षेत्रपालञ्च पूजयेत्।

ततो दक्षिणवामशाखयोः क्रमेण गङ्गायमुने-पूजनीये। एवम्-धात्रा-दयोऽपि।

विघ्नेशस्य क्षेत्रपालस्य च दक्षिणवामपार्श्वयोः क्रमेण गङ्गायमुने एवं धातृविधातारौ, शङ्खनिधिपद्मनिधी, देहल्यामस्त्रञ्च पूजयेदिति केचित् ।

ततस्तत्तद्द्वारपालं पूजयित्वा एवमेवद्वारान्तरमपि पूजयेत् । तत्र विष्णोर्द्वारपालाः — मन्द-सुन्दर-बलभद्र-चण्ड - प्रचण्ड-सुभद्राः । शिवस्य नन्दि-महाकाल-गणेश-वृषभ-भृङ्गिरिटि-स्कन्दोमाचण्डेश्वराः ।

गणेशस्य— वक्रतुण्डैकदन्त-महोदर गजानन,— लम्बोदर-विकट-विघ्नराज-धूम्रवर्णाः । देवीनाम्—ब्राह्मी,माहेश्वरी, कौमारी, वैष्णवी,-वाराही, इन्द्राणी, चामुण्डा, महालक्ष्मी च ।

त्रिपुरायास्तु — इन्द्र-यम-वरुण-कुबेराः ।

ततो दिव्यदृष्ट्यवलोकनेन-दिव्यान् विघ्नान् अस्त्र-मन्त्रे, जलक्षेपेणान्तरिक्षगान् ।

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
विघ्नकर्ता च ये भूतास्ते नश्यन्तु शिवाज्ञया ॥

नाराचास्त्रबुद्ध्या सिद्धार्थाक्षतकुसुमं मण्डपान्तःपरिक्षिप्य पार्ष्णिघातत्रयन्दत्वा भौमान्विघ्नान्निवार्य्य द्वारस्य वामशाखां दक्षिणांशेन स्पृशन् दक्षिणाङ्घ्रिणा-देहलीं विलङ्घ्याङ्गं सङ्कोचयन्मण्डपं प्रविशेत् । ततो नैर्ऋत्यान्दिशि आस्तीर्य ब्रह्माणञ्चाभ्यर्च्य पञ्चगव्यार्घतोयाभ्यां मण्डपम्प्रोक्ष्य—

ओं तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञान्दातुमर्हसि ॥

इति भैरवानुज्ञाङ्गृहीत्वा चतुर्भिस्संस्कारैर्मण्डपं शोधयेत् ।

यथा-मण्डपं मूलमन्त्रेण वीक्ष्य फडिति प्रोक्ष्य फडिति कुशैस्ताडयित्वा हुमित्यभ्युक्षेत् । ततो मण्डपं चन्दनागुरुकर्पूरैर्धूपयित्वा कुशाजिनकम्बलो-

त्तरं विहितमासनं वेदिकायां विन्यस्य जलेनाभ्युक्ष्य तत्रासने आधारशक्ति प्रकृति कूर्मानन्तौ पृथिवीं च सम्पूज्य - आसनमन्त्रस्य-मेरुपृष्ठ ऋषिः-सुतलं छन्दः कूर्मो देवता आसने विनियोगः- इति स्मृत्वा —

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वञ्च धारय मां भद्रे पवित्रङ्कुरु चासनम् ॥

इति जपन्नासने समुपविश्य-स्वस्तिकपद्मासनयोरन्यतरं बद्ध्वा-दक्षिणतः पुष्पचन्दनादीनि वामतो वारिकुम्भं पश्चात्करक्षालनपात्रं यथोचितं यथा-सौकर्य्यञ्च धूपदीपादिसाधनानि स्थापयित्वा अञ्जलिपुटम्बद्ध्वा दक्षिणे गणेशमग्रे दुर्गाम् —

पश्चात् क्षेत्रपालञ्च नमस्कृत्य — ओं सहस्रारम्बर्षडिति रक्षाम्विधाय सुगन्धिपुष्पमर्द्दनेन हस्तौ सुरभीकृत्य तत्पुष्पं नाराच मुद्रया उत्तरतः क्षिप्त्वा-फडिति करौ संशोध्य जलन्दत्वा - दिग्बन्धनङ्कुर्यात् । ततो वमिति मन्त्रेण वह्निरूपतया ध्यातेन जलेनात्मानं वेष्टयित्वा हृत्पद्मकर्णिकास्थन्दीप-शिखानिभं जीवात्मानं हंस इति मन्त्रेण सुषुम्णा वर्त्मना मस्तकोपरि सहस्रदल कमलावस्थिते परमात्मनि संयोज्य आकाश-वायु-तेजोजल - पृथिवीश्रोत्रत्वक्-चक्षू रसनघ्राणमुखपाणिपादपायूपस्थ - शब्दस्पर्शरूपरसगन्धवचनोदान-गतिविसर्गानन्दात्मकपञ्चविंशतितत्त्वानि परमात्मनि बीजभावेन व्युत्क्रमा-ल्लीनानि विचिन्त्य वामनासापुटे यमिति वायुबीजं धूम्रं वायुमण्डलस्थं विचिन्त्य नाभिचक्रस्थवायुमण्डलावस्थितवायुना ऐक्यं सम्भाव्य पूरकं कृत्वा शुष्कं शरीरं विचिन्त्य दक्षिणनासापुटेन वायुं रेचयेत् ।

ततो दक्षिणनासापुटे वमिति वह्निबीजं रक्तवर्णवह्निमण्डलस्थं नील-मारुतं विचिन्त्य हृदयस्थवह्निमण्डलावस्थित - वह्निना ऐक्यं सम्भाव्य पूरके वह्निपूर्णं शरीरं विचिन्त्य कुम्भके दग्धञ्चिन्तयित्वा बामनासापुटेन भस्मना सह वायुं रेचयेत् ।

ततो वामनासापुटे चमिति चन्द्रबीजं श्वेतं जलमण्डलस्थं विचिन्त्य सह-

स्वदलकमलस्थजलमण्डलस्थामृतेनैकीभूतं सम्भाव्य पूरके चमिति बीजं ललाट-चन्द्रं नीत्वा कुम्भके वमित्यमृत बीजेन वर्गमयीं चन्द्रामृतच्चष्टीं निपात्य दोष-जातं विश्लेषयन् दिव्यं शरीर मुत्पाद्यापादतलमस्तकममृतेनाप्लाव्य दक्षिण-नासापुटेन वायुं रेचयेत् ।

पूरके-षोड़शमात्रया, कुम्भके-चतु:षष्टिमात्रया, रेचके द्वाशिंषन्मात्रया, तत्तन्मन्त्रजपः । ततस्तत्त्वानि स्वस्वस्थानं नीत्वा जीवात्मानं परमात्मसमीपात् सोऽहमिति मन्त्रेण हृदम्बुजमानयेदिति ।

अथ मातृकान्यास.--

मातृकामन्त्रस्य ब्रह्मऋषि र्गायत्री छन्दो मातृका सरस्वती देवताऽहलो बीजं सुराः शक्तिर्देहशुद्धौ विनियोग इति स्मृत्वा ब्रह्मणे नम इति शिरसि गायत्र्याय नम इति रसनायाम् मातृका सरस्वत्यै नम इति हृदये, हलः इति गुह्ये । सुरान् पादयो र्विन्यस्य अङ्गम् । आचारादत्रानुस्वारः- अं कं खं, गं, घं, ङं, आं, हृदयाय नम—इत्यङ्गुष्ठयोः ।

इं, चं, छं, जं, झं, ञं, ईं शिरसे स्वाहेति तर्ज्जन्योः । उं, चं, छं, ऊँ चं, लं, तं, शिखायै वषड़िति मध्यमयोः । एं, तं, थं, द, घं, मं, ऐं,कवचाय हूं इत्यनामिकयोः । ओं, पं, फं, वं, शं, ष, सं, हं, क्षं, अस्त्राय फडित करतलयो र्विन्यस्य अस्त्रे मन्त्रेणैव तालत्रय दिग्बन्धनञ्च विधाय स्वस्व मुद्रया हृदयाद्यङ्गेष्वपि विन्यसेत् तालत्रयादिकञ्च ।

ततः- पञ्चाशल्लिपिभि र्विभक्त मुखदोः तन्मध्यवक्षस्थलीम्
भास्वन्मौलिनिवद्धचन्द्रशकलामापीनतुङ्गस्थलीम्
मुद्रामङ्कगुणं सुधाढ्य कलसं हस्ताम्बुजै र्विभ्रतीं
विद्यञ्चापि सितप्रभां त्रिनयनां वाग्देवतामाश्रयेत् ॥

मुद्रादिकमधोदक्षिणहस्तमारभ्य प्रादक्षिण्येन ध्येयम् । इति ध्यात्वा न्यसेत् ।

तत्र प्रथमं शुद्धाम्, तत्र स्थानानि अ, ललाटे, आ, मुखवृत्ते, इ, ई, दक्षिणवामक्रमेण नेत्रयोः । एवम् उ,ऊ, श्रोत्रयोः । ऋ, ॠ, नासापुटयोः । ऌ० ॡ० गण्डयोः । ए० ऐ० ओष्टाधरयोः । ओ, औ, ऊर्द्ध्वाधोदन्तपङ्क्त्योः अं शिरसि । अः, मुखे । क० ख० ग० घ० दक्षिणबाह्वोः सन्धिचतुष्टये। ङं अङ्गुल्यग्रे । वामबाहोस्सन्धिचतुष्टये च० छ० ज० झ० । अङ्गुल्यग्रे ञं। दक्षिणपादस्सन्धिचतुष्टये ट० ठ० ड० ढ०, अङ्गुल्यग्रे वामपाद-सन्धिचतुष्टये त० थ० द० ध० । अङ्गुल्यग्रे-न । पार्श्वयोः प० फ० । पृष्ठे ब० । नाभौ- भ० । उदरे-म० । हृदि-य, हृदादिवामांशे ब० । हृदादि-दक्षिणबाहौ- श० । हृदादिक हृदि ल । हृदादिवामबाहौ-ष० । हृदादिदक्षिण-पादे- स० । हृदादिवामपादे-ह० । हृदादि मुखे- क्षः विन्यसेत् । एवमेव सविसर्ग वर्णन्यास इति सृष्टिप्रकारः ।

अथ-स्थितिः, तत्र ऋष्यादि पूर्ववत् ।

ध्यायेद्वर्णेश्वरीमत्र वल्लभेन समन्विताम् ।।

सिन्दूरकान्तिममिताभरणन्त्रिनेत्रं विद्याक्षसूत्रमृगपोतवरान्दधानम् ।
पार्श्वस्थितां भगवतीमपि काञ्चनाभां ध्यायेत्कराब्जधृत- पुस्तकवर्णमालाम् ।।

विद्याक्षसूत्रे वामदक्षिणक्रमेण ऊर्द्ध्वहस्तयोः— मृगपोतवरावधो हस्तयोः । एवन्ध्यात्वा टकारादिक्षकारान्तवर्णान् पूर्वोक्तस्थानेषु विसर्ग-बिन्दुसहितान्विन्यस्य तादृशानेव आकारादि ञकारान्तान् पूर्वोक्तस्थानेष्वेव विन्यसेत् ।

अथ संहारक्रम.--

अत्रापि ऋष्यादि पूर्ववत् । ध्यानु—

अक्षस्रजंहरिणपोतमुदग्रटङ्कम्विद्याङ्करैव विरतं दधतीन्त्रिनेत्राम् ।
अर्द्धेन्दुमौलिमरुणामरविन्दवासां वर्णेश्वरीं प्रणमत स्तनभारनम्राम् ।।

अत्र वासरविन्दं वर्णमयम् । अक्षस्रगादीनि दक्षिणाधोहस्तमारभ्य

एवन्ध्यात्वा विन्दुयुक्तान् क्षकाराद्यकारान्तान्वर्णान् तेष्ववस्थानेषु विन्यसेदिति। ततो विष्णुपूजायाम्—केशवकीर्त्यादिसहितान् तथा बीजसहितान् वर्णान्विन्यसेत्। तत्र प्रकारश्च पूजापरिच्छेदोपक्रमे द्रष्टव्यः। एवम् शिवपूजादौ-श्रीकण्ठादिन्यासोऽपि। स च तत्तत्कल्पेषु द्रष्टव्यः।

ततः प्रपञ्च यागः—

तत्र प्रपञ्चयागमन्त्रस्य-ब्रह्माऋषि गायत्रीछन्दः परन्तेजो देवता देहशुद्धौ विनियोग इदि स्मृत्वा शिरोवदनहृदयेषु ऋष्यादित्रयं विन्यस्य स्वाहा हृदयाय नमः। सोऽहं शिरसे स्वाहा। हंसः शिखायै वषट्। ह्रीं कवचाय हुं, ओं नेत्राभ्यां वौषट्। हरिहर अस्त्राय फडितिमन्त्रैः कराङ्गन्यासौ विधाय।

तारादिपञ्चमनुभिः परिचीयमानं मानैकगम्यमनिशं जगदेकमूलम्।
सम्वित्समस्तगमनश्वरमच्युतन्तत्तेजः परं भजत सान्द्रसुधाम्बुराशिम्॥

इति ध्यात्वा— ओं ह्रीं इति मन्त्रमादौ हंसः सोऽहं स्वाहेति मन्त्रानन्ते च दत्त्वा- अकारादि क्षकारान्तान् वर्णान् यथोक्तस्थानेषु विन्यस्य-तादृशानेव क्षकारादीनकारान्तान्परतेजसि तत्तत्स्थानयुतान्वर्णान् जुहोमीति बुद्ध्या संहारक्रमेण— विन्यसेत्।

यथा- ओं ह्रीं हंसः सोहं स्वाहेति ललाटे। एवमाकारादिन्यासोपीति सृष्टिः। ओं ह्रीं हूं हंसः स्वाहेति हृदादिमुखे। एवं- लकारादि न्यासोऽपीति संहारः। परतेजसि ध्यातेक्षः स्वाहा ल स्वाहेत्यादिमन्त्रैस्तत्तत्स्थानयुतान् वर्णान् जुहुयादिति। ततो विष्णु मन्त्रोपासकस्तत्वन्यासङ्कुर्यात् सच-विष्णुपूजापरिच्छेदोपक्रमे द्रष्टव्यः।

ततो मूलेन ओंङ्कारक्रमेण वा प्राणायामान् कुर्यात्। तत्र पूरके षोड़श, कुम्भके-चतुःषष्टिः। रेचके -द्वात्रिंशन्मात्राः। तत्र प्रथमप्राणायामे वामनासापुटेन पूरणं दक्षिणेन रेचनम्। द्वितीयादिप्राणायामेषु तत्पूर्वप्राणायामे रेचको येन पुटेन कृतस्तेनैव पूरणम्। तदन्येन तु- रेचके कर्त्त-

न्यः। ततः शरीरे योगपीठन्यासः। हृदये उपर्युपरि। आधारशक्तये नम इत्यादिमन्त्रैः आधारशक्तिप्रकृतिकूर्मानन्त, पृथिवी, क्षीर सिन्धु श्वेत द्वीपमणि मंडप कल्पवृक्षस्याधस्ताद् रत्नवेदिकां दक्षिणांशे रक्तं बृषाकारं धर्मम्। वामांशे-श्यामं सिंहाकारं ज्ञानम्। वामोरौ पीतभूताकारं वैराग्नम्। दक्षिणोरौ-नीलगजाकारमैश्वर्यम। धर्माय नम इत्यादि मन्त्रैन्र्यसेत्। धर्मादीनि च पीठे पादभूतानि, मुखे रक्तं वृषाकारमधर्मम्, वामपार्श्वे- श्यामं सिंहाकारमज्ञानम्। नाभौ भूताकारमवैराग्यम्। दक्षिणपार्श्वे- नीलं गजाकारमनैश्वर्यं न्यसेत्। एतानि पीठे गात्ररूपाणि केषाञ्चिन्मते दक्षिणवामांशदक्षिणवामोरुषु धर्मादीनां मुखकटी दक्षिणवामपार्श्वे स्वधर्मादीनां न्यासः। हृदये उपर्युपरि शेषमानन्दरूपकन्दसम्विन्नान् सर्वतत्त्वमयं पद्मं प्रकृतिमयं पत्रं विकारमय केसरम् पञ्चाशद्वर्णबीजाढ्यकर्णिकाः। तत्रैव अं सूर्यमण्डलाय नमः। तं तपिन्यै नमः। एवम् -स्वस्वाद्यक्षरैः तपिनी, तापिनी, धूम्रा मरीचिः ज्वालिनी,रुचिः सुषुम्णा भोगदा, विश्वा, बोधियी, धामिनी, क्षमाः, सूर्यमण्डल एव। ङं चन्द्रमण्डलाय नमः। तत्र-अं अमृताय नमः एवं मानदा, पूषा, तुष्टि, पुष्टि, रति, धृति, शशिनि चन्द्रिका, कान्ति, ज्योत्स्ना, प्रीत्यङ्गदा, पूर्णा, पूर्णामृताः।

चन्द्रमण्डले – यं वह्निमण्डलाय नमः। धूं धूमार्चिषे नमः। एवम् ऊष्मा ज्वलिनी, ज्वालिनी, विस्फुलिङ्गनी,स्वधा, स्वरूपा, कपिला, हव्यवहा, कव्यवहाः — प्रत्येकं तं तपिन्यादिसूर्यकलाभ्यो नम इति समुदायेन वा न्यसेत्।

वह्निमण्डले — उपर्युपरि सं सत्त्वाय नमः। रं रजसे नमः। तं तमसे नमः। ओमात्मने नमः। ओमान्तरात्मने नमः। ओंपरमात्मने नमः। ह्रीं ज्ञानात्मने नमः। इति सूर्यमण्डलादीनि पूर्वाद्यष्टदिक्षु मध्ये च यथाक्रमं नवपीठशक्तीः सवराभयहस्ताः स्त्रीरूपा विन्यस्य पीठमन्त्रञ्च न्यसेत्। एवम्- न्यस्तपीठे पद्मकर्णिकायां देवन्ध्यायेत्। ततो मन्त्रस्य-ऋषिच्छन्दोदेवताविनियोगान् स्मृत्वा-शिरसि ऋषिम्, रसनायां छन्दः। हृदि देवतां विन्यस्य- अङ्गमन्त्रैः करन्यासङ्कृत्वा अस्त्रमन्त्रेण दिशो बद्ध्वा अङ्गन्यास-

ङ्कुर्यात् । ततश्च यदि मन्त्रन्यासोऽस्ति तदा तं विधाय मूलमन्त्रपुटितान् मातृकावर्णान् यथाक्रमं विन्यस्य ऋष्यादित्रयकराङ्गन्यासान् पुनर्विधायास्त्रमुद्रया दिग्बन्धनङ्कुर्यात् ।

अयञ्च—ऋष्यादिन्यासमारभ्य क्रम औत्सर्गिकः क्वचित्कल्पोक्तक्रमेण बाध्यते । ततो मुद्राः प्रदर्शयेत् । ततो ध्यानम् । तच्च देवतारूपतया सुचिन्तनम् । हृत्कमलकर्णिकायान्देवताचिन्तनम्वा । ततो-देवतारूपतया ध्यातस्यात्मनो मानसैरुपचारैः पूजनम ।

ततोऽर्घस्थापनम् । यथाऽऽत्माग्रतो वामदिशि चतुरस्रं तन्मध्ये षट्कोणम् तन्मध्ये त्रिकोणञ्च समान्यार्घं जलेनैव कृत्वा तत्राग्नेयादिकोणेषु हृदय शिरः शिखा कवचानि, अग्रे नेत्रम् । दिक्ष्वस्त्रं पूजयेत् ।

ततो-मूलेन क्षालितं त्रिपादिकाद्याधारन्तत्र धृत्वा फडिति प्रक्षालितं शङ्खं तत्र वह्निमण्डले धृत्वा नम इति शङ्खे गन्धाद्यष्टकं निःक्षिप्य विलोममातृकया उपान्तस्वरसंयुक्तया इन्दुस्रुतसुधाबुद्ध्या तोयेनापूरयेत् । केषाञ्चिन्मते -- मातृकान्ते मूलमन्त्रस्यापि पाठः । तत आधारं वह्निमण्डलतया शङ्खं सूर्यमण्डलतया-सलिलं सोममण्डलतया विचिन्त्य तेषु वह्नि, सोम, सूर्य, कलाश्चिन्तयेत् ।

ततो मं दशकलात्मने वह्निमण्डलाय नम इत्याधारं अं द्वादशकलात्मने सूर्यमण्डलाय नम इपि शङ्खम् । ङं षोड़शकलात्मने चन्द्रमण्डलाय नम इति सलिलम् । सम्पूज्य —

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिकुरु ॥

इति मन्त्रेण - रविमण्डलात्तीर्थहृदयाद्देवताञ्चावाह्य बषडिति गालिनीमुद्रान्दर्शयित्वा तज्जलं वौषडिति निरीक्ष्य हुमिति करद्वयेनावगुण्ठ्य धेनुमुद्रयाऽमृतीकृत्य मूलेनाभिमन्त्र्याङ्गन्यासेन सकलीकृत्यास्त्रमन्त्रेण दिग्बन्धनेनाभिरक्ष्य, शङ्खमुद्रयाऽवष्टभ्य योनिमुद्रयोद्दीप्य नम इति गन्धादिना तत्रेष्टदेवतामभ्यर्च्य देवस्वरूपीकृतं मत्स्यमुद्रयाऽऽच्छादितं तज्जलं स्पृशन् अष्टशो मूलं जपेत् ।

ततोऽर्घस्य दक्षिणतः प्रोक्षणीं पात्रन्धृत्वा वारिणा परिपूर्य्य शङ्खोदकन्तत्र किञ्चिद्दत्वा तदुदकेनात्मानं पूजाद्रव्याणि च मूलमन्त्रेण वारत्रयं हस्तेनाभिषिञ्चेत्। अर्घस्योत्तरतः पाद्यम्, तदुत्तरत आचमनीयादिकञ्च कल्पयेत्, तेषां स्वरूपाणि बाह्यपूजावसरे दर्शनीयानि।

अथान्तरपूजा

तत्र मूर्ध्नि गुरुम्, आधारे गणेशम् हृदयादौ च यथान्यासमाधारशक्त्यादिपीठान्तम्। मूलाधारे, हृदये, भ्रूमध्ये देवतातेजस्समभ्यर्च्य तड़ित्प्रभन्तत्तेजस्त्रयं बीजेनैकीकृत्यासनाद्युपचारं भूषणान्तं हृदयेऽभ्यर्च्य देवशरीरे षड्ङ्गं पञ्चाङ्गम्वा यथाकल्पं रसादिकञ्चाभ्यर्च्यमूलेन गन्ध पुष्पाभ्यामभ्यर्च्याञ्जलिपञ्चकन्दद्यात्।

तत्र उत्तमाङ्गहृदयधारपादसर्वाङ्गेषु यथाक्रमं किञ्चित् पुष्पाञ्जलय इत्येके। दक्षिणपादे श्वेतचन्दनानुलिप्तश्वेततुलस्या वामपादे रक्तचन्दनानुलिप्तकृष्णतुलस्या हृदि चन्दनद्वयसिक्तपद्मद्वयेन, सर्वाङ्गेषु चन्दनद्वयसिक्ततुलसीद्वयकरवीरपद्म द्वयैस्तेषु श्वेतचन्दनसिक्तानि श्वेतानि दक्षिणभागे। इत्येवमञ्जलिपञ्चकमित्यपरे। इदञ्च विष्णुपूजामात्रविषयमिति प्रतिभाति।

ततो धूपादिभिर्नैवेद्यातिरिक्तैः पूजयित्वा विन्दुस्रुतसुधाबुद्ध्या जलेन देवं प्रीणयित्वावासोयुगन्दत्वा पुनर्गन्धादिभिरभ्यर्च्य ताम्बूलनर्त्तनवाद्यैस्सन्तोष्य ओमितः पूर्वं प्राण, बुद्धि, देहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतन्तत्सर्वम्ब्रह्मार्पणम्भवतु स्वाहा, मां मदीयञ्च सकलं हरये समर्पये। ओम तत्सदिति मन्त्रेण ब्रह्मार्पणम्विधाय प्राणायामत्रयङ्कृत्वा सुप्रसन्नान्देवताम्भावयन् मन्त्रञ्जपेत्।

ततःप्रणवपुटितं बीजमष्टोत्तरशतं जप्त्वा प्राणायामत्रयङ्कुर्यात् ततः गुह्येत्यादि वक्ष्यमाणमन्त्रेण देवताहस्ते चुलुकोदकेन जलं समर्पयेत्। अत्र पूजायां सर्ववारिप्रयोजनं प्रोक्षिणीवारिणैव विधातव्यम्। प्रोक्षिणीतोयं विसृज्य

जलान्तरेण तां पूरयित्वा किञ्चदर्घाय दद्यात् ।

अथ ब्राह्मपूजा

स्वर्णादिपात्रे कल्पोक्तं यन्त्रम्; तदभावे चतुर्द्वारभूपुराच्च तमष्टदल-पद्मं लिखेत् । ततः एकत्रैव पञ्चदेवता पूजापक्षे इष्टदेवतातिरिक्तदेवता-चतुष्टयं कोणचतुष्टये पूजयेत् । कोणनियमश्च प्रमाणपरिच्छेदे द्रष्टव्यः । ततः पीठस्योत्तरतो वायव्यादीशानपर्यन्तम्-गुरुपरगुरु अपरगुरु परापर-गुरून्; दक्षिणे दण्डपाशाङ्कुशाभयकरं गणेशम् मध्ये, उपर्युपरि आधारशक्ति-प्रकृतिकमानन्तपृथिवीक्षीरसिन्धुश्वेतद्वीपमण्डपकल्पवृक्षान्, कल्पवृक्षस्याधो रत्नवेदिकां च पजयेत् ।

तत्र कूर्मशिलारूढ़ा श्वेता पद्मद्वयधारिण्याधारशक्तिस्तन्मूर्ध्नासीनो नीलः कूर्मस्तदूर्ध्वं ब्रह्मशिलासीनः मूर्ध्नि पृथिवीन्धारयन् चक्रधरः श्वेतोऽनन्तः तदुपरीइन्दीवरधारिणी नीलवर्णा पृथिवी ध्यातव्या ।

ततः पीठस्याग्नेयादि कोणेषु रक्तं वृषाकारं धर्मम्, श्यामं सिंहाकारं ज्ञानम्, पीतं भूताकारं वैराग्यम्, नीलकुञ्जाकारमैश्वर्यम्, एतानि पीठ-पादभूतानि, पीठस्य पूर्वापादक्षगात्रभूतानि अधर्माज्ञानावैराग्यानैश्वर्याणि धर्मादितुल्यरूपाणि पूजयेत् ।

मध्ये उपर्युपरि शेष आनन्दकन्दसम्मिलितान् सर्वतत्त्वमयपद्मप्रकृति-पत्रविकारमयकेसरपञ्चाशद्वर्णबीजाढ्यकर्णिकाः चतुर्थीनमोन्तनाम्ना पूज-नीयाः । ततः अं सूर्यमण्डलाय नमः, तं तपिन्यै, नमः, एवं तापिनी, धूम्राः मरीचिर्ज्वालिनी; रुचि; सुषुम्ना; भोगदा; विश्वा, बोधिनी, धरिणी, क्षमा अपि पूजयेत् । तत्रैव ङं चन्द्रमण्डलाय नमः । अं अमृतायै नमः एवं मानदा पूषा, तुष्टि; पुष्टि; रति; धृति; शशिनी; चन्द्रिका; कान्ति; ज्योत्स्ना; प्रत्यङ्गदा; पूर्णा; पूर्णामृताः पूजयेत् ।

तत्रैव मं वह्निमण्डलाय नमः । धूं धूमार्चिषे नम एवं-ऊष्मा; ज्वालिनी; विस्फुलिङ्गिनी शुभ्रा; स्वरूपा, कपिला; हव्यवाहा; कव्यवाहाश्च पूजयेत् ।

सं सत्त्वाय नम इति श्वेतसत्त्वम् । रं रजसे नम इति रक्तम् । तं तमसे नम इति श्यामम् । ओमात्मने नमः, ओं परमात्मने नमः ज्ञानात्मने नमः इति मन्त्रैरात्मचतुष्कम् । पूर्वाद्यष्टदिक्षु केसरेषु मध्ये च सवराभयहस्ताः स्त्रीरूपाश्च कल्पोक्ताः पीठशक्तिर्नवधा पूजयेत् । ताश्च क्रमेण श्वेता; कृष्णा रक्ता पीता; श्यामा; रक्ता, शुक्ला, श्यामारक्ता ध्यातव्याः । इदञ्च धर्मादिपीठान्तपूजनं कल्पेषु विशेषानुक्तौ ।

ततः पीठमन्त्रेण पीठमभ्यर्च्य कल्पोक्तमन्त्रेण तदभावे मूलमन्त्रेण मूर्तिं परिकल्प्य मूलमुच्चार्य्यामुकमूर्त्तये नम इति कल्पतरुच्छायायां मूर्तिं पूजयित्वाकल्पोक्तस्वरूपान्देवतान्ध्यात्वा मूलाधारे दीपकलिकानिभं देवतातेजश्चिन्तयित्वा मूलमन्त्रेण सुषुम्नावर्त्मना सदाशिवे संयोज्य ललाटान्तमानीय पूर्णचन्द्रनिभं चिन्तयित्वा कर्णिकस्य स्वरद्वन्द्वात्म कशोभमाननकेसराष्टकस्य कचट तप य श ल वर्गाष्टकमहिताष्टपत्रस्य दिगात् वकारकोणगतचकारभूपुरावृत्तस्य मातृकाम्भोजस्याभिन्नतया ध्याते उत्तानाञ्जलिना पुष्पसञ्चये प्रवहनाड्यां तत्ताद्देवतातेजस्संयोज्य परिकल्पितमूर्त्तौ तस्यावाहनस्थापनसन्निधापन सन्निबोधनसकलीकरणावगुण्ठनामृतीकरणपरमीकरणानि तत्तन्मुद्राभिर्विदध्यात् ।

आवाहनादिस्वरूपं मुद्राश्च प्रमाणपरिच्छेदेऽनुसन्धनीयाः । ततो देवशरीराद्बहिर्भूतं स्फुलिङ्गाकारं परिवारगतञ्चिन्तयित्वातदीयस्थानेषूपवेशयेत् । ततो मूलमुच्चार्य्य इदमासनममुकाय नम इत्यासनन्दत्वा जलन्दद्यात्। एवमग्रेष्युपचारान्तरेषु विशिष्य मन्त्रादिनिर्देशमन्त्रो द्रष्टव्यः ।

जलदानञ्च सर्वोपचारानन्तरम्विधेयम् । यश्चोपचारो न सम्पद्यते तदात्मतया पुष्पमेव दद्यात्, मनसैव वा दद्यात् । ततस्स्वागतम् कुशलञ्च पृष्ट्वा मूलमुच्चार्य्य इदं पाद्यममुकाय नम इति पादयोःश्यामाक दूर्वाब्जविष्णुक्रान्तजलात्मकं पाद्यन्दद्यात् । मूलमुक्त्वा इदमाचमनीयममुकाय स्वधेति मुखे त्रिवारं जातीलवङ्गकल्लोलजलरूपमाचमनीयम् वौषण्नम इति मुकुटोपरि पुष्पम् । मूलानन्तरमेषोर्घ अमुकाय स्वाहेति शिरसि गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वाजलात्मकमर्घं मूलमुच्चार्य्य एष मधुपर्क्कः अमुकाय स्वधेति मुखे दधिमध्वाज्यात्मकमधुपर्क्कम् ।

पूर्वोक्ताचमनीयमन्त्रेण जलात्मकं पुनराचमनीयं गन्धोदकं स्नानीयं गात्रमार्ज्जनं यथोचितवस्त्रं यज्ञोपवीतम् हारादि भूषणानि च दत्वा गन्धपुष्पाभ्यां मन्त्रघटितमातृकावर्णैस्तेषु तेषु स्थानेषु देवतां सम्पूज्य देवताशरीरे हृदये शिरःशिखाकवचनेत्रास्त्ररूपं षडङ्गं पञ्चाङ्गं वा सम्पूज्य कल्पेषु विभूत्यादिपूजाविधौ तान्विधाय गन्धन्दत्वा आचारादृवारत्रयं मूलेन पुष्पैर्देवतां सम्पूज्य मूलेनैव पुष्पाञ्जलिपञ्चकन्दद्यात् ।

तत्र च उत्तमाङ्गहृदयमूलाधारचरणसर्वाङ्गेषु यैः कैश्चित्प्रशस्तपुष्पैरञ्जलिपञ्चकमित्येके । अपरे तु श्वेततुलस्या दक्षिणपादे, कृष्णतुलस्या वामपादे, श्वेतरक्तकरवीराभ्यां हृदि, श्वेतरक्तपद्माभ्यां मूर्ध्नि, सर्वाङ्गेषु सर्वत्र श्वेतचन्दनसिक्तानि दक्षिणभागे। अपराणि रक्तचन्दनसिक्तानि वामभागे दातव्यानीत्यपि पञ्चकमित्याहुः । इदन्तु विष्णुपूजाविषयतया प्रतिभाति । ततः कल्पोक्तावरणान्तराणि सम्पूज्यान्ते लोकपालान्तदस्त्राणि च पूजयेत् । तद्यथा —

पूर्वस्यान्दिशि इन्द्राय वज्रहस्ताय सुराधिपतये ऐरावतवाहनाय साङ्गाय सपरिवाराय नम इति वा इन्द्राय वज्रहस्ताय सुराधिपतये सवाहनपरिवाराय नम इति वा, सुराधिपतये साङ्गाय सायुधाय सवाहनाय सपरिवाराय नम इति वा इन्द्रं पूजयेत् । एवमग्रेऽप्यूहनीयम् ।

आग्नेय्याम् – अग्नये शक्तिहस्ताय तजोधिपतये मेषवाहनाय साङ्गाय सपरिवाराय नमः ।

दक्षिणस्याम् – यमाय दण्डहस्ताय तजोधिपतये महिषवाहनाय साङ्गाय सपरिवाराय नमः ।

नैर्ऋत्याम् – निर्ऋतये खड्गहस्ताय रक्षोधिपतये प्रेतवाहनाय साङ्गाय सपरिवाराय नमः ।

पश्चिमायाम् — वरुणाय पाशहस्ताय जलाधिपतये मकरवाहनाय साङ्गाय सपरिवाराय नमः ।

वायव्याम् — वायवेऽङ्कुशहस्ताय प्राणाधिपतये मृगवाहनाय साङ्गाय सपरि-

वाराय नमः।

उत्तरस्याम् - सोमाय गदाहस्ताय नक्षत्राधिपतये उरगवाहनाय साङ्गाय सपरिवाराय नमः।

ऐशान्याम् – ईशानाय शूलहस्ताय विद्याधिपतये बृषभवाहनाय साङ्गाय सपरिवाराय नमः।

निर्ऋतिवरुणयोर्मध्ये-अनन्ताय चक्रहस्ताय नागाधिपतये कूर्मवाहनाय साङ्गाय सपरिवाराय नमः।

ईशानेन्द्रयोर्मध्ये ब्रह्मणे पद्महस्ताय लोकाधिपतये हंसवाहनाय साङ्गाय सपरिवाराय नमः इति पूजयेत्। ध्यानञ्चेन्द्रादीनां प्रसिद्धमन्त्रानुसाराभ्यामवगन्तव्यम्। वर्णस्तु तेषाम्-कनक, कपिश, श्याम, श्वेत धूम्रामलसित, शुचि, रक्ता, वर्णतो वासराद्याः एतदनुसारेण ज्ञेयम्।

ततस्तेषां वहिस्तेषामस्त्राणि, तत्र-पीतवर्णं वज्रम्, श्वेता शक्तिः, श्यामो-दण्डः, नीलः-खड्गः, कपिशः पाशः, रक्तोऽङ्कुशः, श्वेता-गदा, नीलं-शूलम्, रक्तम् चक्रम्, अरुणं पद्मम्, सर्वाण्येतानि शक्तिगदे विहाय पुरुषरूपाणि, मुकुटनिर्मितस्वस्वनामकायुधचिह्नानि, स्वस्वनामकायुधहस्तानि यथोक्तवर्णानि ध्यात्वा वज्राय नम इति मन्त्रैः पूजनीयानि।

ततोऽगुरुशीरगुग्गुलुशर्करामधुचन्दनानां घृतमिश्राणां धूमं धूपं गन्धाक्षतकुसुमार्च्चितं घण्टां वामहस्तेन वादयन् दक्षिणहस्तेन देवतायाधस्ताद्दद्यात्। सर्पिषा तैलेन वा कर्पूरगर्भवर्त्तिं प्रक्षाल्य मस्तकादुपरि दत्त्वा पुष्पाञ्जलिम्विधाय नैवेद्यार्थं पाद्याचमनीये दत्वा नैवेद्यं संस्कुर्वीत।

यथास्वर्णादिपात्रस्थं नैवेद्यमभ्युक्ष्य ओङ्कारेण तत्र पुष्पं क्षिप्त्वा चक्रमुद्रयाऽभिरक्ष्य यमिति क्षिप्तेन तोयेन शोधयित्वा दक्षिणकरेण स्पृष्ट्वा वमिति मन्त्रेण सुधारसपूर्णं विभाव्य मूलेनामृतीकृत्य स्पृष्ट्वाऽष्टशो मूलमन्त्रञ्जप्त्वा धेनुमुद्रया पुनः सुधापूर्णं विचिन्त्य गन्धादिभिरभ्यर्चयेत्। इति तत्संस्कृत्य अञ्जलिम्बद्ध्वा नैवेद्यभक्षणार्थन्देवतां याचेत्।

ततस्तन्मुखाद्विनिःसृतन्तेजो विचिन्त्य स्वाहान्ते मूलेन तत्र जलं क्षिपेत्। अथामृतात्मकं नैवेद्यं सकुसुमं कराभ्यामुद्धृत्य निवेदयामि भवते जुषाणेदं

हविरमुकेत्यर्पयेत् । देवीपूजायां स्त्रीलिङ्गोहः कर्त्तव्यः ।

ततोऽमृतोपस्तरणमसि स्वाहेत्यपोशानन्दत्वा वामकरेण ग्रासमुद्रान्दर्शयेत् प्राणादिमन्त्रेण तत्तन्मुद्राः दक्षिणहस्तेन प्रदर्शयेत् । तद्यथा ओं प्राणाय स्वाहा अत्राङ्गुष्ठाग्रेण कनिष्ठानामिकयोः स्पर्शः । ओमपानाय स्वाहा, अत्र तर्ज्जनीमध्यमाऽनामिकानाम् । ओं समानाय स्वाहा अत्र सर्वासामङ्गुलीनामङ्गुष्ठाग्रेण स्पर्शः ।

ततः करयोरनामिकेऽङ्गुष्ठाभ्यां स्पृशन् ध्वोंनमः पराया वामनेऽनिरुद्धाय नैवेद्यङ्कल्पयामीति नैवेद्यमन्त्रञ्जपेत् पूजाविशेषेषूहः कर्त्तव्यः । ततो घण्टावादनपूर्वकं नीराजनम्विधाय धेनुमुद्रया पानीयममृतीकृत्य अमृतापिधानमसि स्वहेति पुनरपोशानन्दत्वा जलान्तरञ्च दत्वा देवतातेजस्तन्मुखे उद्वास्य नैवेद्यं गतसारं विचिन्त्योद्धृत्य ऐशान्यामुच्छिष्टभोजिने किञ्चिद दद्यात् ।

उच्छिष्टभोजिनश्च-विष्णोर्विष्वक्सेनः । भानोस्तेजश्चण्डः, शक्तेश्चण्डेश्वरी, शिवस्य चण्डेशः, गणेशस्य-लम्बोदर इति ।

ततो नैवेद्यस्थानमुपलिप्य-देवतायै-गडूषदन्तधावनाचमनीय - हस्तानुलेप-हस्तमार्जनोय-मुखवासक-माल्य गन्ध भूषण ताम्बूलादि तत्कालोचितन्दत्वा-गीतादिना सन्तोष्य-सपरिवारान्देवतां गन्धादिभिष्प्रदीपान्तैरुपचारैः पञ्चोपचारैर्वाऽभ्यर्च्यार्घन्दत्वा पुष्पाञ्जलिन्दद्यात् । ततः स्तुत्वा प्रदक्षिणीकृत्याष्टाङ्गम् पञ्चाङ्गम्वा प्रणमेत् ।

विष्णुपूजायान्तु-इतःपूर्वं प्राणबुद्धीत्यादिपूर्वोक्तमन्त्रेण चुलुकाम्भसा ब्रह्मार्पणङ्कुर्यात् । प्रणायामत्रयङ्कृत्वा-सुप्रसन्नान्देवताञ्चिन्तयन् यथाशक्ति अष्टोत्तरशतं सहस्रं वा दश वा जप्त्वा तज्जपन्दक्षिणे देवताहस्तेऽर्घे शेषजलेन समर्पयेत् । तत्र मन्त्रः—

ओं गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्त्वयि स्थिते ॥

अनेन कृतजपेनामुको मे प्रीयतामितिवा । पुरुषपूजायां पुल्लिङ्गोहः कर्त्तव्यः । ततः प्राणायामत्रयंकृत्वा छत्रादि राजोपचारै स्तोषयित्वा-उपसंहार-मुद्रया परिवारगणं देवताशरीरे उपसंहृत्य-अमुक क्षमस्व स्वस्थानङ्गच्छेति विसृज्य व्यापकत्रयङ्कृत्वा पुष्पमाघ्राय-सुषुम्णा वर्त्मना देवताहृदयाम्बुजं नीत्वा-इह प्राणायामत्रयङ्कृत्वा-गुरोर्नमस्कारत्रयं कुर्यात् ।

अथात्र संक्षेपः

आचम्य—तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञान्दातुमर्हसि ॥

इति भैरवानुज्ञां गृहीत्वा कुशाजिनकम्बलोत्तरमासनं वेदिकायां विन्यस्य जलेनाभ्युक्ष्य तत्रासने-आधारशक्ति, प्रकृति, कूर्मानन्त, पृथिवीस्सम्पूज्य-पृथ्वीत्यादिमन्त्रस्य मेरुपृष्ठऋषिः सुतलं छन्दः कूर्मो देवता आसने विनियोगः । इति स्मृत्वा—

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुनाधृता ।
त्वञ्च धारय मां भद्रे पवित्रङ्कुरु चासनम् ॥

इति जपन्नासने समुपविश्य स्वस्तिकपद्मासनयोरन्यतरम्बद्ध्वा यथा सन्निवेशं पूजाद्रव्याणि स्थापयित्वा अञ्जलिम्बद्ध्वा-वामे गुरुं दक्षिणतो गणेशञ्च नमस्कृत्य-सहस्रारं वषट् इति रक्षां विधाय सुगन्धि पुष्प मर्दनेन हस्तौ सुरभीकृत्य पुष्पं नाराच मुद्रया उत्तरतः क्षिपेत् ।

ततः अस्त्रमन्त्रेण करौ संशोध्य तेनैव ऊर्ध्वोर्ध्वं तालत्रयं दिग्बन्धनञ्च कृत्वा-वमिति मन्त्रेण वह्नितया ध्यातजलेनात्मानं वेष्टयित्वा हृत्पद्मकर्णिकास्थं जीवात्मानं सोहमिति मन्त्रेण सुषुम्णा वर्त्मना सहस्रदल-कमलावस्थिते परमात्मनि संयोज्य आकाश, वायु, तेजो, जल, पृथिवी, श्रोत्र, त्वक्, चक्षु, रसन, घ्राण, मुख, पाणि, पाद, पायूपस्थ, शब्द, स्पर्श, रूप, रस, गन्ध, वचना,दान, गति, विसर्गानन्द, रूप पञ्चविंशति-

तत्त्वानि व्युत्क्रमाद्बीजभावेन तत्रैव लीनानि विचिन्त्य वामनासापुटे यमिति वायुबीजं धूम्रं वायुमण्डलस्थं विचिन्त्य वायुना ऐक्यं सम्भाव्य पूरकं कृत्वा कुम्भके शुष्कं शरीरं विचिन्त्य दक्षिणपुटेन वायुं रेचयेत् ।

ततो दक्षिणपुटे यमिति वह्निबीजं रक्तं वह्निमण्डलस्थं नीलमारुतं विचिन्त्य-वह्निना ऐक्यं सम्भाव्य-पूरके वह्निपूर्णशरीरं विचिन्त्य कुम्भके दग्धं चियन्तयित्वा वामपुटेन भस्मनाऽत्मयुक्तं विचिन्त्य वमिति चन्द्रबीजं श्वेतं जलमण्डलस्थं विचिन्त्य अमृतेनैक्यं विभाव्य पूरके यमिति बीजं ललाटचन्द्रं नीत्वा कुम्भके वमित्यमृतवीजेब चन्द्रात्सकल वर्णमयी ममृत वृष्णिन्निपात्य दोषजातं संशोध्यापादतलमस्तकममृते नाप्लाव्य दक्षिणपुटेन वायुं रेचयेत् । सर्वत्र पूरके षोड़श मात्रया, कुम्भके चतुःषष्ठि मात्रया रेचके-द्वात्रिंशान्मत्रया. तत्तन्मन्त्राजपः । तनन्तत्त्वानि स्वस्व स्थानं नीत्वा तत्तत्क्रमेण जीवात्मानं परमात्मसमीपात् स्वस्थानमानयेदिति भूतशुद्धिः ।

अथ मातृकान्यासः

ललाटे - अ, मुखवृत्ते - आ, दक्षिणवामक्रमेण नेत्रयोः - इ, ई एवं कर्णयोः उ ऊ, नासिकयोः - ऋ ॠ । गण्डयोः ऌ, ॡ । ओष्ठाधरयोः ए ऐ । ऊर्ध्वाधो दन्तपङ्क्त्योः ओ औ, शिरसि - अं, मुखे - अः । दक्षिणवाहोस्सन्धिचतुष्टये क ख ग घ, अङ्गुल्यग्रे - ङ । वामवाहोस्सन्धि चतुष्टयेच, छ, ज, झ, अङ्गुल्यग्रे दक्षिणपादस्य सन्धिचतुष्टये ट, ठ, ड ढ, । अङ्गुल्यग्रेण वामपादस्य सन्धिचतुष्टये - त, थ, द, ध, अङ्गुल्यग्रे न, पार्श्वयोः - प, फ । पृष्ठे - ब । नाभौ - भ, उदरे - म । हृदि - य । दक्षिणांशे— र । ककुदि – ल । वामांशे - व । पायूपस्थयोः - श, ष । हृदादि पादयोः - स, ह । जठरे . ल । मुखे - क्ष । इति न्यसेत् । इति सृष्टिः ।

टकारादि क्षकारान्तान् विन्दुविसर्गसहितान्विन्यस्य-अकारादि ञकारान्तान् तादृशानधिकान् क्षकारादिनकारान्तान् सविन्दुकान् वर्णान् न्यसेदिति संहारक्रमः ।

एतत्त्रयं सृष्टिमात्रं बा विधाय विष्णुमात्रं केशवादि मूर्त्ति कीर्त्यादि शक्तिसहितां श्रीवीजं केशवकीर्त्यादिसहिताञ्च मातृकां न्यस्य तत्र तत्वन्यासेऽधिकारापादकः अपरन्यासौ च काम्यौ। तेच विष्णुमन्त्रपरिच्छेदोपक्रमे द्रष्टव्याः।

ततो मूलेनोङ्कारेण वा प्राणायामान्कुर्यात। तत आन्तरपूजापक्षे शरीरे योगपीठन्यासः। यथा-दक्षिणांशे-धर्मम्, वामांशे ज्ञानम्, वामोरौ वैराग्यम्। दक्षिणोरौ ऐश्वर्यम्। मुखेऽधर्मम्, वामपार्श्वेऽज्ञानम्, नाभाववैराग्यम्। दक्षिणपार्श्वेऽनैश्वर्यम् विन्यस्य-अं सूर्यमण्डलाय नमः, सूर्यकलाभ्यो नमः सूर्यमण्डले। उं सोममण्डलाय नमः सोमकलाभ्यो नमः। सोम मण्डले। मंवह्नि मण्डलाय नमः वह्निकलाभ्यो नमः। वह्निमण्डले संसायत्त्व नमः, षं रजसे नमः, तं तमसे नमः। अं आत्मने नमः। अं अन्तरात्मने नमः। पं परमात्मने नमः। ह्रीं ज्ञानात्मने नम इति विन्यस्य केशवाद्यष्टमध्येषु कल्पोक्तपीठशक्ति विन्यस्य पीठमन्त्रं न्याससमये तत्रस्थं देवञ्चिन्तयेत्।

ततो मन्त्रस्य ऋषिच्छन्दोदेवताविनियोगान् स्मृत्वा शिरसि ऋषिम्, रसनायाम् छन्दो हृदि देवताञ्च विन्यस्य कल्पोक्ताङ्गमन्त्रैः करन्यासं कृत्वा तदस्त्रमन्त्रेणैव दिशो बध्वा हृदयादिष्वङ्गन्यासङ्कुर्यात। ततो यदि मन्त्रादिन्यासोऽस्ति तदा तान्विधाय पुनरपि ऋष्यादित्रयकराङ्गन्यासान् कृत्वाऽस्त्रमुद्रया दिग्वन्धनङ्कुर्यात्।

अथवा भूतशुद्धिम्विधाय मन्त्रस्य ऋषिच्छन्दोदेवताः स्मृत्वा ऋष्यादिन्यासङ्कृत्वा प्राणायामान् कुर्यात्। ततो मातृकान्यासः कल्पोक्तन्यासान्तरञ्च विधाय योगपीठन्यासं कुर्यात्। एतौ च क्रमौ कल्पेषु विशेषानुक्तौ द्रष्टव्यौ। ततो मुद्राः प्रदर्श्य देवं कल्पोक्तरूपन्ध्यायेत्। ततो देवरूपत्वेन ध्यातस्यात्मनो मानसैरुपचारैः पूजनम्।

ततोऽर्घस्थापनम्। अस्त्रमन्त्रेण शङ्खं प्रक्षाल्य वामतो वह्निमण्डले स्थापयित्वा नम इति गन्धपुष्पाक्षतादिनिःक्षिप्य सविन्दुविलोममातृकामन्त्रेण मूलेन च विन्दुस्रुतसुधाबुध्या तोयैरापूर्य आधारं वह्निममण्डलतया शङ्खं सूर्यमण्डलतया तोयं सोममण्डलतया विचिन्त्य तेषु वह्निसूर्यसोम-

कलाश्चिन्तयेत्। ततो मं दशकलात्मने वह्निमण्डलाय नमः । अं द्वादश कलात्मने सूर्यमण्डलाय नमः। ऊं षोडशकलात्मने चन्द्रमण्डलाय नम इति मन्त्रेण सम्पूज्य -

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिङ्कुरु ॥

इति तीर्थमन्त्रेण सूर्यमण्डलादङ्कुशमुद्रया तीर्थंहृदयकमलादेवताञ्चावाह्य वषडिति गालिनीं मुद्रान्दर्शयित्वा वौषाडिति जलं निरीक्ष्य हुमिति करद्वयेनावगुण्ठ्य धेनुमुद्रयाऽमृतीकृत्य मूलेनाभिमन्त्रय षडङ्गन्यासेन सकलीकृत्यास्त्रेणाभिरक्ष्य शङ्खमुद्रयाऽवष्टभ्य योनिमुद्रयोद्दीप्य नम इति गन्धादिना तत्रेष्टदेवतां सम्पूज्य देवतास्वरूपं तज्जलं मत्स्यमुद्रयाऽच्छाद्य स्पृशन्नष्टशो मूलं जपेत् ।

ततोऽर्घस्य दक्षिणतः प्रोक्षिणीपात्रम्वारिणा परिपूर्य्यार्घाबिकं किञ्चित्तत्र दत्वा तदुदकेनात्मानं पूजाद्रव्याणि मण्डलञ्च मूलेन वारत्रयं हस्तेनाभिषिञ्चेदिति। अर्घस्योत्तरतः पाद्यम् तदुत्तरत आचमनीयादिकञ्च कल्पयेत् ।

अथवाऽस्तरणद्रव्यैरान्तरपूजा—मूर्ध्नि गुरुम्, मूलाधारे गणेशमंशादिषु यथान्यासं धर्मादीन् पीठस्थान् सम्पूज्य मूलाधारे हृदि भ्रूमध्ये च देवतातेजस्समर्च्य तडित्प्रभन्तत्तेजस्त्रयं बीजेनैकीकृत्यासनादिभिर्भूषान्तैरभ्यर्च्य यथाकल्पन्देवताशरीरे षडङ्गं पञ्चाङ्गं वा विभूत्यादिकञ्चाभ्यर्च्य मूलेन गन्धपुष्पाभ्यां संपूज्योत्तमाङ्गहृदयाधारपादसर्वाङ्गेषु प्रशस्तपुष्पाञ्जलिपञ्चकन्दद्यात् ।

गोपालपूजायान्तु —दक्षिणपादे श्वेततुलस्या वामपादे श्यामतुलस्या हृदि श्वेतरक्तकरवीराभ्याम्, शिरसि श्वेतरक्तपङ्कजाभ्याम्, सर्वाङ्गेषु श्वेतकृष्णतुलसीं श्वेतरक्तकरवीरैः श्वेतरक्तपङ्कजैः पुष्पाञ्जलिपञ्चकम् ।

तत्र श्वेतचन्दनसिक्तानि श्वेतपुष्पाणि दक्षिणभागे, रक्तचन्दनसिक्तानि रक्तपुष्पाणि वामभागे । ततो धूपादिभिर्नैवेद्यातिरिक्तैः

पूजयित्वा बिन्दुस्रुतसुधाबुध्या जलेन देवं प्रीणयित्वा मुखवासाद्यन्दत्वा पुनर्गन्धादिभिरभ्यर्च्य ताम्बूलगीतवाद्यादिभिस्सन्तोषयेत् ।

विष्णुपूजायान्तु --

इतःपूर्वं प्राण, बुद्धि, देह, धर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतम् यदुक्तम् यत्कृतम् तत्सर्वंम्ब्रह्मार्पणम्भवतु स्वाहा, मां मदीयञ्च सकलं हरये समर्पयेत् । ततः प्राणायामत्रयं कृत्वा सुप्रसन्नान्देवताम्भावयन्मन्त्रञ्जपेत् । ततः प्रणवपुटितं बीजमष्टोत्तरशतं जप्त्वा प्राणायाम त्रयं कुर्यात् । ततः—

गुह्यातिगुह्य गोप्त्री त्वङ्गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे मातस्त्वत्कृतिः परमेश्वरि ॥

इति जपं समर्पयेत् । पुरुषपूजायां पुल्लिङ्गोहः कर्त्तव्यः ।

अत्र पूजायां सर्वत्र बारिप्रयोजनं प्रोक्षणीजलैरेव कर्त्तव्यम् । प्रोक्षणीजलं विसृज्य पुनरुदकान्तरेण तां पूरयित्वा किञ्चिदर्घाद्यन्तेनैव दद्यात् ।

अथ बाह्यपूजा

सुवर्णादिपात्रे कल्पोक्तं यन्त्रम तदभावे त्वाचाराच्चतुर्द्वारभूपुरावृत्तमष्टदलपद्मं लिखेत । तत एकत्रैव पञ्चदेवतापूजापक्षे इष्टदेवतातिरिक्तदेवताचतुष्टयं कोणचतुष्टये पूजयेत् । तत्र कोणनियमः प्रमाणपरिच्छेदे द्रष्टव्यः ।

ततः पीठस्योत्तरतो वायव्यादीशानपर्यन्तं गुरुपरगुरुपरापरगुरून्, दक्षिणे - गणेशम्, मध्ये - उपर्युपरि आधारशक्तिप्रकृतिकूर्मानन्तपृथिवीक्षीरसिन्धुरत्नद्वीपमणिमण्डपकल्पवृक्षान्, कल्पवृक्ष धः रत्नवेदिकाम्, पीठस्याग्नेयादिकोणेषु - धर्मज्ञानवैराग्यैश्वर्याणि, पूर्वादिदिक्षु - अधर्माज्ञानावैराग्यानैश्वर्याणि, मध्ये - उपर्युपरि - अनन्तानन्दकन्दसंविन्नालसर्वतत्त्वात्मकपद्मम्, प्रकृतिमयपत्रम्, विकारमयकेसरम्, पञ्चाशद्वर्णबीजाढ्यकर्णिकाः ।

अं सूर्यमण्डलाय नमः, तं तपिन्यादिसूर्यकलाभ्यो नमः, सूर्यमण्डले। ङं सोममण्डलाय नमः, तत्रैव अं अमृतादिसोमकलाभ्यो नमः, सोममण्डले। मं वह्निमण्डलाय नमः, तत्रैव - धूं धूम्रार्च्चिरादिवह्निकलाभ्यो नमः, वह्निमण्डले। सं सत्त्वाय नमः। तदुपर्युपरि रं रजसे नमः। तं तमसे नमः। आं आत्मने नमः। अं अन्तरात्मने नमः। प परमात्मने नमः। ह्रीं ज्ञानात्मने नमः इति सम्पूज्य पूर्वादिकेसरेषु, मध्ये च - कल्पोक्ता नवपीठशक्तीः पीठमन्त्रेण पीठञ्चाभ्यर्च्य कल्पोक्तमन्त्रेण तदभावे - मूलेन मूर्त्तिम्परिकल्प्य मूलमुच्चार्य्यामुकमूर्त्तये नम इति कल्पतरुच्छायायां मूर्त्तिं पूजयित्वा कल्पोक्तरूपां देवतां ध्यात्वा मूलाधारे दीपकलिकानिभं देवतातेजश्चिन्तयित्वा मूलमन्त्रेण सुषुम्णावर्त्मना सदाशिवे संयोज्य ललाटान्तमानीय पूर्णचन्द्रनिभं चिन्तयित्वा करस्थपुष्पसञ्चये मातृकाम्भोजतया ध्याते प्रवहन्नाड्यां संयोज्य परिकल्पितमूर्त्तौ तस्यावाहनस्थापनसन्निधानसन्निरोधनसम्मुखीकरणसकलीकरणावगुण्ठनामृतीकरणपरमीकरणानि तत्तन्मुद्राभिर्विदध्यात्।

ततो देवशरीराद्बहिर्भूतं स्फुलिङ्गाकारं परिवारगणं चिन्तयित्वा तदीयस्थानेषूपवेशयेत्। ततो मूलमुच्चार्य इदमासनममुकाय नम इत्यासनन्दत्वा जलन्दद्यात्। एवमग्रे विशेषानुक्तावुपचारदानमन्त्रो द्रष्टव्यः। जलदानञ्च सर्वोपचारानन्तरं विधेयम्। यश्चोपचारो न सम्पद्यते तदात्मतया ध्यात्वा पुष्पन्दद्यात्। मनसैव वा दद्यात्।

ततः स्वागतं कुशलञ्च पृष्ट्वा मूलमुच्चार्य्य इदम्पाद्यममुकाय नम इति पादयोः श्यामाकदूर्वाब्जविष्णुक्रान्ताजलात्मकं पाद्यम् मूलानन्तरमिदमाचनीयममुकाय स्वधेति मुखे वारत्रयं जातीलवङ्गकल्लोलरूपमाचमनीयं मूलमुच्चार्य्य एषोऽर्घः अमुकाय स्वाहेति शिरसि गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वाजलात्मकमर्घं मूलमुक्त्वा एष मधुपर्कः अमुकाय स्वधेति मुखे दधिमध्वाज्यात्मकं मधुपर्कमाचमनीयमन्त्रेण जलात्मकं पुनराचमनीयम्, गङ्गोदकस्नानीयम्, यथोचितगात्रमार्ज्जनीयवस्त्रभूषणानि दत्वा देवताशरीरे गन्धपुष्पाभ्यां षडङ्गं पञ्चाङ्गं वा सपूज्य कल्पेषु विभूत्यादिपूजाविधौ तां

विधाय गन्धपुष्पाभ्यां मूलेन देवतामभ्यर्च्य शिरोहृदयाधारपादसर्वाङ्गेषु क्रमेण प्रशस्तपुष्पाञ्जलिपञ्चकन्दद्यात् ।

विष्णुपूजायान्तु - दक्षिणपादे श्वेततुलस्या वामपादे कृष्णतुलस्या हृदि करवीरद्वयेन, शिरसि पद्मद्वयेन, सर्वाङ्गेषु तुलसीद्वयकरवीरद्वयपद्मद्वयै - रञ्जलिपञ्चकम् ।

तत्र श्वेतचन्दनसिक्तानि, श्वेतानि पुष्पाणि दक्षिणभागे । रक्तचन्दन- सिक्तानि बामभागे दातव्यानि ।

ततः कल्पोक्तावरणान्तराणि सम्पूज्य लोकपालान् तदस्त्राणि च पूजयेत् । यथा पूर्वादिदिक्षु इन्द्राय सुराधिपतये साङ्गाय सायुधाय सवाहनाय सपरि- वाराय नमः ।

एवमग्नये तेजोऽधिपतये, यमाय प्रेताधिपतये निर्ऋतये रक्षोधिपतय वरुणाय जलाधिपतये वायवे प्राणाधिपतये सोमाय नक्षत्राधिपतये ईशानाय विद्याधि पतये, निर्ऋतिवरुणयोर्मध्येऽधः अनन्ताय नागाधिपतये, इन्द्रेशानयोर्मध्ये ऊर्ध्वं ब्रह्मलोकाधिपतये साङ्गायेत्यादि सर्वत्र योजनीयम् ।

ततस्तेषां बाहिस्तदस्त्राणि तानि च वज्र, शक्ति, दण्ड, खड्ग, पाशाङ्कुश, गदा, त्रिशूल, चक्र, पद्मानि । ततः गन्धपुष्पाक्षतार्चितां घण्टां वामहस्तेन वाद्यमानो दक्षिणे देवस्याधस्ताद्धूपन्दत्वोपरि दीपन्दद्यात् ।

ततः पुष्पाञ्जलिन्दत्वा नैवेद्यार्थं पाद्याचमनीये दत्वा निवेदयामि भवते जुषाणेदं हविरमुकेति नैवेद्यन्दद्यात् । इहवा आवरणपूजाङ्कुर्यात् । ततो नैवेद्यमैशान्यामुच्छिष्टभोजिने दद्यात् । तेच विष्णोर्विष्वकसेनः, भानोस्तेज- श्चण्डः, शक्तेश्चण्डेश्वरी, शिवस्य-चण्डेश्वरः । गणेशस्य-लम्बोदर इति ।

ततो निवेद्यस्थानमुपलिप्य गण्डूषदन्तधावनाचमनीयहस्तानुलेपमुख- वासकगन्धमाल्य-भूषणताम्बूलादि तत्कालोचितन्दत्वा पुनर्गन्धादिभि- र्देवतां सम्पूज्यार्घन्दत्वा पुष्पाञ्जलिन्दद्यात् । ततः स्तुत्वा प्रदक्षिणीकृत्या-

ष्टाङ्गं पञ्चाङ्गम्वा प्रणमेत्। विष्णुपूजायां ब्रह्मार्पणमन्त्रेणात्मानमर्पयेत्। सुप्रसन्नान्देवतां चिन्तयन् यथा शक्तिञ्जप्त्वा ओं गुह्यातिगुह्येत्यादिना दक्षिणे देवताहस्ते जलं समर्पयेत्। ततः प्राणायामत्रयं कृत्वा छत्रचामरादिना राजोपचारैस्तोषयित्व उपसंहारमुद्रया परिवारगणं देवताशरीरे उपसंहृत्या-मुक क्षमस्व स्वस्थानङ्गच्छेति विसृज्य व्यापकत्रयं कृत्वा पुष्पमाघ्राय सुषुम्नाव-र्त्मना देवताहृदयाम्बुजं नीत्वा इदानीम्वा प्राणायामत्रयम्विधा गुरुन्नमस्कार-ङ्कुर्यात्। गुरोरसन्निधाने तदुद्देशेऽपि तन्नमस्कारः। सकलावरणपूजनाशक्तौ अङ्गेन्द्रवज्राद्यावरणत्रयमेव पूजयेत्। तत्राप्यशक्तो देवतामात्रपूजां सम्यक्-तया। तत्राप्यशक्तावन्यस्मै पूजा साधनन्दत्वा तद्द्वारा पूजाङ्कारयेत्। तत्राप्यशक्तावन्यविधीयमानपूजाम्पश्येदिति।

इति श्रीभवानन्दरायकारिते श्री गोविन्दविरचिते पूजाप्र-दीपे सामान्यपूजापद्धतिपरिच्छेदः।

पितरमधिकभक्त्या केशवं नाम नत्वा तदनुजरुचिनाथं भ्रातरं तं प्रणम्य। अथ विहितनिदेशः श्रीभवानन्दरायैर्ल्लिखितमनुविशेषानेष गोविन्दशर्मा॥

तत्रान्तरपूजायाः सर्वैरननुष्ठानाद् वाह्यपूजायाश्च सर्वसाधारणतया तदनुरुद्धक्रमेणैव विशेषो लिख्यते। तत्र प्रथमं सरस्वतीमन्त्राः— तत्र मातृका-सरस्वतीमन्त्रस्य ब्रह्माऋषिर्गायत्रीछन्दो मातृकासरस्वतीदेवता हलो बीजं सुरा शक्तिर्विद्याद्यभीष्टसिद्धौ विनियोगः। प्रणायामान् कृत्वा कराङ्गन्यासौ वर्णन्यासञ्च मातृकान्यासकथितान् कुर्यात्।

द्यौःइति कर्णिकं स्वरयुग्माष्टकेन स्फुरत्केसरपत्रान्तःस्थितवर्गाष्टकं दिक्षु वकारयुक्तेन कोणेषु चकारयुक्तेन भूपुरेण वेष्टितम् अष्टदल-पद्मं पूजामन्त्रम्। भूपुररेखातो वहिर्ज्ज्वलवीजम्, अकारादिवर्णाश्च सवि-न्दवो लिखनीया इति प्रपञ्चसारविवरणम्—

मेधा, प्रज्ञा, प्रभा, विद्या, धी धृति, स्मृति, बुद्धि, विद्यैश्वर्य्यपीठशक्तयः। द्यौःइति पीठमन्त्रः। पञ्चाशल्लिपिभिरित्यादि न्यासप्रकरणोक्तन्ध्यानम्। आवरणपूजायाम्-केसरमूलेष्वाग्नेयादिकोणेषु हृदयशिरःशिखाकवचानि,

अग्रे नेत्राणि दिक्षु अस्त्रम् केसरेषु । अं, आं, नम इत्यादिक्रमेण तत्तद्वर्णमूर्त्तीन्ध्यात्वा स्वरयुग्माष्टकम् । पत्रमूलेषु—कं, खं, गं, घं, ङं, नम इत्यादिक्रमेण तत्तद्वर्णान्ध्यात्वा वर्गाष्टम्पूजयेत् ।

केचित्तु—अकाराकाराभ्यां नम इत्यादि प्रकारेण पूजयन्ति । ततः-पत्रमध्येषु व्यापिनी, पालिनी, पारिणी, क्लेदिनी धारिणी, मालिनी, हंसिनी; शान्तिनीः । पत्राग्रेषु—ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्मी, तद्बहिर्लोकपालान् तद्बहिस्दतस्त्राणि च पूजयेत् ।

अथैतेषां ध्यानं व्यापिन्यादिरभिधाय

शुभ्रा पत्रेषु सम्पूज्या धृताक्षगुणपुस्तकाः ।
दण्डं कमण्डलुं पश्चादक्षसूत्रमथाभयम् ॥
बिभ्रती कनकच्छाया ब्राह्मी कृष्णाजिनोज्वला ॥

दण्डं कमण्डलुमिति वामाधोहस्तमारभ्य प्रादक्षिण्येन ।

शूलं परश्वधं क्षुद्रदुन्दुभिं नृकरोटिकाम् ।
वहन्ती हिमसङ्काशा ध्येया माहेश्वरी शुभा ॥

क्षुद्रदुन्दुभि-र्डमरुः । नृकरोटिका नृकपालास्थिः ।

अङ्कुशन्दण्डखट्वाङ्गौ पाशञ्च दधती करैः ॥
ध्येया वन्धूकसङ्काशा कौमारी कामदायिनी ।
चक्रं घण्टां कपालञ्च शङ्खं च दधती करैः ।
तमालश्यामला ध्येया वैष्णवी विभ्रमोज्ज्वला ॥
मुशलं करवालञ्च खेटकन्दधती हलम् ।
करैश्चतुर्भिर्वाराही ध्येया कालघनच्छविः ॥
अङ्कुशन्तोमरं विद्युत् कुलिशं बिभ्रती करैः ।
इन्द्रनीलनिभेन्द्राणी ध्येया सर्वसमृद्धिदा ॥
शूलङ्कपालं नृशिरः कपालन्दधती करैः ।
मुण्डस्रङ्खण्डिता ध्येया चामुण्डारक्तविग्रहा ॥

अक्षस्रजं बीजपूरं कपालं पङ्कजङ्करैः ।
वहन्ती हेमसङ्काशा महालक्ष्मीः समीरिता ।।
दीक्षित-प्रोक्तमार्गेण न्यसेल्लक्षं समाहितः ।
जपेत्तत्संख्यया विद्वान् अयतं मधुराप्लुतैः ।।
विदधीत तिलैर्होमं मातृकामन्वह यजेत् ।।

अथ भूतलिपिमन्त्रः

पञ्चह्रस्वास्सन्धिवर्णा व्योमेवाग्निजलन्धरा ।
अन्त्यमाद्यन्द्वितीयाञ्च चतुर्थं मध्यमं क्रमात् ।।
पञ्चवर्गाक्षराणि स्युर्वान्तश्वेतेन्दुभिस्सह ।
एष भूतलिपिःप्रोक्ता द्विचत्वारिंशदक्षरैः ।।
आडम्बराणां वर्गाणां पञ्चमाः शाणसंयुताः ।
वर्गाद्या इति विज्ञेया नव वर्गा स्मृता अमी ।।
व्योमेवाग्निजलक्षोणीः वर्गवर्णान् पृथग्विदुः ।।

अस्य मन्त्रस्य दक्षिणामूर्त्तिऋषिर्गायत्रीछन्दः सरस्वतीदेवता विद्याद्यभीष्टसिद्ध्यै विनियोगः । हं, यं, रं, लं वं, हृदयाय नमः । ङं, कं, खं, गं, घं, शिरसे स्वाहा । ञं, चं, छं, जं, झं शिवायै वषट् । णं, टं, ठं, डं ढं, कवचाय हुम् । नं, तं, थं, दं, धं, नेत्रत्रयाय वौषट् । मं, पं, फं, बं, भं, अस्त्राय फट् । इत्यङ्गमन्त्राः ।

अथ मन्त्रन्यासः

आधारेषु-अधिष्ठाने ई । नाभौ-ऊ । हृदि-ऋ । गले-ऌ । भ्रूयुगमध्ये ए, तदुपरि नादे ऐ, तदुपरि शक्त्यां-ओ, तदुपरि शिवे-औ, ऊर्ध्वमुखे-ह, पूर्वमुखे-य, दक्षिणमुखे-र उत्तरमुखे-व, पश्चिममुखे-ल, दक्षिणवाहोरङ्गुल्यग्रे-ङ । मूले-द, द्वितीय सन्धौ-ख, अङ्गुलीमूले-घ, करमूले-ग । एवं-वामवाहौ-ञ, च, छ, ज, झ। दक्षिणपादे-ण, ट, ठ, ड, ढ । वामपादे न,त, थ, द, ध । पार्श्वयोः-प, भ । नाभौ-

म । पृष्ठे-व । गुह्ये-श । हृदि-ख । भ्रूमध्ये-स । अयं सृष्टिप्रकारेणमन्त्रवर्णन्यासः । अत्र वर्णा विसर्गान्ता न्यसनीयाः ।

अथ स्थितिप्रकारः

वर्गाणां तृतीयद्वितीयचतुर्थप्रथमपञ्चमान्-बिन्दुविसर्गसहितान् वर्णान् क्रमेणोक्तस्थानेषु न्यसेत् ।

अथसंहारः

तत्र विलोमक्रमेण सविन्दुकान् वर्णानुक्तस्थानेषु न्यसेत् । प्रथमं चतुर्दलन्तद्बहिरष्टदलन्तद्बहिर्द्वात्रिंशद्दलन्तद्बहिः चतुःषष्टिदलं पद्मं पूजायन्त्रम् । मेधा, प्रज्ञा, प्रभा, विद्या, धी, धृति, स्मृति, बुद्धि-विद्यैश्वर्य्याः पीठशक्तयः । द्यौ इति पीठमन्त्रः ।

ध्यानन्तु –

ध्यायेल्लिपितरोर्मूले देवीन्तन्मयपङ्कजे ।
वदन्ति स्वधियोवृक्षं नित्यं वर्णमयं शुभम् ॥
परसम्विन्महाबीजं विन्दुनादमहाशिफम् ।
पृथिव्यक्षरशाखाभिः सर्वाशासु विजृम्भितम् ॥
सलिलाक्षरपत्रैः स्वैः संछादितदिगम्बरम् ।
वह्निवर्णाङ्कुरैर्दीप्तं रत्नैरिव सुरद्रुमम् ॥
मरुद्वर्णलसत्पुष्पं —द्योतयन्तं वपुःश्रियः ।
आकाशार्णफलैर्नम्रं सर्वभूताश्रयं परम् ॥
परामृताख्यमधुभिः सञ्चिन्तं परमेश्वरीम् ।
वेदागमादिभिः क्लृप्तसमन्ततिमनोहरम् ॥
शिवशक्तिमयं साक्षात् छायाश्रितजगत्त्रयम् ।
एनमाश्रित्य सुधियः सर्वान्कामानवाप्नुयुः ॥

अङ्गोन्मुक्तशशाङ्ककोटिसदृशीमापीन - तुङ्गस्तनीम्
चन्द्रार्द्धाङ्कितमस्तकां मधुमदादालोलनेत्रत्रयीम्।
बिभ्राणामनिशं वरं जपवतीं विद्यासु हस्तत्रयीम्
... ... ॥

इत्यादि स्मृत्वा ऋषिच्छन्दोदेवताः शिरोवदनहृत्सु विन्यस्य शिरसि-व०। दक्षिणकर्णे - द०। वामकर्णे र। दक्षिणनेत्रे - द०। वामनेत्रे - वा। दक्षिण नासापुटे-गा। वामनासापुटे-दि। मुखे-नि। लिङ्गे-स्वा। गुदे-हा। इति वर्णन्यासः।

अं० कं० खं० गं० घं० ङं आं-हृदयायनमः। इं० चं० छं० जं झं० ञं० ईं० शिरसे स्वाहा। उं० टं०ठं०डं० ढं० णं० ऊं शिखायै वषट्। एं० तं० थं०दं० धं० नं० ऐं कवचाय हुम्। ओं पं०फं० वं० भं० मं० औं नेत्राभ्यां वौषट्। अं० यं० रं० लं० वं० शं० षं० सं० हं० लं० क्षः अः अस्त्राय फट् इत्यङ्गमन्त्राः।

आवाहनप्रकरणोक्तस्वरूपद्यं पूजामन्त्रम्, मेधाप्रज्ञाप्रभाविद्याधीधृतिस्मृतिबुद्धिविद्यैश्वर्याः पीटशक्तयः। यौ. इति पीठमन्त्रः।

ध्यानन्तु—

तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः कुचभरणमिताङ्गी सन्निषण्णा सिताब्जे।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः सकलविभवसिद्धयै पातु वाग्देवता नः॥

लेखनीपुस्तके दक्षिणवामकरयोः। आवरणपूजायाम्—आग्नेयादिकोणकेसरेषु हृदयशिरःशिखाकवचानि। अग्रे नेत्रं। दिक्केसरेषु अस्त्रम्। पूर्वादिदलेषु योगा, सत्या, विमला, ज्ञाना, बुद्धि, स्मृति, मेधा, प्रज्ञाः। दलाग्रेषु-ब्रह्माणी माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्मीस्तद्वहिर्लोकेशान्, तद्वहिस्तदस्त्राणि च पूजयेत्। अत्र योगादयो ज्ञानमुद्राः पुस्तकहस्ता ध्येयाः। ब्रह्मादिध्यानन्तु मातृकामन्त्रे द्रष्टव्यम्।

दशलक्षं जपेन्मन्त्रन्दशांशं जुहुयात्ततः ।
पुण्डरीकैः पयोभ्यक्तैस्तिलैर्वा मधुराप्लुतैः ॥
हृदयान्ते भगवति वद शब्दयुगन्ततः ।
वाग्देवि वह्निजायान्तं वाग्भवाद्यं समुद्धरेत् ॥
मन्त्रं षोड़शवर्णाढ्यं वागैश्वर्यफलप्रदम् ।
मनोः षड्भिःपदैःकुर्यात् षडङ्गं जातिसंयुतैः ॥

इत्यत्र वदवदेत्येकं पदं नित्यवीप्सयोरिति सूत्रेण नित्यार्थस्य वीप्सार्थस्य च विहितायां पठति पठति वृक्षं वृक्षं सिञ्चतीत्यादि द्विरुक्तौ पदभेदाभावस्य व्यवस्थितत्वात् । अतएव सम्भवामि युगे युगे, यो यो यां यामित्यादौ द्वितीय-यकारो लघु पठ्यते । एतस्मिन्मन्त्रे अङ्गमन्त्रध्यानातिरिक्तं सर्वं पूर्वदशाक्षरतुल्यम् ।

षडङ्गमन्त्रास्तु ऐं हृदयाय नमः नमश्शिरसे स्वाहा भगवति शिखायै वषट् । वद वद कवचाय हुम् वाग्देवि नेत्रत्रयाय वौषट् स्वाहा अस्त्राय फडिति । ध्यानन्तु -

शुभ्रां स्वच्छविलेपमाल्यवसनां शीतांशुखड्गोज्वलाम्
व्याख्यामक्षगुणं सुधाढ्यकलशं विद्याञ्च हस्ताम्बुजैः ।
बिभ्राणां कमलासनां कुचलतां वाग्देवतां सुस्मितां
वन्दे वाग्विभवप्रदां त्रिनयनां सौभाग्यसम्पत्करीम् ॥

व्याख्यामक्षगुणमिति दक्षिणाधोहस्तमारभ्य प्रादक्षिण्येन ।

हविष्याशी जपन्सम्यक् वसुलक्षमनन्यधीः ।
दशांशं जुहुयादन्ते तिलैराज्यपरिप्लुतैः ॥
तारोमयाधरो विन्दुः शक्तिस्तारः सरस्वती ।
ङेन्तानित्यन्तिको मन्त्रः प्रोक्त एकादशाक्षरः ॥

अस्यैकादशाक्षरसरस्वती मन्त्रस्य कण्वऋषिर्विराट् छन्दः सरस्वतीदेवता विद्याद्यभीष्टसिद्धौ विनियोग इति स्मृत्वा शिरोवदनहृत्सु ऋषिछन्दोदेवताः

विन्यस्य वर्णन्यासङ्कुर्यात् । तत्र ब्रह्मरन्ध्रे ओं । भ्रूमध्ये-ह्रीं, दक्षिणकर्ण-रन्ध्रे ऐं । वामकर्णरन्ध्रे ह्रीं । दक्षिणनेत्रे ओं । वामनेत्रे सं । दक्षिणनासापुटे र० । वामनासापुटे स्व । मुखे त्यै । लिङ्गे न गुदे म. । ऐं हृदयायनमः । ऐं शिरसे स्वाहा । ऐं शिखायैवषट् । ऐं कवचायहूँ । ऐं नेत्राभ्यां वौषट् । ऐं अस्त्रायफट् इत्यङ्गमन्त्राः ।

आवाहनप्रकरणोक्तमातृकाम्भोजं पूजायन्त्रम् । मेधा, प्रज्ञा, प्रभा, विद्या धी धृति, स्मृति, बुद्धि, विद्येश्वर्यः पीठशक्तयः । द्यौः पीठमन्त्रः ।

ध्यानन्तु —

वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभां
चन्द्रार्धाङ्कितमस्तकां निजकरैः संविभ्रतीमादरात् ।
वीणामक्षगुणं सुधाढ्यकलशं विद्याञ्च तुङ्गस्तनीं
दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजेत् ॥

वीणामक्षगुणमिति दक्षिणाधोहस्तमारभ्य प्रादक्षिण्येन । आवरणपूजायाम्-देव्या दक्षिणपार्श्वे संस्कृता वाङ्मयी । वामपार्श्वे-प्राकृता वाङ्मयी । अग्न्यादिकोणकेसरेषु हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् दिक्केसरेष्वस्त्रम् । पूर्वाद्यष्टपत्रेषु-प्रज्ञा० मेधा० श्रुति, स्मृति, वागीश्वरी मतिस्वस्तयः । दलाग्रेषु-ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्मीः । तद्बहिर्लोकपालान् । तद्बहिस्तदस्त्राणि पूजनीयानि । ब्राह्म्यादि ध्यानं मातृकापटले द्रष्टव्यम् ।

जपेद्द्वादशलक्षाणि तत्सहस्रं सिताम्बुजैः ।
नागचम्पकपुष्पैर्वा जुहुयात्साधकोत्तमः ॥
वाचस्पते-स्मृते भूय प्लविति कीर्त्तयेत् ।
वागाद्यो मुनिभिः प्रोक्तो रुद्रसङ्ख्याक्षरो मनुः ॥

अत्रावरणपूजायाम् — पूजयेत्तां यथा पुरेति वचनेनाव्यवहितपूर्वतारं मायाधरेविन्दुरित्याद्युक्तैकादशाक्षरोक्तस्यैवातिदेशः । न पुनर्व्यवहितदशाक्षरो-

क्तस्य । अस्यैकादशाक्षरमन्त्रस्य कण्वऋषिर्विराट्छन्दः वाग्देवता विद्याद्यभीष्टार्थे विनियोगः । ऐं हृदयायनमः । वाचस्पते शिरसे स्वाहा । अमृते शिखायै वषट् । प्लवः कवचाय हुम् । प्लु. अस्त्रायफट् । इति पञ्चाङ्गमन्त्राः ।

आवाहनप्रस्तारोक्तस्वरूप मातृकाम्भोजं पूजायन्त्रम् । मेधा० प्रज्ञा० प्रभा, विद्या धी० धृति० स्मृति, बुद्धि विद्येश्वर्य्यः पीठशक्तयः । द्यौः इति पीठमन्त्रः ।

ध्यानन्तु—

आसीना कमले करैर्ज्जपवटीं पद्मद्वयं पुस्तकं
बिभ्राणातरुणेन्दुबद्धमुकुटा मुक्तेन्दुकुन्दप्रभा ।
मानोन्मीलितलोचना कुचभरक्लान्ताभवद्भूतये
भूयाद्वागधिदेवता मुनिगणैरासेव्यमानानिशम् ॥

दक्षिणाधोहस्तमारभ्य जपमालादिकन्ध्येयम् । आवरणपूजायान्तु देव्या दक्षिणपार्श्वे संस्कृता वामपार्श्वे प्राकृता वाङ्मयी देवी । अग्न्यादिकोण केसरेषु हृदयशिरःशिखाकवचानि । दिक्केसरेष्वस्त्रम् । दलेषु प्रज्ञा, मेधा, श्रुति, स्मृति, शक्ति, वागीश्वरी, मति स्वस्तयः । दलाग्रेषु ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्मीः । तद्बहिर्ल्लोकपालान् । तद्बहिस्तदस्त्राणि पूजनीयानीयानि । ब्राह्म्यादिध्यानं मातृका मन्त्रे द्रष्टव्यम् ।

रुद्रलक्षं जपेन्मन्त्रं दशांशं जुहुयान्नृतैः ।
तोयस्थं शयनं विष्णोः स केवलचतुर्मुखम् ।
विन्दुर्विंशयुतोवह्निर्विन्दुमभ्यासमान् भृगुः ।
उक्तानि त्रीणि बीजानि सद्भिः सारस्वतार्थिनाम् ॥

अत्र तोयं वकारः । तत्रस्थं विष्णोः शयनमनन्त आकारः । कीदृशं केवलः मस्तकन्यस्ताऽङ्कारः चतुर्मुखो जकारः ताभ्यां सहितम् । एतावता ज्वां इति बीजमित्येके । तोयस्थं विष्णोः शयनं वाकारः केवलेन आंज्वरहितेन चतुर्मुखेन सहितं तेन वागिति पर्यवसितेन वाग्वीजमैङ्कारः प्रतिपाद्यत इत्यपरे ।

एवं सति लक्षितलक्षणापत्त्यावागितिस्वरूपमेवेत्यपरे । तत्रान्त्यः पक्षः साधीयान् नारायाण्यादि एकवाक्यत्वानुरोधात् । अत्रापि मन्त्रे प्राक्प्रस्तुतेन मार्गेणेति वचनेन तारं मायाधरो विन्दुरित्याद्युक्तैकादशाक्षरोक्तपूजाऽतिदिश्यते, सान्निध्यात् ।

अस्य मन्त्रस्य कण्वऋषिर्विराट्छन्दः सरस्वती देवता विद्याद्यभीष्टसिद्धौ विनियोगः । ज्वां हृदयायनमः । वं शिरसे स्वाहा । स्वो शिखायै वषट् । ज्वां कवचायहुँ । रुं नेत्रत्रयाय वौषट् । स्वो अस्त्राय फट् । इत्यङ्गमन्त्राः ।

प्रथमबीजस्यान्यथोद्धारे हृदयकवचमन्त्रयोस्तदुपक्षेपः । आवाहनप्रकरणोक्तमातृकाम्भोजं पूजायन्त्रम् । मेधा० प्रज्ञा० प्रभा० विद्या, धी० धृति० स्मृति, बुद्धि विद्येश्वर्यः पीठशक्तयः । द्यौरित्यासनमन्त्रः ।

ध्यानन्तु —

मुक्ताहारावदातां शिरसि शशिकलालङ्कृतां वाहुभिः स्वै-
र्व्याख्यां वर्णाक्षमालां मणिमयकलशं पुस्तकञ्चोद्वहन्तीम् ।
आपीनोत्तुङ्गवक्षोरुहवलिविलसन्मध्यदेशामधीशाम्
वाचामीडे चिराय त्रिभुवनविनुतां पुण्डरीके निषण्णाम् ॥

व्याख्याक्षमाले - दक्षिणहस्तयोः । आवरणपूजायाम् - देव्या दक्षिणपार्श्वे संस्कृताम् । वामपार्श्वे - प्राकृतां वाङ्मयीन्देवीम् । अग्न्यादिकोणकेसरेषु हृदयशिरःशिखाकवचानि । अग्रेकेसरे नेत्रम् । दिक्केसरेष्वस्त्रम् ।

पूर्वाद्यष्टपत्रेषु - प्रज्ञा० मेधा० श्रुति० स्मृति, शक्ति वागीश्वरी, मति० स्वस्तयः । दलाग्रेषु-ब्राह्मी० माहेश्वरी, कौमारी० वैष्णवी, वाराही इन्द्राणी-चामुण्डा, महालक्ष्मीः । तद्वहिर्ल्लोकपालान् । तद्वहिस्तदस्त्राणि च पूजयेत् । ब्राह्म्यादिध्यानं मातृकापटलेऽनुसन्धेयम् ।

त्रिलक्षं प्रजपेन्मन्त्रं जुहुयात्तद्दशांशतः ।
पायसेनाज्यसिक्तेन संस्कृते हव्यवाहने ॥

वाग्भवं वामनेत्रञ्च विन्दुमद्भुवनेश्वरी ।
उक्तानि त्रीणि बीजानि सद्भिः सारस्वतार्थिनाम् ॥

अत्र ऋष्यादिपूजा च सर्वं तारं मायाद्युक्तैकादशाक्षरवत् ।

एवमुक्तेषु मन्त्रेषु दीक्षितो यतमानसः ।
एकं यो भजते भक्त्या स भवेद्भुक्तिमुक्तिभाक् ॥

सुसितैर्गन्धकुसुमैः पूजा सारस्वते मनौ ।
दूर्वाचीनाङ्कुरं पुष्पं राजवृक्षसमुद्भवम् ॥

उत्पलानि प्रशस्तानि सिन्दुरा वाऽङ्कुराणि च ।
भजन् सरस्वतीं नित्यमेतानि परिवर्ज्जयेत् ॥

आम्रातं गृञ्जनं विल्वं करञ्जं लशुनन्तथा ।
तैल पलाण्डं पिण्याकं शाङ्गंस्तमपि भोजने ।

सर्वं पर्युषितन्त्याज्यं सदा सारस्वतान्विना ।
न चरेन्निशि ताम्बूलं स्त्रियञ्चच्छेद्दिवा च न ॥

न सन्ध्ययोः स्वपेज्जातु नाशुचिः किञ्चिदुच्चरेत् ।
प्रदोषेषु भजेन्मौनं दिग्वस्त्रान्न विलोकयेत् ॥

न पुष्पितां स्त्रियञ्चच्छेन्न विन्देद्वामलोचनम् ।
न मृषावचनं ब्रूयान्न क्रामेत्पुस्तकं सुधीः ॥

अक्षराढ्यानि पत्राणि नोपेक्षेन्न च लङ्घयेत् ।
चतुर्द्दश्यष्टमीपर्वप्रतिपद्ग्रहणेषु च ॥

सङ्क्रमेषु च सर्वेषु विद्यान्नैव पठेद्बुधः ।
व्याख्याने सन्त्यजेन्निद्रामालस्यं जृम्भणम्बुधः ॥

क्रोधं निष्ठीवनं चोर्ध्वनीचाङ्गस्पर्शनन्तथा ।
मनुष्यसर्पमार्ज्जार - भल्लूक - भकुलादयः ॥

अन्तरा यदि गच्छेयुः तदा व्याख्यां परित्यजेत् ।

उक्तानि—

दोषानिमान् सम्यक् ज्ञात्वा यो भारतीं ययजेत् ।
वाचां सिद्धिमवाप्नोति वाचस्पतिरिवापरः ॥

स्तवस्तु –

अमलकमलाधिवासिनि मनसो वैमल्यदायिनि मनोज्ञे ।
सुन्दरगात्रि सुशीले तव चरणाम्भोरुहं नमामि सदा ॥
अचलात्मजा च दुर्गा कमला त्रिपुरेति मेदिताजगति ।
या सा त्वमेव वाचामीश्वरि सर्वात्मना प्रसीद मम ॥

त्वच्चरणाम्भोरुहयोः प्रणामहीनः पुनर्द्विजातिरपि ।
भूयादनेन मूकः त्वद्भक्तो भवति सर्वज्ञः ॥
मूलाधारमुखोज्झितविषतन्तुनिभप्रभा प्रभावतया ।
विसृतलिपिच्छाताहितमुखचरणादिके प्रसीद मम ॥

वर्णतनोऽमृतवर्णे नियतमलिवर्णितोऽपि योगीन्द्रैः ।
निर्णीतकरणमिह दूरे वर्णयितुं देवि देहि सामर्थ्यम् ॥
ससुरासुरमौलिलसन्मणिप्रभादीपिताङ्घ्रियुगनलिने ।
सकलागमस्वरूपे सर्वेश्वरि सन्निधिं निधेहि मयि ॥

पुस्तकजपरुचिहस्ते वरदाभयचिह्नचारुबाहुतले ।
कर्पूरामलदेहे वागीश्वरि शोधयाप्तसमचेतः ॥
क्षौमाम्बरपरिधाने मुक्तामणिभूषणे मुदा वामे ।
स्मितचन्द्रिका विकसितमुखेन्दुबिम्बके प्रसीद मम ॥

विद्यारूपेऽविद्यानाशिनि वेदये विद्योतितान्तरात्मबिदाम् ।
गद्यैस्सपद्यजातैराद्यैर्मुनिभिः स्तुते प्रसीद मम ॥
त्रिमुखि त्रयीस्वरूपे त्रिपुरे त्रिदशाभिवन्दिताङ्घ्रियुगे ।
वीक्षणविलसितवक्त्रे त्रिमूर्त्ति मूलात्मिके प्रसीद मम ॥

त्वच्चरणसरसि जन्मस्थितसहितधियां न लिप्यते दोषः ।
भगवति भक्तिमतस्त्वयि परमां परमेश्वरि प्रसीद मम ॥
बोधात्मिके बुधानां हृदयाम्बुजचारुरङ्गनटनपरे ।
भगवति भवभङ्गकरीन्दद भक्ति भक्तार्थदे प्रसीद मम ॥
वागीशि स्तवमिति यो जपार्च्चनादरवृत्तिषु प्रजपेत् ।
स तु विमलचित्तवृत्तिर्देहापदि नित्यशुद्धमेति पदम् ॥

इति प्रपञ्चसारीयः ।

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजाप्रदीपे सरस्वतीपूजा-परिच्छेदः ।

अथ लक्ष्मीमन्त्रः

तत्र-

वान्तं वह्निसमारूढं वामनेत्रेन्दुभूषितम् ।
बीजमेतच्छ्रियः प्रोक्तं चिन्तारत्नमिवापरम् ।

अस्य श्रीबीजस्य भृगुर्ऋषिर्न्निवृच्छन्दः श्रीर्देवताऽभीष्टार्थसिद्धौ विनियोगः । श्रीं हृदयाय नमः । श्रीं शिरसे स्वाहा । श्रूं शिखायै वषट् । श्रैं कवचाय हुम् । श्रौं नेत्रत्रयाय वौषट् । श्रः अस्त्राय फट् । इत्यङ्ग मन्त्राः । विभूत्युन्नति, कान्ति, हृष्टि, कीर्त्ति, सन्नति, व्युष्टि, कृष्टि; ऋद्धयः पीठ-शक्तयः । बीजेनैवासनदानम् । अथ ध्यानम्—

कान्त्या काञ्चनसन्निभां हरगिरिप्रख्यैश्चतुर्भिर्गजैः ।

हस्तोत्क्षिप्त हिरण्मयामृतघटैरासिच्यमानां श्रियम् । मविप्राणांवरमञ्ज-युग्ममभयं हस्तैः किरीटोज्वलां ।

क्षौमाबद्धनितम्बबिम्बललितां वन्देऽरविन्दस्थिताम् ॥

अधो दक्षिणहस्तमारभ्य वरादीनि ध्येयानि । आवरणपूजा तु—आवरणकोणकेसरेषु हृदयशिरःशिखाकवचानि । अग्रकेसरे नेत्रम् । दिक्केसरे-ष्वस्त्रम् । पूर्वादिदिग्दलेषु वासुदेव, सङ्कर्षण, प्रद्युम्न, अनिरुद्धान्, शङ्खं, चक्र, गदा, पद्म, हस्तान् यथाक्रमं हिम, पीत, तमालेन्द्रनीलाभान् ।

आग्नेयादिकोणदलेषु दमक, सलिल, गुग्गुलु-कुरण्टकान् गजान् । देवी-दक्षिणे-वसुधारान्वितं शङ्खनिधिम् । वामे-वसुमतीयुक्तं पद्मनिधिम् । दलाग्रेषु--वलाकी, विमला, कमला, वनमालिका; विभीषिका; मालिका; शाङ्करी; वसुमालिका: । तद्बहिर्लोकपालान्, तद्बहिस्तदस्त्राणि च पूजयेत् ।

अत्र च—यजेच्छंखनिधिन्देव्या दक्षिणे दयितान्वितम् ।
मुक्तामाणिक्यसङ्काशौ किञ्चत् स्मितमुखाम्बुजौ ।।
अन्योन्यालिङ्गनपरौ शङ्खपङ्कजधारिणौ ।
विगलद्रत्नवर्षाभ्यां शङ्खाभ्यां मूर्ध्नि राजितौ ।।
तुन्दिलं कम्बुकनिधिं वसुधाराङ्गनस्तीम् ।
वामतः पङ्कजनिधिं श्रेयया सहितं यजेत् ।।
सिन्दूराभौ भुजाश्लिष्टौ रक्तपद्मोत्पलान्वितौ ।
निस्सरेद्रत्नवर्षाभ्यां पद्मभ्यां मूर्ध्नि राजितौ ।।
तुन्दिलं पङ्कजनिधिं तन्वीं वसुमतीमपि ।।

इति वाक्ये वसुधारां घनस्तनीं तन्वीं वसुमतीमपीति । वसुधारा वसुमत्योः कर्मणोर्यजेदिति क्रियायाऽन्वयात्तयोरपि पूज्यत्वम् । नतु-शंख, पद्म निधिध्यानमात्रोपयोगित्वमिति ।

भानुलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः ।
श्रियमभ्यर्च्चयेन्नित्यं सुगन्धिकुसुमादिभिः ।।
तत्सहस्रं प्रजुहुयात् कमलैर्मधुरोक्षितैः ।
जपान्ते जुहुयान्मन्त्री तिलैर्वा मधुरोक्षितैः ।।
बिल्वैः फलैर्वा जुहुयात्त्रिभिर्वा साधकोत्तमः ।
वाग्भवं वनिता विष्णोर्माया मकरकेतनः ।।

चतुर्बीजात्मको मन्त्रश्चतुर्वर्गफलावहः । अत्र चतुरक्षरश्रीमन्त्रस्य ध्यानं विना सर्वं श्रीबीजवत् । ध्यानन्तु—

माणिक्यप्रतिमप्रभां हिमनिभैस्तुङ्गैश्चतुर्भिर्गजैः
हस्तग्राहितरत्नकुम्भसलिलैरासिच्यमानां सदा ।

हस्ताब्जैर्वरदानमम्बुजयुगाभीतिर्द्दधानां हरेः
कर्णाकाङ्क्षितपारिजातलतिकां वन्दे सरोजासनाम् ॥

वरादधो दक्षिणहस्तमारभ्याधो वामहस्तपर्यन्तं ध्येयाः।

भानुलक्षं हविष्याशी जपेदन्ते सरोरुहैः।
जुहुयादरुणैः फुल्लैस्तत्सहस्रं जितेन्द्रियः॥
दीर्घसावादि सर्गान्तौ ब्रह्मभानुवसुन्धराः।
वान्तेसिन्यैश्रियावह्नेर्मन्त्रः प्रोक्तो दशाक्षरः॥

दीर्घासौ नकारमकारौ यथाक्रममादिसर्गान्तौ। आदिभूतश्च विसर्गान्तश्च तौ। आदिभूतः प्रथमः। यद्वा दीर्घाशब्देन न रूपव्यञ्जनमात्रः मुक्तम्। तथा चास्य अकारस्य आदिरिति व्युत्पत्त्या आदिशब्देन शावते नकारो लभ्यते। एतावता नम इति रूपम।

अस्य दशाक्षरलक्ष्मीमन्त्रस्य दक्षऋषिर्विराट छन्दः श्रीर्द्देवता अभीष्टार्थसिद्धौ विनियोगः। ओं देव्यै नमो हृदयाय नमः। ओं पद्मिन्यै नमः शिरसे स्वाहा। ओं विष्णुपत्न्यै नमश्शिखायै वषट्। ओं वरदायै नम. कवचाय हुम्। ओं कमलरूपिण्यैनम अस्त्रायफट्। इति पञ्चाङ्गमन्त्राः। विभूति, उन्नति, कान्ति, हृष्टि कीर्त्ति सन्नति व्युष्टि उत्कृष्टि ऋद्धि एताः पीठशक्तयः। बीजेनासनदानम्। ध्यानम् –

आसीना सरसीरुहे स्मितमुखी हस्ताम्बुजैर्विभ्रती
दानं पद्मयुगाभये च वपुषा सौदामिनीसन्निभा।
मुक्तादामविराजमानपृथुलोत्तुङ्गस्तनोद्भासिनी
पायाद्वः कमलाकटाक्षैरभयैरानन्दयन्ती हरिम्॥

दानंवरमुद्रा, दानादीनि चाधोदक्षिणहस्तमारभ्य प्रादक्षिण्येन ध्यातव्यानि। आवरणपूजायामाग्नेयादिकोणकेसरेषु हृदयशिरःशिखाकवचानि। दिक्केसरेष्वस्त्रम्। पूर्वाद्यष्टदलेषु-वलाकी विमला कमला वनमालिका विभीषिकामालिकाशाङ्करीवसुमालिकाः। तद्बहिर्ल्लोकपालान्। तद्बहिस्तदस्त्राणि च पूजनीयानि।

दशलक्षं जपेदेनं मन्त्रविद्विजितेन्द्रियः ।
दशांशं जुहुयान्मन्त्री मधुराक्तैस्सरोरुहैः ॥
वाग्भवं शम्भुवनिता रमा मकरकेतना: ।
तार्णीयञ्च जगत्पार्श्वं बह्निबीजसमुज्वलः ॥
अर्घीशाढ्यो भृगुस्त्यैहृन्मन्त्रोऽयं द्वादशाक्षरः ।
महालक्ष्म्यास्समुद्दिष्टस्ताराद्यस्सर्वसिद्धिदः ॥

तार्णीय ह्रीं इतिबीजम् । अस्य द्वादशाक्षरमहालक्ष्मीमन्त्रस्य ब्रह्माऋषि-र्गायत्री छन्दो महालक्ष्मीदेवता अभीष्टार्थसिद्धौ विनियोगः । इति स्मृत्वा ऋष्यादिन्यासं विधाय मूलमन्त्रेण हस्तौ संशोध्याङ्गुष्ठयोः ओं ऐं नमः । तर्ज्जन्योः-ओं ह्रीं नमः । मध्यमयोः-ओं श्रीं नमः । अनामिकयोः-ओं क्लीं नमः । कनिष्ठयोः-ओं स्त्रैं नमः । करतलयोः-ओं जगत्प्रसूत्यै नमः । इति विन्यस्य मूर्द्धादिचरणान्तं मन्त्रं विन्यस्य मूर्ध्नि-ऐं । नेत्रयोः-ह्रीं । हृदये श्रीं गुह्ये-क्लीं । पादयोः-ह्रौं । हृदि त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रेषु धातुषु जगत्प्रसूत्यैनमः, इति वर्णान् यथाक्रमं विन्यसेत् ।

ओं ज्ञानाय हृदयाय नमः । ह्रीं ऐश्वर्याय शिरसे स्वाहा । श्रीं शक्तये शिखायै वषट् । क्लीं कवचाय हुँम् । ह्रीं वीर्याय नेत्रत्रयाय वषट् जगत्प्रसू-त्यै नमः तेजसेऽस्त्रायफट् । इति षडङ्गमन्त्राः । विभूति, उन्नति, कान्ति, हृष्टि, कीर्त्ति, सन्नति, व्युष्टि, उत्कृष्टि, ऋद्धि, एताः पीठशक्तयः । श्रीं इति पीठ-मन्त्रः । अथ ध्यानम्-

एवं न्यस्तशरीरादौ स्मरेदुद्यानमद्भुतम् ।
तन्मध्यस्थस्य सरसः पुलिनेति मनोहरे ॥
परितः पारिजाताढ्यमण्डपं मणिकुट्टिमम् ।
तन्मध्ये भावयेन्मन्त्री पारिजातं मनोहरम् ॥
तस्याधस्तात् स्मरेन्मन्त्री रत्नसिंहासनं महत् ।
तत्र सञ्चिन्तयेन्मन्त्री महालक्ष्मीं मनोहराम् ॥
बालार्कद्युतिमिन्दुखण्डविलसत्कोटीरहारोज्वलां
रत्नाकल्पविभूषिताङ्ग चलतां शालेः करैर्मञ्जरीम् ।
पद्मोत्कौस्तुभरत्नमप्यविरतं सम्बिभ्रतीं सस्मितां

फुल्लाम्भोजविलोचनत्रययुतां ध्यायेत्परान्देवताम् ॥

शालिमञ्जर्यादीनि अधोदक्षिणहस्तमारभ्य प्रादक्षिण्येन चिन्तनीयानि। विस्तरेण तु ध्यानं शारदायान्द्रष्टव्यम्।

अथावरणपूजा

तत्र देवीदक्षिणे शङ्करानन्दनम्। वामे– कन्दर्पम्। आग्नेयादिकोण-केशरचतुष्टये-हृदयशिरःशिखाकवचानि। अग्रे नेत्रम्। दिक्केशरेष्वस्त्रम्। पत्रमध्येषु—उमा, श्री, सरस्वती, दुर्गा, धरणि; गायत्री; देवी; उषा एताश्च पद्महस्ताः सुभूषणा ध्येयाः। अग्रे-गङ्गांयमुनाञ्च। दक्षिणवामपार्श्वयोः शङ्खपद्मनिधी। देव्याः पश्चाद्वरुणम्।

परितः राशिमण्डलानुसारेण मेषवृषमिथुनकर्कसिंहकन्यातुलावृश्चिकधनु-मकरकुम्भमीनराशीन्। तद्बही रविचन्द्रमङ्गलबुधवृहस्पतिशुक्रशनैश्चरराहुके-तून् ग्रहान्।

पूर्वादिदिक्षु चतुर्दन्तैरावतपुण्डरीक-वामन-कुमुदाञ्जन-पुष्पदन्तसार्वभौम-सुप्रतीकान् दिग्गजान्, तद्बहिर्लोकपालान्, तद्बहिस्तदस्त्राणि च पूजयेत्। आवरणध्यानम्, तत्र कन्दर्पं पुष्पाञ्जलिकरं –

उमाद्याः शक्तयो ध्येयाः पद्महस्ताः सुभूषणाः।
जह्नुसूर्यसुते पूज्ये पादप्रक्षालनोद्यते ॥
शङ्खपद्मनिधी पूज्यौ पार्श्वयोर्धृतचामरौ।
धृतातपत्रं वरुणं पूजयेत्पश्चिमे ततः ॥
अर्च्चयेद्दिग्गजान्तत्र चतुर्दन्तविभूषितान्।
एवं सञ्चिन्तयेद्देवीं हविष्याशी जितेन्द्रियः ॥
भानुलक्षं जपेन्मन्त्रं दशांशं जुहुयाद्घृतैः।
जुहुयाच्छ्रीफलैः पद्मैः प्रत्येकमयुतन्ततः ॥
तर्पयेत्सलिलैश्शुद्धैस्सुगन्धैरयुतद्वयम्।
शम्भपत्नी श्रियारुद्धारूमौ भगवती मही ॥
ब्रह्मादित्यौ धरादीर्घा लक्षादीर्भगवान्मरुत्।
प्रसीद युगलं भूयः श्रीरुद्धा भुवनेश्वरो ॥

महालक्ष्मि नमोन्तः स्यात् पुनरादिरयम्मनुः ।
सप्तविंशत्यक्षराढ्यः प्रोक्तस्सर्वसमृद्धिदः ॥

लक्षादिरिति लक्षयोर्मध्ये आदिर्लकार एव । अस्य मन्त्रस्य ब्रह्माऋषि-र्गायत्रीछन्दो महालक्ष्मी देवताऽभीष्टार्थसिद्धौ विनियोगः । श्रीं ह्रीं श्रीं कमले । श्रीं ह्रीं श्रीं हृदयाय नमः । श्रीं ह्रीं श्रीं कमलालये । श्रीं ह्रीं श्रीं शिरसे स्वाहा । श्रीं ह्रीं श्रीं प्रसीद । श्रीं ह्रीं श्रीं शिखायै वषट् । श्रीं ह्रीं श्रीं प्रसीद । श्रीं ह्रीं श्रीं अस्त्राय फट् इति पञ्चाङ्गमन्त्राः । विभूति, उन्नति, कान्ति, दृष्टि, कीर्त्ति, सन्नति, व्युष्टि, पुष्टि, ऋद्धयः पीठशक्तयः । श्रीं इति पीठमन्त्रः ।

ध्यानम् – सिन्दूरारुणकान्तिमब्जवसतिं सौन्दर्यवारान्निधिम्
कोटीराङ्गदहारकुण्डलकटी--सूत्रादिभिर्भूषिताम् ।
हस्ताब्जैर्वसुपात्रमब्जयुगलादर्शौ वहन्तीं परा-
मावृतां परिचारिकाभिरनिशं ध्यायेच्छ्रियं शार्ङ्गिणः ॥

अत्र वसुपात्रादीनि दक्षिणाधोहस्तमारभ्य ध्यातव्यानि । आवरणपूजायां केशरेष्वाग्नेयादिकोणेषु हृदयशिरःशिखाकवचानि, दिक्षु-अस्त्रम्, दलमूलेषु-श्रीधरहृषीकेश-वैकुण्ठविश्वरूपवासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाः, दलमध्येषु – भारतीपार्वतीचान्द्रीशचीदमकसलिलगुग्गुलुकुरुण्टकाः, दलाग्रेषु–अनुरागवि-सम्वादविजयवल्लभमदहर्षबलतेजांसि देवीवाणाः, तद्बहिर्लोकपालान, तद्बहिस्तदस्त्राणि च पूजनीयानि ।

लक्षं जपेत्फलैर्बिल्वैर्जुहुयान्मधुरोक्षितैः ।
दशांशं संस्कृतं वह्नौ प्राक्प्रोक्तेनैव वर्त्मना ॥

अथ श्रीमन्त्रेषु साधारणधर्माः

श्रियो मन्त्रं भजेन्मन्त्री श्रीसूक्तान्यापि सञ्जपेत् ।
भूयसीं श्रियमाकांक्षन् सत्यवादी भवेत्सदा ॥
प्रत्यगाशामुखोऽश्नीयात स्मितपूर्वम्प्रियम्वदेत् ।
शयीत शुद्धशय्यायान्तरुण्या सह नान्यथा ॥

नग्नो नावतरेद्धृष्टस्तैलाभ्यक्तो न भक्षयेत् ।
दरिद्रां न मुखे लिम्पेन्न जप्यादशुचिः क्वचित् ॥
न वृथा विलिखेद्भूमिं न विल्वं द्रोणमम्बुजम् ।
धारयेन्मूर्ध्नि नैवोष्ठाल्लोनं तैलञ्च केवलम् ॥
मलिनो न भवेज्जातु कुत्सितान्नं न भक्षयेत् ।
द्रोणपङ्कजविल्वानि पद्भ्यां जातु न लङ्घयेत् ॥
महादेवीमिन्द्रवल्लीं श्रीदेवीं विष्णुवल्लभाम् ।
कन्यां जम्बु प्रवालञ्च धारयेन्मूर्ध्नि सर्वदा ॥
इत्याचारपरो नित्यं विष्णुभक्तो दृढव्रतः ।
प्रियमाप्नोति महतीं देवानामपि दुर्लभाम् ॥

अथ श्रीसूक्तम्

ओं हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोम आवह ॥
ताम्म आवह जातवेदो लक्ष्मीमनपगामनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियन्देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥
कांसोस्मितां हिरण्यप्रकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पाद्मिनीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ॥
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ विल्वः ।
तस्य फलानि तपसा नुदन्तु मा याऽन्तरायाश्च बाह्या अलक्ष्मीः ॥
उपैतु मां देवसखः कीर्त्तिश्च माणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्त्तिमृद्धिं ददातु मे ॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिञ्च सर्वां निर्णुद मे गृहात् ॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
मनस काममाकतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥
कर्दमेन प्रजा भूत मयि संभव कर्द्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
निच देवीं मातरं श्रियं वासय मे कुले ॥
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
आर्द्रां यः करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पञ्चदशर्चञ्च श्रीकामः सततं जपेत् ॥
पद्मानने पदम ऊरू पद्माक्षि पद्मसम्भवे ।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥
अश्वदायी च गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामांश्च दहि मे ॥
पुत्र पौत्रं धनं धान्यं हस्त्यश्वादिगवे रथम् ।
प्रजानां भवसी माता आयुष्मन्तं करोतु मे ॥

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजाप्रदीपे श्रीमन्त्रपूजापरिच्छेदः ।

अथ भुवनेश्वरीमन्त्राः

नकुलीशोग्निमारुढो वामनेत्रोर्ध्वचन्द्रवान् ।
बीजं तस्यास्समाख्यातं सेवितं सिद्धिकांक्षिभिः ॥

अत्र संहारप्रकारेण सृष्टिप्रकारेण च मातृकां विन्यस्य प्राणायामादिकं

विधाय अस्य भुवनेश्वरीमन्त्रस्य शक्तिऋषिर्गायत्रीछन्दो भुवनेश्वरीदेवता-ऽभीष्टार्थसिद्धौ विनियोगः, इति स्मृत्वा शिरोवदनहृत्सु ऋषिछन्दोदेवता विन्यस्य मूलेन व्यापकङ्कृत्वा मस्तके -ओं हृल्लेखायै नमः। वदने-ओं गगनायै नमः। हृदये ङं रक्तायै नमः। गुह्ये-इं करालिकायै नमः। पादद्वये अं-महोष्मायै नमः। उर्ध्वमुखे-ओं हृल्लेखायै नमः। पूर्वमुखे-एं गगनायैनमः। दक्षिणमुखे-ङं रक्तायैनमः। उत्तरमुखे-लंकरालिकायैनमः। पश्चिममुखे -अं महोच्छ्वासायैनमः। इति विन्यस्य कराङ्गन्यासङ्कुर्यात्।

तत्र ह्रां हृदयायनमः। ह्रीं शिरसे स्वाहा। हूँ शिखायैवषट्। ह्रैं कवचायहुम्। ह्रौं नेत्रत्रयायवौषट्। ह्रः अस्त्रायफट्, इति मन्त्राः।

ततः भाले गायत्रीसहित ब्रह्मणेनमः। दक्षिणकपोले—सावित्रीसहित-विष्णवेनमः। वामकपोले—वागीश्वरीसहितमहेश्वराय नमः। वामकर्णाग्रे-श्रीसहितधनपतये नमः। मुखे रतिसहितस्मराय नमः। सव्यकर्णोपरि पुष्टि-सहितगणपतये नमः। दक्षिणगण्डकर्णान्तराले-शङ्खनिधयेनमः। वामगण्ड-कर्णान्तराले-पद्मनिधये नमः। मुखे-मूलं न्यसेत्।

कण्ठमूले—गायत्रीसहितब्रह्मणे नमः। दक्षिणस्तने-सावित्रीसहितविष्ण-वेनमः। वामस्तने-वागीश्वरीसहितमहेश्वराय नमः। दक्षिणांशे-श्रीसहितधन-पतये नमः। हृदि रतिसहितस्मराय नमः। सव्यांशे-पुष्टिसहितगणपतये नमः। पार्श्वयोः-शङ्खनिधये नमः। पद्मनिधये नमः नाभिवक्रमूले। भाले ब्राह्मीम्। वामांशे-माहेश्वरीम्। वामपार्श्वे-कौमारीम्। जठरे-वैष्णवीम्। दक्षिणपार्श्वे वाराहीम्। दक्षिणांशे-इन्द्राणीम्। अपरांशे-चामुण्डाम्। हृदि-महालक्ष्मीम् विन्यस्य व्यापकङ्कुर्यात्।

ततः शेषम्विधाय सूर्यमण्डले देवीं सञ्चिन्त्य सूर्यायार्घन्दद्यात्। पद्ममष्टदलं वाह्यवृत्तं षोड़शभिर्दलैः विलिखेत्। कर्णिकामध्ये षट्कोणमतिसुन्दरमाचाराद् भूपुरावृत्तान्तदिति पूजायन्त्रम्।

ततः पीठदेवताः पूजयेत्। जया, विजया, अजिता, अपराजिता, नित्या, विलासिनी, दोग्ध्री, अघोरा, मङ्गलाः पीठशक्तयः। ओं ह्रीं महाशक्तिपद्मासनाय नम इति पीठमन्त्रम्।

शुभ्रदिनद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम् ।
स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां प्रभजे भुवनेशीम् ॥

इति ध्यानम् ।

आवरणपूजाङ्कृत्वा देवतां षोडशोपचारैस्सम्पूज्य कर्णिकायां मध्ये- ओं हृल्लेखां पूर्वत ऐं गगनीं दक्षिणत उं रक्ताम्, उत्तरतः इं करवालिकाम् पश्चिमतः अं महेष्वासाम्पूजयेत् ।

आग्नेयादिकोणेषु हृदयशिरःशिखाकवचानि । अग्रे नेत्राणि । दिक्ष्वस्त्रम् । षट्कोणस्य पूर्वकोणे गायत्रीं ब्रह्माणञ्च । निर्ऋति कोणे-सावित्रीं विष्णुञ्च वायुकोणे-वसुमतीं रुद्रञ्च, वह्निकोणे-कुवेरं महालक्ष्मीं च, वारुणकोणे मदनं रतिञ्च, ईशानकोणे-विघ्नराजं पुष्टिञ्च । षट्कोणपार्श्वयोः-शङ्खपद्मनिधी ।

केशरेष्वाग्नेयादिकोणेषु हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् । दिक्ष्वस्त्रम् । पूर्वाद्यष्टदलेष्वनङ्गकुसुमानङ्ग-कुसुमामातुर्यनङ्गमदनामनङ्गमदनातुरां भुवनपालां गगनवेगां शशिरेखांङ्गगनरेखाम् ।

प्रागादिषोड़शपत्रेषु कराली, विकराली, उमा, सरस्वती, दुर्गा, उषा, लक्ष्मी, श्रुति, स्मृति, धृति श्रद्धा, मेधा, मति, मदनातुरा, भुवनवेगा, भुवनपाला, सर्वशिशिरा, अनङ्गवदना, अनङ्गमेखलाः । तद्बहिः लोकपालान् । तद्बहिस्तदस्त्राणि च पूजयेत् । अथावरणध्यानम् —

हृल्लेखाद्याः समभ्यर्च्याः पञ्चभूतसमप्रभाः ।
वरपाशाङ्कुशाभीतिधारिण्योऽसितभूषणाः ॥

दण्डकुण्डिकाक्षमालाऽभयहस्तौ गायत्रीब्रह्माणौ । चक्र, शङ्ख, गदा, पद्म, धारिणौ पीताम्बरौ सावित्रीविष्णू । परश्वक्षमालाऽभयवरहस्तौ श्वेतवर्णासरस्वतीरुद्रौ । रत्नकुम्भमणिकरण्डकवरः तुन्दिलः कुवेरः । तदङ्गस्था वामवाहुना तमालिङ्ग्य दक्षिणहस्तेन पद्मधारिणीमहालक्ष्मीः । वाणपाशाङ्कुशसंवासनहस्तो रक्तवर्णो रक्तमाल्यादिमर्दनः ।

तद्दक्षिणबाहुनालिङ्गय वामेनोत्पलधारिणी रतिः । अङ्कुशपाशहस्तः करेण कान्ताभगं स्पृशन् दिगम्बरो माध्वीकपूर्णकपालधारयन् पुष्करेण चक्रधारी रक्तवर्णो विघ्नेशः । मदविह्वला रक्तवर्णा एकपाणिना गणेशलिङ्गं स्पृशन्तीमन्येन धृतरक्तोत्पला समाश्लिष्टकान्ता दिगम्बरा ।

पुष्टिः अनङ्गरूपाद्या अनङ्गकुसुमायुधा ।
उषकं तालवृत्तञ्च ताम्बूल छत्रमुज्वलम् ॥
चामरे शुक्लपुष्पञ्च बिभ्राणाः करपल्लवैः ।
नानाभरणसन्दीप्ताः मन्त्रं जपेन्मन्त्रवित् ॥
प्रजपेन्मन्त्रविन्मन्त्रं द्वात्रिंशल्लक्षमानतः ।
त्रिष्वानुयुक्तै र्जुहुया - दष्टद्रव्यैर्दशांशतः ॥
दद्यादर्घं दिनेशाय तत्र सञ्चिन्त्य पार्वतीम् ।
अश्वत्थोदुम्बरप्लक्षन्यग्रोध - समिधस्तिलाः ॥
सिद्धार्थपायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधाः ।
वाग्भवं शम्भुवनिता रमावीजत्रयात्मकम् ।
मन्त्रं समुद्धरेन्मन्त्री त्रिवर्गफलसाधनम् ॥

अस्य मन्त्रस्याङ्गमन्त्रध्यानातिरिक्तं सर्वं पूर्वोक्तभुवनेश्वरीबीजवत् । अङ्गमन्त्रास्तु—ऐं ह्रीं हृदयायनमः । ऐं ह्रीं शिरसे स्वाहा । ऐं ह्रीं शिखायैवषट । ऐं ह्रीं कवचाय हुम् । ऐं ह्रौं नेत्रत्रयाय वौषट् । ऐं ह्रः अस्त्राय फट् । ध्यानन्तु—

सिन्दूरारुणविग्रहां त्रिनयनां मालिक्यमौलिस्फुर-
त्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।
पाणिभ्यां मणिपूर्णरत्नचषकं रत्नोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थसव्यचरणां ध्यायेत्परामम्बिकाम् ॥

इति रत्नचषकं दक्षिणहस्ते ।

रविलक्षं जपेन्मन्त्रं पायसैर्मधुराप्लुतैः ।

दशांशं जुहुयान्मन्त्री पीठे प्रागीडिते यजेत् ॥
वाग्बीजपुटिता माया विद्येयं त्र्यक्षरी मता ।

अत्रापि पीठमन्त्रपर्यन्तमङ्गमन्त्रवर्जं भुवनेश्वरीबीजवत् । अङ्गमन्त्रास्तु-ऐं ह्रां ऐं हृदयायनमः । ऐं ह्रीं ऐं शिरसे स्वाहा । ऐं ह्रूं ऐं शिखायैवषट् । ऐं ह्रैं ऐं कवचायहुम् । ऐं ह्रौं ऐं नेत्रत्रायाय वौषट् । ऐं ह्रः ऐं अस्त्राय फट् ।

ध्यानन्तु - श्यामाङ्गीं शशिशेखरां निजकरैर्दानञ्च रक्तोत्पलं
रत्नाद्यं चषकं वरं भयहरं सम्बिभ्रतीं शाश्वतीम् ।
मुक्ताहारलसत्पयोधरवतीं नेत्रत्रयोल्लासिनीम्
वन्देऽहं सुरपूजितां हरवधूं रक्तारविन्दे स्थिताम् ॥

वराद्यधो दक्षिणहस्तमारभ्य प्रादक्षिण्येन । आवरणपूजायाङ्कर्णिकायां मध्ये हृल्लेखां पूर्वत. गगनाम्, दक्षिणतः रक्ताम्. षट्कोणस्य पूर्वकोणे गायत्रीं ब्रह्माणञ्च । नैर्ऋतिकोणे सावित्रीं विष्णुञ्च । वायुकोणे सरस्वतीं वरुणञ्च। वह्निकोणे—कुवेरं महालक्ष्मीञ्च, वारुणकोणे-मदनं रतिञ्च । ईशानकोणे-विघ्नेशं पुष्टिञ्च । आग्नेयादिकोणकेसरेषु हृदयशिरःशिखाकवचानि । अग्रे-नेत्रम् । दिक्ष्वस्त्रम् ।

पूर्वादिदलेषु-आं ब्राह्मी, इं माहेश्वरी, उं कौमारी, ऋं वैष्णवी लृं वाराही, ऐं इन्द्राणी । औं-चामुण्डा अः । महालक्ष्मीः । दलाग्रेषु-अं असिताङ्गाय नमः । इं रुरवे, तं चण्डाय, ऋं क्रोधाय । तृं उन्मत्ताय । एं कपालिने । ओं भीषणाय । अं संहाराय । एतैर्मन्त्रैर्नमोन्तैरसिताङ्गादीन् भैरवान् पूजयेत् ।

ततः षोड़शपत्रेषु कराली, विकराली, उमा, सरस्वती, श्री, दुर्गा, उषा, लक्ष्मी, श्रुति, स्मृति, धृति, श्रद्धा, मेधा, मति, कान्ति, आर्य्याः । तद्बहिरनङ्गरूपा, अनङ्गमदना, मदनातुरा, भुवनवेगा, भुवनपालिका, सवशिशिरा, अनङ्गवदना, अनङ्गमेखलास्तद्बहिर्लोकपलान् , तद्बहिस्तदस्त्राणि च पूजयेत् ।

ध्यानम् — भैरवाङ्गसमारुढ़ाः स्मेरवक्रा मदालसाः । भैरवा-असिताङ्गादयः, असिताङ्गादयश्च—

शूलङ्कपालं प्रेतञ्च बिभ्राणाः क्षुद्रदुन्दुभिम् ।
गजत्वगम्बरा भीमाः कुटिलाननशोभिताः ॥

ध्यातव्याः । अपरेषान्तु ध्याननं भुवनेश्वरीपद्धतौ द्रष्टव्यम् ।

तत्र— लक्षं जपेन्महामन्त्रं श्रद्धया तद्दशांशतः ।
पलाशपुष्पैः स्वादुक्तैः पुष्पैर्वा राजवृक्षजैः ॥
अनन्तो बिन्दुसंयुक्तो माया ब्रह्माग्नितारवान् ।
पाशादित्र्यक्षरो मन्त्रः सर्वाभीष्टफलप्रदः ॥

अस्य भुवनेश्वरीमन्त्रस्य शक्तिऋषिर्गायत्रीछन्दो भुवनेश्वरी देवता अभीष्टसिद्धौ विनियोगः । ह्रीं हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रीं शिखायैवषट् । ह्रीं कवचायहुम् । ह्रीं नेत्रत्रयाय वौषट् । ह्रीं अस्त्रायफट् । इत्यङ्गमन्त्राः । कर्णिकास्तु षट्कोणं षोड़शपत्रावृत्ताम् । आचाराद्ध पुरावृतमष्टदलं पूजायत्रम् । जया, विजया, अजिता, अपराजिता, नित्या, विलासिनी दोग्ध्री, अघोरा, मङ्गलाः पीठशक्तयः । ह्रीं इति पीठमन्त्रः ।

ध्यानन्तु—वराङ्कुशौ पाशमभीतिमुद्रां करैर्वहन्तीङ्कमलासनस्थाम् ।
बालार्ककोटिप्रतिमान्त्रिनेत्रां भजेहमाद्यां भुवनेश्वरीन्ताम् ॥

वरादयो दक्षिणहस्तमारभ्य वामाधोहस्तपर्यन्तम् । आवरणपूजायाङ्कर्णिकायाम्मध्ये हृल्लेखा, पूर्वतः-गगना, दक्षिणतो-रक्ता, उत्तरतः करालिका, पश्चिमतः-महोष्मा । केसरेष्वाग्नेयादिकोणेषु-हृदयशिरःशिखाकवचानि । अग्रे नेत्रम्, दिक्षवस्त्रम् । पत्रेषु-ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्म्यः , तद्वहिर्लोकपालान् , तद्वहिस्तदस्त्राणि च पूजनीयानि । हृल्लेखादिध्यानं भुवनेश्वरीबीजे ब्रह्माण्यादिध्यानं मातृकामन्त्रपरिच्छेदे द्रष्टव्यम् ।

हविष्यतु जपेन्मन्त्रन्तत्त्वलक्षं जितेन्द्रियः ।
षट्सहस्रं प्रजुहुयाज्जपान्ते मन्त्रवित्तमः ॥
दधिक्षौद्रघृताक्ताभिः समिद्भिः क्षीरभूरुहाम् ।
शतसङ्ख्यया तिलैश्शुद्धैः पयोक्तैर्जुहुया ततः ॥

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजाप्रदीपे भुवनेश्वरीपूजापरिच्छेदः ।

अथ दुरितात्रिपुरान्नपूर्णामन्त्राः

भावो मायाबमंवीजमृद्धिरीश-सुरान्विता ।
कूर्मस्तदन्त्यो भगवानक्षः दीर्घन्तनुच्छदम् ॥
मं मूर्त्तौ भगवान् माया फडन्तो द्वादशाक्षरः ।

अत्र ध्याने ताटङ्कङ्गदादिकं ब्राह्मणैस्सर्वैर्ध्यातव्यम् । तदुक्तं प्रपञ्चसारे—

श्यामतनुमरुणपङ्कजचरणतलां वृषलनागमञ्जरीणाम् ।
पर्णांशुकपरिधानी वैश्याहिद्वन्द्वमेखलाकलिताम् ॥
नृपमणिकेयूरान्ताङ्गलविलसद्विविधमणिमुद्राभरणाम् ।
द्विजनागविहितकुण्डलमण्डितगण्डद्वयी मुकुरशोभाम् ॥

अतएवाष्टमनागप्राप्तये मेखला च गुणश्चेति द्वन्द्वो नादरणीयः । अहिद्वयेन मेखलाया एवाभिधानात् ।

अस्य मन्त्रस्यार्जुनऋषिर्विराटछन्दस्त्वष्टा देवता पुरुषार्थचतुष्टये विनियोगः । शिरसि ओं । भाले ङ्क्ं । गले खे । हृदि च । नाभौ छ । गुह्ये क्षः । उर्वोः-स्त्रीं । जानुनोः-हुम् । जङ्घयोः-क्षे । पादयोः-फट् । इति विन्यसेत् ।

ओङ्कारानन्तरं शिरस्येव प्रथमां क्षेकारानन्तरं पादयोरेव द्वितीयां मायां न्यसेदिति प्रपञ्चसारटीकायाम् । मूलेन व्यापकङ्कृत्वा कराङ्गन्यासौ कुर्यात् । तत्र मन्त्राः—

च छे हृदयायनमः । छे क्षः शिरसे स्वाहा । क्षः स्त्रीं शिखायै वषट् । स्त्रीं कवचाय हुम् । क्षे नेत्रत्रयाय वौषट् । क्षे ह्रीं अस्त्राय फट् । भुवनेश्वरीमन्त्रकथितं पूजायन्त्रम् । जया, विजया, अजिता, अपराजिता, नित्या,

विलासिनी, दोग्ध्री, अघोरा, मङ्गला, पीठशक्तयः। क्षुं हुं हं रक्तदेहपुरुरुहिओङ्क गज्जं हं ङ्कं क्षां पञ्चाननाय नमः। इति पीठमन्त्रः।

ध्यानम्—श्यामाम्बर्हिकलापशेखरयुतामाबद्धपूर्णांशुकां
गुञ्जाहारलसत्पयोधरभरामष्टाहिपानबिभ्रतीम्। (.........)
ताटङ्काङ्गुदमेखलागुणरणन्मुक्तावतां प्रापितान्
कैरातिं वरदाभयोद्यतकरां देवीन्त्रिनेत्राम्भजेत्॥

अत्र ब्राह्मणसर्पाभ्यां ताटङ्कद्वयम्। क्षत्रियसर्पाभ्यां मङ्गदद्वयम्। वैश्यसर्पाभ्यां मेषलाद्वयम्। शूद्रसर्पाभ्यां मञ्जीरद्वयं ध्येयम्। आवरण-पूजायां पूर्वाद्यष्टकेशरेषु यथाक्रमं हृदयादिषड़ङ्गं प्रणीता गायत्री।

दलेषु-हूँकारी, खेचरी, चण्डा, छेदिनी, क्षेपणी, स्त्रीं हूङ्कारी क्षेमकारी, लोकपालतुल्यायुधवर्णभूषणाः श्रीवीजेन पूजयेत्। तद्बहिर्द्व्या अग्रे एका दण्डवाणधारिणीं फट्कारीं, द्वारस्य पार्श्वयोः सुवर्णवेत्रकरे जयाविजये, तद्बहिर्लगुड़हस्तं कृष्णरूक्षकेशं किङ्करं - किङ्कराय रक्ष रक्ष त्वरिताज्ञा स्थिरो भव हूँ फट् इति मन्त्रेण पूजयेत्।

लक्षं संजप्य मन्त्रज्ञो मन्त्रमेनं जितेन्द्रियः।
दशांशं जुहुयाद्बिल्वैर्मधुराक्तैस्ससिन्दुरैः॥
श्रीमायामदनैः प्रोक्तो मन्त्रो वीजत्रयात्मकः॥

अस्य मन्त्रस्य सम्मोहनऋषिर्गायत्रीछन्दस्त्रिपुरादेवताद्यभीष्टसिद्धौ विनियोगः। श्रीं हृदयाय नमः। ह्रीं शिरसे स्वाहा। क्लीं शिखायैवषट्। श्रीं कवचाय हूँ। ह्रीं नेत्रत्रयाय वौषट्। क्लीं अस्त्राय फट्। इत्यङ्ग-मन्त्राः।

षट्कोणगर्भमष्टदलमाचारात्सद्वारभूपुरावृत्तं पद्मं पूजायन्त्रम्। जया, विजया, अजिता, अपराजिता, नित्या, विलासिनी, दोग्ध्री, अघोरा मङ्गलाः पीठशक्तयः।

पारिजातवने रम्ये मण्डपे मणिकुट्टिमे ।
रत्नसिंहासने सौम्ये पद्मे षटकोणशोभिते ॥
अधस्तात्कल्पवृक्षस्य निषण्णां देवतां स्मरेत् ।
चापं बाणाम्बुजसरसिजान्यङ्कुशंपुष्पबाणान्
बिभ्राणां तां करसरसिजै रत्नमौलिं त्रिनेत्राम् ।
हेमाब्जाभां कुचभरनतां रत्नमञ्जीरकाञ्चीः
ग्रैवेयाद्यैर्विलसिततनुं भावयेच्छक्तिमाद्याम् ॥
चामरादर्श - ताम्बूलकरण्डक - समूहकान् ॥
वहन्तीभिः कुचार्ताभिर्दूतीभिः परिवाहिताम् ।
कारुण्यामृतवर्षिण्या पश्यन्तीं साधकं दृशा ॥

चापादिकं ऊर्ध्ववामहस्तमारभ्यर्ध्वदक्षिणहस्तपर्यन्तं ध्यातव्यम् । इति ध्यानम् ।

आवरणपूजायामाग्नेयादिषट्कोणेषु लक्ष्मी, हरि, गौरी, शिव, रति, स्मरान् । पार्श्वयोः-शङ्खनिधिपद्मनिधी, केशरेष्वग्न्यादिकोणेषु हृदयशिरः-शिखाकवचानि । अग्रे नेत्रम् । दिक्षवस्त्रम् । पत्रेषु-ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही इन्द्राणी, चामुण्डा, महालक्ष्म्यतद्बहिः स्त्री-रूपान् सौम्यदेहान् लोकपालान् ।

अथ लक्ष्म्यादिध्यानम्—

लक्ष्मीं हेमप्रभां तन्वीं सवराक्तयुगाभयाम् ।
चक्रशङ्खगदाम्भोजधरं हेमनिभं हरिम् ॥
पाशाङ्कुशाभयाभीष्टधरां गौरीं जवारुणाम् ।
मृगटङ्काभयाभीष्टधरं स्वर्णनिभं शिवम् ॥

नीलोत्पलकरां सौम्यां रतिं काञ्चनसन्निभाम् ।
धृतपाशाङ्कुशेष्वासपुष्पेष्वरुणं स्मरम् ॥

शङ्खपद्मनिधि ध्यानं श्रीबीजपद्धतौ ब्राह्म्यादिमातृकाध्यानं मातृकापूजा परिच्छेदे द्रष्टव्यम् ।

भानु लक्षं जपेदेनं मन्त्रं तावत्सहस्रकम् ।
विल्वगन्धसम्भूतैर्मधुराक्तैः समिद्वरैः ॥
जवापुष्पैश्च जुहुयात्तोषयेद्वसुना गुरुम् ।

अथान्नपूर्णामन्त्रः

माया हृद्भगवत्यन्ते माहेश्वरि पदम्वदेत् ।
अन्नपूर्णे च युगलं मन्त्रः सप्तदशाक्षरः ॥

अस्य मन्त्रस्य सम्मोहनऋषिर्गायत्रीछन्दोऽन्नपूर्णादेवताऽन्नसमृद्धौ विनियोगः। ह्रीं हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रीं शिखायै वषट्। ह्रीं कवचाय हूँ। ह्रीं नेत्राभ्यां वौषट्। ह्रीं अस्त्राय फट्। इत्यङ्गमन्त्राः।

षोड़शदलावृत्तमष्टदलं षट्कोणकर्णिकं भूपुरावृत्तपद्मं पूजायन्त्रम्। जया, विजया, अजिता, अपराजिता, नित्या विलासिनी, दोग्ध्री, अघोरा मङ्गलाः पीठशक्तयः। ध्यानम्—

रक्तां विचित्रवसनां नवचन्द्रचूड़ामन्नप्रदाननिरतां स्तनभारनम्राम् ।
नृत्यन्तमिन्दुसकलाभरणम्विलोक्य हृष्टाम्भजे भगवतीं भवदुःखहन्त्रीम् ।

आवरणपूजायाम् - केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि, अग्रे - नेत्रे, दिक्ष्वस्त्रम्, तद्बहिर्लोकपालान्, तद्बहिस्तदस्त्राणि च पूजयेत।

यथाविधि जपेन्मन्त्रं वसुयुग्मसहस्रकम् ।
साज्येनान्नेन जुहुयात्तद्दशांश - मनन्तरम् ॥

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूरापूदीपे दुरिता-ज्ञिपुरान्नपूर्णापूजापरिच्छेदः।

अथ दुर्गामन्त्रः

मायाऽत्रिकर्णविन्द्वाढ्यो भूयो सोमर्गवाग्भवेत् ।
पञ्चान्तकः प्रतिष्ठावान् मारुतो भौतिकासनः ॥

तारादिहृदयान्तोऽयं मन्त्रो वस्वक्षरात्मकः ।

अस्य मन्त्रस्य नारदऋषिर्गायत्री छन्दो दुर्गादेवता सकलपुरुषार्थसिद्धौ बिनियोगः । ओं ह्रीं दुं दुर्गायै ह्रीं शिरसे स्वाहा । ओं ह्रीं दुं दुर्गायै हूँ शिखायै बषट् । ओं ह्रीं दुं दुर्गायै ह्रं कवचाय हुम् । ओं ह्रीं दुं दुर्गायै ह्रौं नेत्रत्रयाय वौषट् । ओं ह्रीं दुं दुर्गायै ह्रः अस्त्राय फट् । इत्यङ्गमन्त्राः । प्रपञ्चसारमते तु दुं इति वीजरहिता एवाङ्गमन्त्राः ।

आं प्रभा, इं माया, उं जया, एं सूक्ष्मा, ऐं विशुद्धा, ओं नन्दिनी, औं सुप्रभा, अं विजया, अः सर्वसिद्धिदा इति सवीजाः पीठशक्तयः । ओं वज्रदंष्ट्रायुधाय महासिंहाय हुं फणाय इति पीठमन्त्रः । ध्यानम्—

सिंहस्था शशिशेखरामरकतप्रख्यैश्चतुर्भिर्भुजैः
शङ्खं चक्रधनुः शरांश्च दधती नेत्रैस्त्रिभिश्शोभिता ।
आमुक्ताङ्गदहारकङ्कणरणत्काञ्चीक्वणन्नूपुरा
दुर्गा दुर्गतिनाशिनी भवतु नो रत्नोल्लसत्कुण्डला ॥

ऊर्ध्वदक्षिणहस्त मारभ्य प्रादक्षिण्येन शङ्खादिचतुष्टयन्ध्येयम् । आवरणपूजायां केसरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि । अग्रे नेत्रम्, दिक्ष्वस्त्रम्, सम्पूज्य पूर्वादिपत्रेषु जं जयायै, विं विजयायै, व्यैं प्रीं प्रीत्यै, प्रं प्रभायै, श्रं श्रद्धायै, में मेधायै, श्रुं श्रुत्यै, नमोन्तैरेभिर्ज्जयाद्याः पूजयेत् ।

ततः पत्राग्रेषु चक्र, शङ्ख, गदा, खड्गपाशाङ्कुश शरधनूंषि । तद्बहिर्लोकपालान्, तद्बहिस्तदस्त्राणि च पूजयेत् ।

वसुलक्षं जपेन्मन्त्रं तिलैर्मधुरलोलितैः ।
पयोद्बसाराज्जुहुयात्तत्सहस्रं जितेन्द्रियः ॥
श्रीयन्त्रं विमले नयनं श्वेतोमर्द्दन च द्वयम् ।
अष्टाक्षरी समाख्याता विद्या महिषमर्द्दिनी ॥

अत्र दकारे इकारं केचिदिच्छन्ति, तन्मूलाभावात्,

विषं हि मज्जा कालोग्निरत्रिनिष्ठोनि च द्वयम् ।
मन्त्रो महिषमर्दिन्याः प्रोक्तो वस्वक्षरात्मकः ॥

इति ग्रन्थान्तरविरोधाच्च नादेयम्। अस्य मन्त्रस्य नारदऋषिर्गायत्री-छन्दो महिषमर्दिनीदेवताऽभीष्टसिद्धौ विनियोगः। महिषहिंसके हूँ फट् हृदयाय नमः। महिषशत्रोर्मर्द्द ह्रूँ फट् शिरसे स्वाहा। महिषं हेषय हेषय हूँ फट् शिखायै वषट्। महिषं हन हन दिवि हूँ फट् कवचाय हुँ। महिष सूदिनि हुँ फट् अस्त्राय फट्। इति पञ्चाङ्गमन्त्राः।

आं-प्रभा, इं माया, उं जया, एं सूक्ष्मा, ऐं विशुद्धा, ओं नन्दिनी, औं सुप्रभा, अं विजया, अः सर्वसिद्धिदा। एता मन्त्रसहिताः पीठशक्तयः। ओं वज्रनखदंष्ट्रा युधाय महासिंहाय हुँ फड्नमः इति पीठमन्त्रः। ध्यानम्—

गारुडोपमसन्निभां मणिमौलिकुण्डलमण्डितां
नौमि भालविलोचनां महिषोत्तमाङ्गनिषेदुषीम्।
चक्रशङ्खकृपाणखेटकवाणकार्मुक शूलकं
तर्ज्जनीमपि बिभ्रतीं निजबाहुभिश्शशिशेखराम् ॥

ऊर्द्ध्वयोर्द्दक्षिणवामहस्तयोः चक्रशङ्खौ। तदधोहस्तयोः कृपाणखेटके। एवमग्रेऽपि। आवरणपूजायाङ्केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखा-कवचानि। अग्रे-नेत्राणि, दिक्ष्वस्त्रम्, सम्पूज्य पत्रेषु आं दुर्गायै, इं-वरवर्णिन्यै उँ आर्य्यायै, ऋं-कनकप्रभायै, लृं-कृत्तिकायै, ऐं अभयप्रदायै, ओं कन्यायै, अः स्वरूपायै नमः।

पत्राग्रेषु - यं चक्राय, रं शङ्खाय, लं-खड्गाय। वं खेटकाय, शं बाणाय, षं धनुषे, सं शूलाय। हं कपालाय नमोन्तैरेभिस्सम्पूज्य तद्बहिर्लोकपा-लान्, तद्बहिस्तदस्त्राणि च पूजयेदिति।

अष्टलक्षं जपेन्मन्त्रं तत्सहस्रन्तिलैश्शुभैः ।
हुत्वा प्रागीडिते पीठे यजेन्महिषमर्दिनीम् ॥
तारे दुर्गे युगं रक्तमन्त्योचान्तं सलोचनम् ।
द्विचान्ता जय दुर्गेयं बिद्या वेद्या दशाक्षरी ॥

अस्य मन्त्रस्य नारदऋषिर्गायत्रीछन्दो जयदुर्गादेवता युद्धजयाद्यभीष्ट-सिद्धौ विनियोगः । ओं दुर्गे हृदयाय नमः । ओं दुर्गे शिरसे स्वाहा । ओं दुर्गायै शिखायै वषट् । भूतरक्षिणि कवचाय हुम् । ओं दुर्गे रक्षिणि नेत्रत्रयाय वौषड्नमः । ओं दुर्गे दुर्गे रक्षिणि अस्त्राय फट् इत्यङ्गमन्त्राः । ओं वज्र-नखदंष्ट्रायुधाय महासिंहाय हुँ फट् । इति पीठमन्त्रः ।

ध्यानम् –

कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीन्त्रिनेत्राम् ।
सिंहस्कन्धाधिरुढां त्रिभुवनमखिलन्तेजसा पूरयन्तीम्
ध्यायेद्दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः ॥

ऊर्ध्ववामहस्तमारभ्य शङ्खादीनि प्रादक्षिण्येन ध्येयानि । आवरण-पूजायाङ्केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि । अग्रे-नेत्रम्, दिक्ष्वस्त्रम्, सम्पूज्य पत्रेषु आं दुर्गायै, इं वरवर्णिन्यै, उं आर्य्यायै, ऋं कनकप्रभायै, इत्यादि क्रमेण पूर्ववत् ।

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजाप्रदीपे श्रीदुर्गापूजा-परिच्छेदः ।

अथ त्रिपुरभैरवीमन्त्रम्

वियत्तदादिकेन्द्रादि स्थितं वामाक्षिविन्दुमत् ।
आकाशभृगुवह्निस्थो मनुः सर्गेन्दुखण्डवान् ॥

वाग्भवं प्रथमं वीजं कामराजन्द्वितीयकम् ।
तृतीयं शक्तिवीजाढ्यं त्रिपुरेति विनिश्चितम् ॥
तदात्मिका च विद्या सा प्रोक्ता त्रिपुरभैरवी ॥

अत्र प्रथमान्तवीजयोः रेफव्यतिरेकेण अन्ते विन्दुर्व्यतिरेकेणोक्तम् । सारसमुच्चये मन्त्रमुपक्रम्य शिवशक्तिवीजमतएव शम्भुना निहितम् । तयोरुपरि पूर्ववीजयोः । अकुलं परोपरि च मध्यमाधरे दहनं ततःप्रभृति सोज्जिताऽभवदिति । तथोदितस्यास्य मन्त्रस्य वीतिना सहकारम्विना सकारादित्वे विद्येति सारसमुच्चयः ।

अत्र प्रथमादिबीजानां वाग्भवादिवीजत्वस्य क्रमजनकतया गौण्य एव वाग्भवाद्याः संज्ञाः । अतो नाभेराचरणं न्यसेद्वाग्भवमित्यादिषु मन्त्रवीजान्येव लभ्यन्ते । तेन वीजैस्त्रिभिर्न्यस्येत्यादि प्रपञ्चसारेणैकवाक्यता ।

पञ्चकूटात्मकेति - पञ्चकूटमन्त्रवर्णघटितेत्यर्थः । प्रपञ्चसारे त्रिशन्मन्त्रा अत्रेत्युक्तम् । करयोः प्रत्येकं मिलितयोश्च वीजत्रयन्यास यद्यप्याद्यं द्वितीयङ्करयोरिति शारदावचनात् प्रथमं दक्षिणहस्त एव न्यासो युज्यते । तथाऽपि वीजैस्त्रिभिर्न्यासः हस्ततले च सव्ये दक्षाह्वये द्वितीयमप्युभयोस्तृतीयमिति प्रपञ्चसारवचनानुरोधेन वामदक्षिणक्रमेणैव हस्ततलयोर्वीजद्वयन्यासः । नेत्रेषु वीजत्रयन्यासो दक्षवामोर्ध्वक्रमेणेति प्रपञ्चसारविवरणम् । सारसमुच्चये तु—

सव्यापसव्ये क्षणयोर्ललाटे ततो बुधः कर्णयुगे च वक्त्रे । इत्यनेन वामादिरेव क्रम उक्तः । एवञ्च करणे तयोर्वामदक्षिण क्रमेण न्यास प्राप्तौ प्रपञ्चसारीय एव । अतः स एव क्रमो युज्यते । पूजायन्त्रे नरयोनि लिखन प्रकारश्च—

वह्नेः पुरं द्वितयवासवयोनिमध्यसमुद्भवह्निवरुणेशसमाश्रितास्रि ।
देव्यर्च्चनाय विहितं मुनिभिः पुरैव लोकेषु दुर्लभमिदं नरयोनिचक्रम् ॥

अत्र वासववह्न्यादिपदान्यग्राह्युपलक्षणानि । तेन यदोदङ्मुखेन पूजा क्रियते तदा दक्षिणाग्रमेकमुत्तराग्रञ्चापरं त्रिकोणं विलिख्योत्तरयोनिमध्यस्थं मध्यस्थिताग्रं तृतीयं त्रिकोणं लिखेत् ।

एवं हि मध्यस्थ योनेर्वामदक्षिणाग्रकोणेषु रतिप्रीतिमनोभवानां पूजा सम्पद्यते। रत्यादिपूजा च मध्यमयोनिकोणत्रय एव, न तु वामादियोनिषु, वामकोण इत्याद्यभिधानाद्योनिषु च तुरीयावरणपूजाविधानात्।

अस्य मन्त्रस्य दक्षिणामूर्त्तिऋषिः पङ्क्तिश्छन्दः त्रिपुरभैरवीदेवता विद्याद्यभीष्टसिद्धौ विनियोगः। मूर्ध्नि हृदि गुह्येषु वामदक्षिणोर्ध्वनेत्रेषु कर्णद्वयास्येष्वंशद्वयपृष्ठेषु कफोणिद्वयनाभिमण्डलेषु च यथाक्रमं बीजत्रयं पञ्चावृत्त्या विन्यस्य नाभेश्चरणपर्यन्तं प्रथमं बीजं हृदयान्नाभिपर्यन्तं द्वितीयं बीजं, शिरसो हृदयपर्यन्तं तृतीयं बीजं विन्यस्य वामदक्षिण करतलयोरेकैकं बीजद्वयं करतलद्वये तृतीयं बीजञ्च विन्यस्य क्रमेण मस्तकमूलाधारहृदयेषु बीजत्रयं न्यसेत्।

ततो नरयोनिन्यासः—दक्षिणवामकर्णयोश्चिबुके च यथाक्रममेवं दक्षिणवामललाटास्थिभागदलेषु, नेत्रद्वयनासिकास्वंशद्वयजठरेषु कफोणिद्वयकुक्षिषु (....)द्वयलिङ्गाग्रेषु पादद्वयगुह्येषु पार्श्वद्वयहृदयाम्बुजेषु, स्तनद्वयकण्ठेषु च यथाक्रमं क्षुद्रं दक्षिणरोमललाटास्थिबीजत्रयं न्यसेत्। मूलाधारे ऐं रत्यै नमः। हृदि क्लीं प्रीत्यै नमः। भ्रूमध्यहृदयमूलाधारेषु यथाक्रमं विलोमबीजत्रयपूर्विकाः अमृतेशी, योगेशी, विश्वयोनिः क्रमेण न्यसेत्।

अथ मूर्त्तिन्यासः

मूर्ध्नि-ह्रौं ईशान मनोभवाय नमः। ह्रैं तत्पुरुष मकरध्वजाय नमः। हृदि स्त्रं अघोरकुमारकन्दर्पाय नमः। गुह्ये-स्त्रीं वामदेव मन्मथाय नमः। पादयोः स्त्रां सद्योजात कामदेवाय नमः। ऊर्ध्वमुखे स्त्रौं ईशान मनोभवाय नमः। पूर्वमुखे-स्त्रैं तत्पुरुषमकरध्वजाय नमः। दक्षिणमुखे स्त्रं अघोरकुमारकन्दर्पाय नमः। उत्तरमुखे स्त्रि वामदेव मन्मथाय नमः। पश्चिममुखे स्त्रं सद्योजात कामदेवाय नमः। एवं विन्यस्य कराङ्गन्यासङ्कुर्यात्। तत्र मन्त्राः-ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुम्। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्।

ततो वामदेवतान्यासः— मूर्ध्नि द्रां दारिद्र्यै नमः । पादे-द्रीं क्षोभिण्यै नमः वक्त्रे-क्लीं वशीकरण्यै नमः । गुह्ये-हुँ आकर्षिण्यै नमः । हृदि-सः सम्मोहिन्यै नमः । ततः ऐं क्लीं हूं स्त्रीं सः इति पञ्चप्रणवादिकाः शुभगाद्या मालादिषु न्यसेत् । यथा-भाले ऐं क्लीं छूं सः शुभगायै नमः । एवं भ्रूमध्ये-भगाम्, वदने भगसर्पिणीम्, कण्ठिकायाम्-भगमालिनीम्, कण्ठेऽनङ्गाम्, हृदि-अनङ्गकुसुमाम्, नाभावनङ्गमेखलाम्, मूलाधारेऽनङ्गमदनां न्यसेत् ।

ततो भूषणन्यासः

शिरसि-अ० भाले-आ० भ्रुवोः क्रमेण इई । कर्णयोः-उ० ऊ० । नेत्रयोः-ऋ० ॠ० । नासिकायाम्-ऌ० गण्डे-ॡ० ए० । औष्ठाधारयोः-ऐ० ओ० । दन्तपङ्क्त्योः औं अं । मुखे-अः । चिबुके-क । गले-ख । स्कन्धे ग० । पार्श्वयोः-घ० ङ । स्तनद्वये-च । दोर्मूलयोः-छ० ज० । कफोण्योः-झ० ञ० । हस्तयोः ट ठ । करपृष्ठयोः-ड । नाभौ-ढ । गुह्ये-ण । उर्वोः-त० थ० । जानुनोः-द० ध । जङ्घयोः-न० प । स्फिचोः-फ० ब । पदतलयोः-भ० म० । चरणाङ्गुष्ठयोः य० र । ग्रैवेयके ल कट्यां व । हृदि श । गुह्ये क्ष । कुण्डलयोः स० ष० । मौलौ ह । इति न्यसेत् ।

अशक्तौ तु नरयोनिन्यासात् पूर्वमुक्तान् न्यासान् विधाय कराङ्गन्यासमात्रं कुर्यात् । नरयोनियुक्तकर्णिकमष्टदलपद्मं पूजायन्त्रम् । तत्र प्रथमं षट्कोणं विलिख्य तदग्रयोनिमध्यस्थं षट्कोणमध्यगाग्रन्त्रिकोणं लिखेत् । एवं नरयोनिचक्रं सम्पद्यते ।

इच्छा० ज्ञाना० क्रिया० कामिनी० कामदायिनी० रति० रतिप्रिया, नन्दा, मनोन्मन्यः पीठशक्तयः । प्रपञ्चसारे तु वामादिद्वादशशक्तय उक्ताः । ऐं परायै अपरायै परापरायै स्त्रौः सदाशिव महाप्रेत पद्मासनायनम इति पीठमन्त्रेण पीठं सम्पूज्य पूर्वमध्ययोन्योरन्तराले गुरुं परगुरुमपरगुरुञ्च वाग्भवेन सम्पूज्य ऐं ह्रीं श्रीं हूँ ह्रौंनम इति पञ्चप्रणवेण मध्यमयोनौ मूर्त्तिं परिकल्पयेत् । ध्यानन्तु—

उद्यद्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिकां
रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिम्बरम् ।
हस्ताब्जैर्दधतीन्त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं
देवीम्बद्धहिमांशुरत्नमुकुटां वन्दे समन्दस्मिताम् ॥

अत्र च जपादिकमूर्ध्वदक्षिणहस्तमारभ्य तदधोहस्तपर्यन्तं सदाशिवात्मक प्रेताधिरुढ़ा च देवी ।

अथावरणपूजा

मध्यमयोनौ देव्या वामकोणे रतिं, दक्षिणकोणे प्रीतिम्, अग्निकोणे मनोभवां समभ्यर्च्चर्य तद्बहिर्योन्यष्टकाभ्यन्तरे आग्नेयादिकोणेषु हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् । दिक्षवस्त्रम् । अङ्गपूजा च वाग्भवेन कर्त्तव्या तद्बहिरष्टयोन्यभ्यन्तर एव ।

पूर्वादिदिक्ष्वग्रे च दां दारिद्र्यै नमः ह्रीं क्षोभिन्यै नमः, क्लीं वशीकरण्यै नमः, सः सम्मोहिन्यै नमः इति सम्पूज्य प्रागाद्यष्टयोनिषु शुभगा, भगा, भगसर्पिणी, भगमालिनी, अनङ्गा, अनङ्गकुसुमा, अनङ्गमेखला, अनङ्गमदनाः ऐं क्लीं छूँ स्त्रीं सः इति मन्त्रेण सम्पूज्य तद्बहिष्पत्रेषु ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी चामुण्डा, महालक्ष्म्यः, तद्बहिर्लोकपालान्, तद्बहिस्तदस्त्राणि च पूजयेत् । महालक्ष्मीस्थाने चण्डिका पूजनीया । दलाग्रेऽष्टभैरवाश्च पूजनीया इति प्रपञ्चसारः । पूजा च देव्या लोहितगन्धपुष्पाभ्याम् । **अथावरणध्यानम्** -

वामकोणे यजेद्देव्या रतिमिन्दुसमप्रभाम् ।
नतिपाशधरां सौम्यां मदविह्वलविभ्रमाम् ॥
प्रीतिं दक्षिणकोणस्थान्तप्तकाञ्चनसन्निभाम् ।
अङ्कुशं प्रणतिं दोर्भ्यान्धारयन्तीं समर्च्चयेत् ॥
अग्रे मनोभवां रक्तां रक्तपुष्पाद्यलङ्कृताम् ।

इक्षुकार्मुकपुष्पेषु धारिणीं सस्मिताननाम् ॥
दिक्ष्वग्रे च निजैर्मन्त्रैः पूजयेद्वाणदेवताः ।
हस्ताब्जैर्धृतपुष्पेषु प्रणामाभूत सप्रभाः ।
अष्टयोनि षष्ठशक्तिः पूजयेच्छुभगादिकाः ।
मातरो भैरवाङ्कस्था मदविभ्रममण्डलाः ॥
अष्टपत्रेषु सम्पूज्या यथावत्कुसुमादिभिः ।
शुभगादिध्यानम्—

सर्वा मदविभ्रममण्डलाः, प्रधानदेवता • वर्णभूषणाद्यै रलङ्कृताः ।
अक्षं स्रक् पुस्तकाभीतिवरदाढ्यकराम्बुजाः ॥
लोकपालांस्ततो दिक्ष तेषामस्त्राणि तद्बहिः ।
अधरो बिन्दुमानाद्यं ब्रह्मेन्द्रस्थः शशीयुतः ॥
द्वितीयं भृगुसर्गाढ्यो मनुस्तार्तीयमीरितम् ।
सारसमुच्चये विन्दुरप्युक्तः । तदुक्तम्—
दन्तान्तेन सुतं सदण्डिसकलं सम्मोहनाभ्यां कुलम् ।
एषा बालेति विख्याता त्रैलोक्यवशकारिणी ॥

शशीयुत इति शशिना विन्दुना इकारेण युक्त इत्यर्थः । अस्य मन्त्रस्य सर्वं पूर्वभैरवीमन्त्रवत् । पुरश्चरणमपि तुल्यमेव । स्तुतिस्तु—
ब्रह्मादयः स्तुतिशतैरपि सूक्ष्मरूपामित्यादि शारदायाम् ।

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजाप्रदीपे त्रिपुरा-
पूजापरिच्छेदः ।

अथ गणपतिमन्त्राः

पञ्चान्तकं शशियुतं वीजं गणपतेर्विदुः ।
तुरीयो च विलोमेन तारादिर्विन्दुसंयुतः ॥
वेष्टनमन्त्रो हृदन्तोर्वा विधौ होमे द्विचान्तिकः ।

अनयोर्मन्त्रयोर्गणकऋषिर्निवृत्यच्छन्दो गणपतिर्देवताऽभीष्टसिद्धौ विनियोगः। गां हृदयाय नमः। गीं शिरसे स्वाहा। गूं शिखायै वषट्। गैं कवचाय हुँ। गौं नेत्रत्रयाय वौषट्। गः अस्त्राय फट्। इति षडङ्गमन्त्राः। तीव्रा, ज्वालिनी, नन्दा, भोगदा, कामरूपिणी, उग्रा, तेजोवती, सत्या, विघ्ननाशिन्यः पीठशक्तयः। सर्वशक्तिकमलासनाय नमः इत्यासनमन्त्रः। ध्यानम्—

सिन्दूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं
दण्डं पाशाङ्कुशम्भानूरुकरविलसद्बीजपूराभिरामम्।
बालेन्दुद्योतिमौलिं करिपतिवदनं नादपूरार्द्रगण्डं
भोगीन्द्राबद्धभूषं भजत गणपतिं रक्तवस्त्राङ्गरागम्॥

अत्र दण्डादीनि दक्षिणोर्ध्वहस्तमारभ्य तदधोहस्तपर्यन्तं ध्यातव्यानि। आवरणपूजायाङ्कर्णिकायाम्पूर्वादिदिक्षु गणाधिपगणेशान्, गणनायक गणक्रीडान्। केसरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि। अग्रे नेत्रम्। दिक्ष्वस्त्रम्। पूर्वादिपत्रमध्ये वक्रतुण्डैकरद, महोदर, गजानन, लम्बोदर, विकट, विघ्नराज, धूम्रवर्णान्, दलाग्रेषु - ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्म्यः, तद्बहिर्लोकपालान्, तद्बहिस्तदस्त्राणि च पूजयेत्। गणाधिपध्यानन्तु—

पूजयेदित्युपक्रम्य पीतरक्तरुचिः क्रमात्।
सर्वान्नागेन्द्रभूषाढ्यान् भक्ष्यलक्षितपुष्करान्॥

ब्राह्म्यादिध्यानं मातृकामन्त्रपद्धतौ द्रष्टव्यम्।

वेदलक्षं जपेन्मन्त्रं दशांशं जुहुयात्ततः।
मोदकैः पृथुकैर्लाजैः सक्तुभिः सेक्षुपर्वभिः॥

नारिकेलैस्तिलैश्शुद्धैः सुपक्वैः कदलीफलैः ।
श्रीशक्तिस्मरभूविघ्नबीजानि प्रथमं वदेत् ॥
ङेन्तङ्गणपतिम्पश्चाद्वरान्ते वरदं पदम् ।
उक्त्वा सर्वंजनं मेन्ते वशमालचयद्वयम् ॥
अष्टाविंशत्यक्षरोयं ताराद्यो मनुरीरितः ।
षड्वीजस्थस्वबीजेन दीर्घभाजा प्रकल्पयेत् ॥

षड़ङ्गानीत्यत्र षड्बीजस्थत्वं तदादिकत्वमेव हि विवक्षितम् ।

ताराधराबद्धा विद्धाः कृष्णाध्वनस्तथैते मनव, इत्यत्र ताराधारा इतिवत् । नतु सम्बन्धः । अङ्कारादि युक्तत्वे आकारादियोगविरोधात् । षड्वीजानि च यथाक्रमं षड़ङ्गेषु योजनीयानि । यथासंख्यमन्वयस्य त्यागे वीजाभावात् । प्रणवादिवीजपीठस्थितेन दीर्घान्वितेन सता अङ्गानि षडि्वदध्यान्मन्त्री विघ्नेश्वरस्य वीजेनेति प्रपञ्चसारस्याप्येतदर्थंकत्वात् ।

प्रपञ्चसारविवरणे तु उक्तपक्षं साम्प्रदायिकत्वेनाभिधाय वीजपञ्चकोत्तरषड्दीर्घयुक्तस्वबीजेनाङ्गकल्पेनति केचिदित्युक्तम् । स पक्षः शारदाविरुद्ध एव, षड्वीजस्थस्वबीजेनेति तद्वचनात् । आवरणपूजायाम्—

अग्रस्थबिल्ववृक्षाधः श्रियं श्रीपतिमर्चयेत् ।
दक्षिणे वटवृक्षाधो गौरीं गौरीपतिञ्यजेत् ॥
पश्चिमे पिप्पलस्याधो रतिं रतिपतिञ्यजेत् ।
सौम्ये प्रियङ्गुवृक्षाधो महीं पोत्रिणमर्च्चयेत् ॥

इति शारदावचनेषु देवतापेक्षाऽग्रत्वाद्यर्थेषु यजुः । पूर्वाभिमुखत्वेऽग्रे पश्चिमत इत्यनयोरर्थैक्यं पूर्वदिग्लाभश्च । उदङ्मुखत्वेऽग्रे दक्षिणत इत्यनयोरर्थैक्ये पूर्वदिग्लाभश्च । एवमामोदं सिद्धिसहितमग्रकोणे समर्चयेत् ।

समृद्ध्यायुतमभ्यर्चेत्प्रमोदं वह्निकोणतः ।
स्वमुखं कान्तिसंयुक्तमीशकोणे समर्चयेत् ॥
दुर्मुखं मदनारत्या यजेद्वरुणकोणके ।
विघ्नं मदद्रवायुक्तं कोणे नैशाचरेऽर्चयेत् ॥

वायव्ये विघ्नकर्त्तारं दरिद्र्या सह संयजेत् । इति वचनेऽप्यीदृशो दोषः । वह्निकोण इत्यादौ वक्ष्यमाणप्रपञ्चसारवचनविरोधश्च । नचाग्रत इत्यस्य पूर्वत इत्यर्थः । ध्यानम्—

अग्रस्थविल्वमभितश्च रमारमेशौ तद्दक्षिणे वटजुषौ गिरजावृषाङ्कौ ।
पृष्ठेच पिप्पलजुषौ रतिपुष्पबाणौ सव्ये प्रियङ्गुमभितश्च महीवराहौ ।
अग्राग्रावामोदः प्रमोदसुमुखौ च तमभितोश्रु श्रीयगे ।
पृष्ठे च दुर्मुखाख्यस्तमभितो विघ्नविघ्नकर्त्तारौ ॥

इति ध्यानप्रकरणस्थप्रपञ्चसारवचनाभ्यामुभयथाऽपि विरोधात् । नच पश्चिमसौम्यादिशब्दानां पृष्ठोत्तरादिषु लक्षितरिति ।

अत्रोच्यते—यस्सुरभिमुखा देवा देवाऽभिमुखतो दश ।
प्राच्यादिदिहरितो ज्ञेयाः पूजाहोमादिकर्मसु ॥

इति वचनानुरोधेन प्रवृत्तत्वान्नोक्तदोषावकाशः । नचैतद्वाक्यप्रामाण्ये सर्वत्रावरणपूजायामेवं दिग्व्यवहारप्रसङ्ग । पर्वादिपदानां मुख्यार्थपरत्वेबाधकसत्तायामेतद्वचनानुरोधादित्येके । अपरे तु तत्रेष्टापत्तिरित्याहुः । युक्तञ्चैतत् । यतो नारायणाष्टाक्षरमन्त्रपूजायाम्-"ध्वजं वरुणदिग्भागे श्यामलं पूजयेत्ततः" इत्यत्र परमेश्वरस्य पृष्ठभाग एव वरुणदिक्त्वेनोक्तः । अत्रापि च दक्षिणवायव्यनैर्ऋतादयः सोम्याग्नेयैशानादित्येनोक्ताः । किञ्चैवं सति गोपालादिपूजायां रुक्मिणीवसुदेवादीनां मुख्यानां देवाग्रे पूजा सम्पद्यते ।

देवतानां पश्चिमाभिमुखत्वे दक्षिणाभिमुखत्वे वा प्रधानानामप्रधानानाञ्च परिवाराणामुचितं स्थानञ्च सम्पद्यत इत्यादिकमालोचनीयम् ।

ध्याने च—पीठं सिंहमुखं पादम् । सिंहमुखपादपीठगलिपि यपद्मे षट्कोणोल्लसिते, इति प्रपञ्चसारवचनात् कराग्रधृतमाणिक्यकुम्भवक्त्रविनिःसृतैरित्यत्र कराग्रं करपुष्करम् । करपुष्करधृतकलशेत्यादिवचनात् ।

वीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पलम् ।
व्रीह्यग्रसुविषाणरत्नकलशान् हस्तैर्वहन्तं भजे ॥

इत्यत्र बीजापूरादीन्यधो दक्षिणहस्तमारभ्य वामाधो हस्तपर्यन्तन्ध्येयानीति प्रपञ्चसारविवरणम् । तन्न युक्तम्, धनुष उभयहस्तधार्यत्वेऽपि पाशस्य दक्षिणहस्तमात्रधार्यत्वात् । तस्माद्वामन्तुरीयहस्तमारभ्य तत्तृतीयहस्तपर्यन्तन्तानि चिन्तनीयानि । तेन शूलपाशयोर्द्दक्षिणहस्ते, धनुषश्च वामहस्ते स्थितिर्भवतीति ।

अस्य मन्त्रस्य गणकऋषिर्गायत्रीछन्दो महागणपतिर्द्देवता धनाद्यभीष्टसिद्धौ विनियोगः । ब्रतंगां हृदयाय नमः । श्रीं गीं शिरसे स्वाहा । श्रीं गुं शिखायैवषट् । क्लीं ङ्गैं कवचाय हुँ । ग्लौं नेत्रत्रयायवौषट् । गंगः अस्त्रायफट् । इत्यङ्गमन्त्राः ।

आवाहनप्रकरणोक्तस्वरुपं मातृकाम्भोजं त्रिकोणगर्भषट्कोणगर्भं पूजायन्त्रम् । तीव्रा, ज्वालिनी, नन्दा, भोगदा, कामरूपिणी, शुभ्रा, तेजोवती, सत्या, विघ्ननाशिन्यः पीठशक्तयः । सर्वशक्तिकमलासनाय नम इति पीठमन्त्रः ।

ध्यानम्— नवरत्नमयन्द्वीपं स्मरेदिक्षुरसाम्बुधौ ।
तद्वीचिधौतपर्यन्तं मन्दमारुतसेवितम् ॥
मन्दारपारिजातादि-कल्पवृक्षलतान्वितम् ।
उदग्रं रत्नछायाभिर्वरुणीकृत-भूतलम् ॥
उद्यद्दिनकरेन्दुभ्यामुद्दीपित-दिगन्तरम् ।
तस्य मध्ये पारिजातं नवरत्नमयं स्मरेत् ॥
ऋतुभिः सेवितं षड्भिरनिशं प्रीतिबद्धनैः ।
तस्याधस्तान्महापीठे रचिते मातृकाम्बुजे ॥
षट्कोणान्तत्रिकोणस्थं महागणपतिं स्मरेत् ।
हस्तीन्द्राननमिन्दुचूडमरुणछायं त्रिनेत्रं रसा-
दाश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया सन्ततम् ।
बीजापूरगदाधनुस्त्रिशिखयुक् चक्राब्जपाशोत्पलं
व्रीह्यग्रं स्वविषणरत्नकलशान् हस्तैर्वहन्तम्भजे ॥
गण्डपाली गलद्दानपूरनाल - समाननान् ।
द्विरेफान् कर्णतालाभ्यां धारयन्तं मुहुर्मुहुः ॥

करा‍ग्र धृतमाणिक्यकुम्भवक्त्रविनिःसृतैः ॥
रत्नवर्षैः प्रीणयन्तं साधकं मदविह्वलम् ॥
माणिक्यमुकुटोपेतं रत्नाभरणभूषितम् ॥

पीठं सिंहमुखपादम् । देवस्य वामोरुस्था वामकरेण पद्मधारिणी दक्षिणेन देवमालिङ्गन्तीन्देवीं, वीजापूरादीनि चतुर्थं वामहस्तमारभ्य तत्तृतीयं यावत् । धनुः इक्षुनिर्मितम् । श्री श्रीपत्यादयः पद्मनिधिपर्यन्ता आवरणोक्तस्थानेषु ध्यातव्याः ।

आवरणपूजायां त्रिकोणाद्बहिः देवस्याग्रे बिल्ववृक्षाधस्तत्पार्श्वयोः श्री-श्रीपती । दक्षिणे-वटवृक्षाधस्तत्पार्श्वयोः-गौरीगौरीपती । पृष्ठदेशे पिप्पल-स्याधस्तदुभयतः रतिरतिपती । वामे प्रियङ्गुवृक्षाधस्तदुभयतः महीवराहौ । अग्रे-लक्ष्मीगणनायकौ च पूजनीयौ ।

ततः कर्णिकास्थषट्कोणस्य देवाग्रकोणे सिद्धिसहितमामोदम् , एवं परि-भाषिते ईशानकोणे कान्तियुतं सुमुखम् , पृष्ठस्थकोणे-मदनावतीयुक्तं दुर्मुखम्, परिभाषिते निर्ऋतिकोणे मदद्रवायुक्तं विघ्नम् , परिभाषिकवायुकोणे द्रावि-णीयुतं विघ्नकर्त्तारम् , षट्कोणस्य देवदक्षिणपार्श्वे वसुधारासहितं शङ्ख-निधिम् । वामपार्श्वे वसुमतीसहितं पद्मनिधिम् ।

केसरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् । दिक्ष्व-स्त्रम् । पूर्वादिपत्रमध्येषु-ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्मीः, तद्बहिर्लोकपालान्, तद्बहिस्तदस्त्राणि च पूजयेत् ।

अथ श्रीप्रभृतिध्यानम्

पद्मयुग्मधरा पद्मा शङ्खचक्रधरो हरिः ।
पाशाङ्कुशधरा गौरी टङ्कशूलधरो हरः ॥
रतिरुत्पलहस्ताढ्या कोदण्डास्त्रधरः स्मरः ।
शुकव्रीह्यग्रहस्ताभूर्गदा-चक्रधरः पतिः ॥

अथामोदादीनां यन्त्रसिद्धादीनाञ्च ध्यानम् –

पाशाङ्कुशाभयाभीष्टधारिणोऽरुण-विग्रहाः ।
गण्डभित्तिगलद्दानपूरधौत-मुखाम्बुजाः ॥
विघ्नास्तत्प्रमदास्सर्वा मदघूर्णितलोचनाः ।
एकहस्तधृताम्भोजा इतरालिङ्गितप्रियाः ॥

शङ्खपद्मयोर्ध्यानं श्रीबीजपूजायां लिखितम् ।

ध्यायेन्मन्त्री जपेन्मन्त्रं चतुर्लक्षं समाहितः ।
चतुस्सहस्रसंयुक्तञ्चत्वारिंशत्-सहस्रकम् ॥
दशांशं जुहुयाद्द्रव्यैरष्टकै - र्मोदिकादिभिः ।
तर्पयेदनिशो विघ्नं प्रागुक्तेनैव वर्त्मना ॥

मोदकपृथुकलाजसक्तिवक्षुपर्वनारिकेलतिलपक्वकदलीफलानि मोदकादीन्यष्टद्रव्याणि ।

तर्पयेत्सलिलैश्शुद्धैरनिशो गणनायकम् ।
चतुश्चत्वारिंशदाढ्यं चतुश्शतमतन्द्रितः ॥

इति प्रागुक्तवर्त्म ।

मायावी विपदद्वन्द्वन्ततो गणपतिम्वदेत् ।
षडङ्गीशः पावको पश्चाद्वरदान्ते वदेत्पुनः ॥
सर्वलोकं मे पदान्तं वशमानय च द्वयम् ।
षड्विंशत्यक्षरो मन्त्रो भजतां सुरपादपः ॥

अस्य मन्त्रस्य गणकऋषिर्गायत्रीछन्दो विघ्नेश्वरो देवता सर्वाभीष्टसिद्धौ विनियोगः। ह्रीं गणपति हृदयायनमः । ह्रीं गणपति शिरसे स्वाहा । ह्रीं वरवरद शिखायै वषट् । ह्रीं सर्वजनस्मै कवचाय हुँ । ह्रीं वशमानय नेत्रत्रयाय वौषट् । ह्रीं स्वाहा अस्त्राय फट् । इत्यङ्गमन्त्राः ।

आवाहनप्रकरणोक्त स्वरूपमातृकाम्भोजं त्रिकोणगर्भषट्कोणगर्भं पूजा-

यन्त्रम् ।. तीव्रा ज्वालिनी नन्दा भोगदा कामरूपिणी उग्रा तेजोवती, सत्या, विघ्ननाशिन्यः पीठशक्तयः। सर्वशक्तिकमलासनाय नम इत्यासनमन्त्रः। ध्यानम्

नवरत्नमयं द्वीपं स्मरेदिक्षुरसाम्बुधौ ।
तद्वीतिधौतपर्यन्तं मन्दमारुतसेवितम् ॥
मन्दारपारिजातादि - कल्पवृक्षलतान्वितम् ।
तद्भूतरत्नछायाभि - ररुणीकृत - भूतलम् ॥
उद्यद्दिनकरेन्दुभ्याम् द्दीपित - दिगन्तरम् ।
तस्य मध्ये पारिजातं नवरत्नमयं स्मरेत् ॥
ऋतुभिस्सेवितं षड्भिरनिशं प्रीतिबद्धनैः ।
तस्याधस्तान्महापीठे रचिते मातृकाम्बुजे ॥

षट्कोणस्थं देवं गणपतिं स्मरेत् ।

सिन्दूरातनिभाननं त्रिनयनं हस्तेषु पाशाङ्कुशौ
बिभ्राणं मधुमत्कपालमनिशं सार्द्धेन्दुमौलिम्भजे।
पुष्ट्याश्लिष्टतनुं ध्वजाग्रकरया पद्मोल्लसद्धस्तया
तद्योन्याहितपाणिपातु वसुमत् पात्रोल्लसत्पुष्करम् ॥

आवरणपूजायान्त्रिकोणवाह्ये देवाग्रे विल्ववृक्षाधस्ताद्वृक्षमभितः श्रीश्रीपती। दक्षिणे वटवृक्षाधस्तदुभयत। गौरीगौरीपती । देवपृष्ठतः पिप्पलवृक्षाधस्तदुभयतः रतिरतिपती । देववामे प्रियङ्कुवृक्षाधस्तदुभयतः महीवराही। देवाग्रे लक्ष्मीगणनायकौ। षट्कोणस्य देवाग्रकोणे सिद्धिसहितमामोदम्। एवं पारिभाषित-ईशकोणे कान्तिसहितसुमुखम् । पृष्ठकोणे मदनावतीसहितदुर्मुखम्। पारिभाषिकनिर्ऋतिकोणे मदद्रवासहितविघ्नम्। पारभाषिकवायुकोणे द्राविणीयुक्तं विघ्नकर्त्तारं पूजयेत् । एते चामोदादयो दिगम्बराः महागणपतिमन्त्रोक्तध्यानाः ।

केसरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि। अग्रे नेत्रम् । दिक्ष्वस्त्रम्, पात्रेषु-ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्म्यः, तद्बहिर्लोकपालान्, तद्बहिस्तदस्त्राणि च पूजयेत।

श्रीश्रीपत्यादिध्यानं मातृकामन्त्रे द्रष्टव्यम् ।

चतुर्ल्लक्षं जपेन्मन्त्रं तद्दशांशं हुतक्रिया ।
प्राक् प्रोक्तैरष्टभिर्द्रव्यैस्त्रिमध्वक्तैः समीरिता ॥

मोदकपृथुकलाजसक्तु - इक्षुपवनारिकेलतिलक्वकदलीफलान्यष्टद्रव्याणि ।

शक्तिरुद्धं निजं वीजं महागणपतिं वदेत् ।
ङेन्तमग्निबधूः प्रोक्तो मन्त्रोयं द्वादशाक्षरः ॥

अस्य मन्त्रस्य गणकऋषिर्निवृगायत्रीछन्दः शक्तिगणेश्वरो देवताऽभीष्टसिद्ध्यर्थे विनियोगः । शेषमङ्गमन्त्रध्यानवर्ज्जं सर्वं पूर्वकथितमायाविविपदमित्यादि षड्विंशत्यक्षरमन्त्रवत् ।

अङ्गमन्त्रास्तु - ह्रीं हृदयाय नमः । गं शिरसे स्वाहा । ह्रीं शिखायै वषट् । महागणपतये कवचाय हुम् ङ्ग । स्वाहा नेत्रत्रयाय वौषट् । ह्रीं गं ह्रीं महागणपतये स्वाहा अस्त्राय फट् इति । ध्यानन्तु—

मुक्तागौरं मदगजमुखं चन्द्रचूडन्त्रिनेत्रम्
हस्तैः स्वीयैर्द्धतमरविन्दाङ्कुशौ रत्नकुम्भम् ।
अङ्कस्थायाः सरसिजरुचेः सध्वजालम्बिपाणे-
र्द्देव्या योनौ विनिहितकरं रत्नमौलिं भजामः ॥

इति अधस्तनोर्द्ध्वयोर्द्दक्षिणहस्तयोः । ऊर्ध्ववामहस्ते चारविन्दादीनि ध्येयानि ।

लक्षमेनं जपेन्मन्त्र - मपूपै - स्तद्दशांशतः ।
जुहुयादर्च्चिते वह्नौ दिनेशो देवमर्च्चयेत् ॥

शक्त्यारुद्धं निजं वीजं वाणमानय च द्वयम् ।
तावद्यो मनुराख्यातो रुद्रसंख्याक्षरान्वितः ।

अत्र अङ्गमन्त्रपदैर्भवेत् ।

एकेनादौ त्रिभिर्द्वाभ्यान्त्रिभिर्द्वाभ्यामनन्तरम् ।
समस्तेनाऽस्त्रमाख्यात-मङ्गक्लृप्तिरियं मता ॥

इत्यत्र एकेन वर्णेन। एवम् त्रिभिर्द्वाभ्यामित्यादीन्यपि वर्णविशेषणान्येव ।

नचाङ्गमन्त्रपदैर्भवेदित्युपक्रमादेकेनेत्यादीनिपदविशेषणान्येवेति वाच्यम् । तथा सति समुचितव्यवस्थायाऽसम्भवात् ।

नन्वेवं पदैर्भवेदिति वचनं निबन्धकमिति चेन्न शिखामन्त्रे वशमित्यस्य द्वितीयान्तस्य प्राप्त्यर्थन्तद्वचनात् । अन्यथा वर्णद्वयप्राप्तौ श्रीशेति निर्विभक्तिकवर्णद्वयप्राप्तिप्रसङ्गात् ।

अस्य मन्त्रस्य गणकऋषिर्निचृ गायत्रीछन्दः शक्तिगणेश्वरोदेवताऽभीष्टार्थसिद्धौ विनियोगः । शेषमङ्गमन्त्रध्यानवर्ज्ज मायाविबिपदद्वन्द्वमित्यादिरिति गणपतिमन्त्रवत् । अङ्गमन्त्रास्तु—

अं हृदयाय नमः। ह्रीं गं ह्रीं शिरसे स्वाहा। शं शिखायै वषट् । आनय कवचाय हुँ । स्वाहानेत्रत्रयाय वौषट् । ओं ह्रीं शं ह्रीं वशमानय स्वाहा अस्त्रायफट् । इति षड्ङ्गमन्त्राः । ध्यानम्—

हस्तैर्विभ्रतमिक्षुदण्डवरदौ पाशाङ्कुशौ पुष्करः
स्पृष्टस्वप्रमदावराङ्गमनयाश्लिष्टव्ध्वजाग्रस्पृशा ।
श्यामाङ्ग्या विधृताब्जया त्रिनयनं चन्द्रार्द्धचूड़ंजवा-
रक्तं हस्तिमुखं स्मरामि सततं भोगातिलोलं विभुम् ॥

अत्र वामहस्तमारभ्य इक्षुदण्डादिकं प्रदक्षिणक्रमेण ध्येयम् ।

लक्षत्रयं जपेन्मन्त्र - मिक्षुखण्डैर्द्दशांशतः ।
अपूपैराज्ययुक्तैर्वा जुहुयान्मन्त्रसिद्धये ॥
स्वगुरुं धनधान्याद्यैः प्रीणयेत्प्रीतमानसः ।

सम्वर्त्तको नेत्रयुतः पार्श्वो वह्न्यासने स्थितः ॥
प्रसादनाय ह्रीन्मन्त्रः स्वबीजाद्यो दशाक्षरः।

अस्य मन्त्रस्य गणकऋषिर्विराट्छन्दः क्षिप्रप्रसादनोगणेशो देवताऽभीष्टार्थसिद्धौ विनियोगः। गां हृदयाय नमः। गीं शिरसे स्वाहा। गुं शिखायै वषट्। गैं कवचाय हुँ। गौं नेत्रत्रयाय वौषट्। गः अस्त्राय फट्। इत्यङ्गमन्त्राः। तीव्रा, ज्वालिनी, नन्दा, भोगदा, कामरूपिणी, उग्रा, तेजोवती, सत्या, विघ्ननाशिन्यः पीठशक्तयः। सर्वशक्तिकमलासनाय नम इति पीठमन्त्रः।

ध्यानन्तु—

पाशाङ्कुशौ कल्पलतां विषाणं दधत्सु तुण्डाहितबीजपूरः
रक्तास्त्रिनेत्रस्तरुणेन्दुमौलिर्हारज्वलो हस्तिमुखोवताद्वः ।
भास्वरभूषणदीप्तो बृहद्दरः पद्मविष्टरोल्लसितः
ध्येयोऽनायतदोःपत्सरसीरुहसम्पद सदा मनुजैः ॥

अत्र उपरि हस्तयोः पाशाङ्कुशौ, अधोहस्तयोर्दण्डकल्पलते, इति प्रपञ्चसारविवरणम्।

वस्तुतस्तु—अधोदक्षिणहस्तमारभ्य वामाधो हस्तपर्यन्तञ्चत्वारि ध्येयानि। पाशाङ्कुशयोर्दक्षिणहस्तधेयत्वस्य शैवागमे प्रतिपादनात्।

आवरणपूजायां केसरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि। अग्रे नेत्रम्। दिक्ष्वस्त्रम्। पत्रेषु-विघ्नविनायकवीरशूरवरद, इभवक्त्र, एकरद, लम्बोदरान्, पत्राग्रेषु ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्म्यः, तद्बहिर्लोकपालान्, तद्बहितदस्त्राणि च पूजयेदिति। ब्राह्म्यादिध्यानं मातृकामन्त्रे द्रष्टव्यम्।

लक्षं जपेज्जपस्यान्ते जुहुयादयुतन्तिलैः ।
समधुत्रितयैर्द्रव्यै-रथवाष्टभिरीरितैः ॥

मोदकपृथुकलाजसक्तिवक्षपर्णनारिकेलतिलपक्वकदलीफलान्यष्टद्रव्याणि।

पञ्चान्तको विन्दुयुतो वामकर्णविभूषितः ।
तारादिहृदयान्तोयं हेरम्बं मनुरब्रवीत् ॥
चतुर्वर्णात्मको नृणां चतुर्वर्गप्रदायकः ॥

अस्य मन्त्रस्य गणकऋषिर्विराट्छन्दो हेरम्बो देवताऽभीष्टार्थसिद्धौ विनियोगः । गां हृदयाय नमः । गीं शिरसे स्वाहा । गूं शिखायै वषट् । गैं कवचाय हुम् । गौं नेत्रत्रयाय वौषट् । गः अस्त्राय फट् । इत्यङ्गमन्त्राः । ओं गं इति मूर्त्तिकल्पनमन्त्रः । तीव्रा, ज्वालिनी, मन्दा, भोगदा, कामरूपिणी, उग्रा;, तेजोवती, सत्या, विघ्ननाशिन्यः पीठशक्तयः । ओं हुं हुं महासिंहाय गां हेरम्बासनाय नमः, इत्यासनमन्त्राः । ध्यानम् —

मुक्ताकाञ्चननीलकुन्दनमृणत्तापैस्त्रिनेत्रान्वितै-
र्नागास्यैर्हरिवाहनं शशिधरं हेरम्बमर्कप्रभम् ।
दृप्तं दानमभीतिमोदकरदान् टङ्कं शिरोक्षात्मिकां
मालां मुद्गरमङ्कुशं त्रिशिखिकं दोर्भिर्दधानं भजे ॥

अत्र नागास्यैरिति हस्तितुल्यमुखैर्लक्षितमित्यर्थः । ऊर्ध्वयोर्दक्षिणवामहस्तयोर्दानाभये तयोरधस्तनयोर्मोदकरदौ । एवमग्रेऽपि मुक्ताकाञ्चनेत्यादि- ऊर्ध्वं पूर्वादिक्रमेण । आवरणपूजायां केशरेष्वाग्नेयादिकोणेषु हृदयशिरःशिखाकवचानि , अग्रे नेत्रम् , दिक्ष्वस्त्रम् , तद्बाह्ये लोकेशान् , तद्बहिस्तदस्त्राणि च पूजनीयानि ।

लक्षत्रयं जपेन्मन्त्रं दशांशं जुहुयात्तिलैः ।
तारं खड्गीश्वरः कूर्मो निश्वरोणान्त ईरितः ॥
भुवे नतिस्सप्तवर्णः सुब्रह्मण्यात्मको मनुः ॥

अस्य मन्त्रस्य-गणकऋर्षिर्विराट्छन्दः सुब्रह्मण्यो देवताऽभीष्टसिद्धौ विनियोगः । रां हृदयाय नमः । रीं शिरसे स्वाहा । रीं शिखायै वषट् । रैं कवचाय हुँ । रौं नेत्रत्रायाय वौषट् । रः अस्त्राय फट् । इत्यङ्गमन्त्राः । धर्मज्ञानादारभ्य वह्निमण्डलान्तैः पीठम् । अत्र पीठे सत्वादयो न पूज्याः । सर्वशक्तिकमलासनाय नम इति आसनमन्त्रः । ध्यानम् —

सिन्दूरारुणकान्तिमिन्दुवदनं केयूरहारादिभि-
र्दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागांशुकं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यतम् ॥

आवरणपूजायां केशरेष्वाग्नेयादिकोणेषु हृदयशिरःशिखाकवचानि, अग्रे नेत्रम्, दिक्ष्वस्त्रम्, पत्रमध्येषु शक्तिवज्रधरान् जयन्ताग्निवैश्वकृत्तिकापुत्रभूतपतिसेनानीगुहहेमशूलविशालान्, दिग्दलाग्रेषु देवसेनापतिविद्यामेधावज्रान्, कोणदलाग्रेषु शक्तिकुक्कुटमयूरद्वारपालान् , तद्बहिर्लोकपालान् , तद्बहिस्तदस्त्राणि च पूजयेदिति ।

लक्षमेकं जपेन्मन्त्रं साज्येन हविषा ततः ।
दशांशं जुहुयादन्ते ब्राह्मणानपि भोजयेत् ॥
जपतर्पणपूजादौ विघ्नेशं सर्वसिद्धिदम् ।
प्रीणयेदनया स्तुत्या प्राप्तये सर्वसम्पदाम् ॥

ओङ्कारमाद्यं प्रवदन्ति सन्तो वाचः श्रुतीनामपि सङ्गृणन्ति ।
गजाननं देवगणैर्नताङ्घ्रिं भजेहमर्द्धेन्दुकृतावतंसम् ॥
इत्यादि शारदायाम् ।

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजाप्रदीपे
गणेशपूजापरिच्छेदः ।

अथ सोममन्त्रः

खड्गी शस्त्रो भृगुर्विन्दुमन्त्र स्वरसमन्वितः ।
सोमाय हृदयान्तोयं मन्त्रः प्रोक्तः षडक्षरः ॥

अस्य मन्त्रस्य भृगुऋर्षिः पङ्क्तिश्छन्दस्सोमो देवता धनाद्यभीष्टसिद्धौ विनियोगः । स्वां हृदयाय नमः । स्वीं शिरसे स्वाहा । स्वूं शिखायै वषट् । स्वैं कवचाय हुम । स्वौं नेत्राभ्यां वौषट् । स्वः अस्त्राय फट् । इति

षडङ्गमन्त्राः।

आधारशक्त्यादिसोममण्डलान्तं पीठे सम्पूज्य रागादिनवशक्तीर्यजेत्। ताश्च रागा, कुमुद्वती, नन्दा, स्वधा, सञ्जीवनी, क्षमा, आप्यायनी, चन्द्रिकाऽऽह्लादिन्यः। सोमासनाय नम इत्यासनमन्त्रः। ध्यानम्—

कर्पूरस्फटिकावदातमनिशं पूर्णेन्दुविम्बाननं
मुक्तादामविभूषितेन वपुषा निर्मूलयन्तन्तमः।
हस्ताभ्यां कुमुदं वरञ्च दधतं नीलारकोद्भासितं
आस्याङ्कस्थ मृगोदिताश्रयगुणं सोमं सुधाब्धिम्भजे॥

आवरणपूजायां केशरेष्वग्न्यादिकोणेषु-हृदयशिरःशिखाकवचानि। अग्रे नेत्रम्। दिक्ष्वस्त्रम्। पत्रमध्येषु रोहिणी, कृत्तिका, रेवती, भरणी, रात्रि, आर्द्रा, ज्योत्स्ना, कला। दलाग्रेषु—आं आदित्यम्, मं मङ्गलम्, बुं बुधम्, गुं गुरुम्, शुं शुक्रम्, शं शनिम्, रां राहुम्, कें केतूम्। तद्बहिरिन्द्रादीन्, तद्बहिर्वज्रादींश्च पूजयेदिति। आवरणध्यानम्—

सितमाल्याम्बरधरा मुक्ताहारविभूषणाः।
पयोधरभराक्रान्ता रचिताञ्जलयश्शुभाः॥
बल्लभासक्तमनसो मदविभ्रममण्डलाः।
समभ्यर्च्यास्सरोजाक्ष्यश्चन्द्रविश्वनिभाननाः॥
सुवर्णासुरोपेतास्तु नामाद्यवर्णवीजकाः।
रक्तारुणश्वेतनीलपीतधूम्रसितासिताः॥
वामोरुन्यस्ततद्धस्ता दक्षिणेन धृताभयाः।
अम्बुजाच्यकरोभानुर्द्दंष्ट्राभिः समुखः शनिः॥
बाहुर्विकृतवक्त्रः स्यात् केतुः स्याद्विधृताञ्जलिः॥

तद्धस्तो-वामहस्तः।

रसलक्षं जपेन्मन्त्रं साधको विजितेन्द्रियः।
षट्सहस्रं प्रजुहुयात्पायसेन ससर्पिषा॥

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजाप्रदीपे सोमपूजापरिच्छेदः ।

अथ सूर्यमन्त्राः

तारो घृणिः भृगुः पश्चाद्वामकर्णविभूषितः ।
वह्न्यासनो मरुच्छेषः सनेत्रो त्रिन्त्यपश्चिमः ॥
अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतप्रदः ॥

शेषोऽनन्त आकारः । त्य-पश्चिमः त्यस्य पश्चिमः पूर्व इत्यर्थः । अत्र मूर्त्तिन्यासे पञ्चह्रस्वैरिति प्रपञ्चसारस्य ह्रस्वसद्यादि पञ्चभिरिति शारदावचनेनैकवाक्यतया ओङ्कारादिपञ्चह्रस्वैरेव मूर्तिन्यासो, नत्वकारादिभिरिति ।

वर्णन्यासे मूर्द्धासकण्ठहृदयेति न युक्तः पाठः । मूर्द्धास्येत्येव युक्तः । सशिरो मुख गलहृदयेति प्रपञ्चसारवचनान्मन्त्रवर्णान्न्यसेदष्टौ प्रत्येकं प्रणवादिकानिति वचनस्य सर्वे वर्णा ओङ्कारादिकृत्यस्य स्तव्या इत्यर्थः । प्रत्येकमिति स्वरसात्प्रणवादिका नित्यस्यान्यथा व्यर्थत्वापाताच्च । नच छन्द पूरणानुरोधेनैव तदुपादानमिति युक्तं सार्थकत्वस्य सम्भवात् । प्रणवाद्यैरष्टवर्णैः क्रमेण सोऽयं तदक्षरन्यास इति प्रपञ्चसारेऽपि प्रणवाद्यैरिति विशेषणोपादानाच्च । नहि एकत्र छन्दःपूरकमपरत्रापि तथैवोपदीयत इति ।

पीठपूजादौ प्रभूतविमलापूजास्थाने प्रयजेदथ प्रभूतां विमलामावाह्यां-समाराध्याम्, परमसुखाय वौषट् । शर्वाय तेजोज्वालामलिङ्ग फट् स्वाहा । अस्त्राय फट् । इत्यङ्गमन्त्राः ।

अथ मन्त्रादिन्यासः तत्र प्रथमं मूर्तिन्यासो यथा-शिरसि ओमादित्याय नमः। मुखे-एं रवये नमः । हृदि-ङं भानवे नमः । गुह्ये लं भास्कराय नमः । पादयोः अं सूर्याय नमः । ततो मन्त्रवर्णन्यासः, शिरसि- ओं ओं । मुखे-ओं घृणि । कण्ठे-ओं णि । हृदि-ओं सू । उदरे-ओं र्यः । नाभौ-ओम् आ । । लिङ्गे-ओं दि । चरणयोः-ओं त्य । इति न्यसेत् ।

पीठपूजायां प्रथमं दिक्षु मध्ये च प्रभूतविमलसारं समाराध्य परमसुखान् सम्पूज्याधारशक्त्यादिकम्पूजयित्वा रां दीप्तायै नमः, रीं सूक्ष्मायै, रीं जयायै, रें भद्रायै, रैं विभूत्यै, रों विमलायै। रौं अयुग्मायै। अभयदानहस्तम्—

केयूरहाराङ्गदकुण्डलाढ्यं माणिक्यमौलिं दिननाथमीडे।
बन्धककान्तिं विलसत्त्रिनेत्रं रक्तारविन्दस्थितदेवदेवम्॥

इति ध्यानम्। आवरणपूजायां केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखा कवचानि। अग्रे नेत्रम्। दिक्ष्वस्त्रम्। पूर्वादिदिग्दलेषु आं आदित्याय नमः, रं रवये नमः। भां भानवे नमः। भां भास्कराय नमः। अग्न्यादिकोणपत्रेषु उं उषायै नमः। मं प्रज्ञायै नमः। सं सन्ध्यायै नमः। पत्राग्रेषु ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्म्यः। अग्रे तद्बहिः रुणम्। तद्बहिश्चन्द्र, मङ्गल, बुध, बृहस्पति, शुक्र, शनैश्चर, राहु, केतून्, तद्बहिर्लोकपालान्, तद्बहिस्तदस्त्राणि, तद्बहिः सूर्यपार्षदेभ्यो नम इति सूर्यपार्षदांश्च पूजयेत्। अर्घदानविधिः मार्त्तण्डभैरवीयमन्त्रे द्रष्टव्यः।

वसुलक्षं जपेन्मन्त्रं समिद्भिः क्षीरभूरुहाम्।
तत्सहस्रं प्रजुहुयात्क्षीराक्ताभिर्जितेन्द्रियः॥
आकाशमग्निदीर्घेन्दुसंयुतं भुवनेश्वरी।
सर्गान्वितो भृगुर्भानोस्त्र्यक्षरो मनुरीरितः॥

अस्य मन्त्रस्य देवभागृषिर्गायत्रीछन्दः सूर्यो देवता नैरुज्याद्यभीष्टसिद्धौ विनियोगः। आधारादिपादाग्रान्तम्-ह्रां। कण्ठादिमूलान्तम्-ह्रीं। मूर्धादिकण्ठपर्यन्तम्-स, विन्यस्य कराङ्गन्यासङ्कुर्यात्। ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रुं-शिखायै वषट्। ह्रैं कवचाय हुं। ह्रौं नेत्रत्रयाय स्वाहा। ह्रः अस्त्राय फट्। इत्यङ्गमन्त्राः।

पीठे-प्रथमचतुर्दिक्षु मध्ये च प्रभूतविमलसारं समाराध्य परमसुखान् सम्पूज्याधारशक्त्यादीन् पूजयित्वा-रां दीप्तायै नमः। रीं सूक्ष्मायै, रूं जयायै रें भद्रायै, रैं विभूत्यै, रों विमलायै, रौं अमोघायै। रं विद्युतायै, रं सर्वतोमुख्यै। एताः सबीजपीठशक्तयः पूज्याः। ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठात्मने नम इति पीठमन्त्रः।

ओं खं खखोल्काय, इति मूर्त्तिकल्पनमन्त्रः । ध्यानम्—

रक्ताम्बुजासनविशेषगुणैकसिन्धुं भानुं समस्तजगतामधिपं भजामि ।
पद्मद्वयाभयवरान्दधतं कराब्जैर्माणिक्यमौलिमरुणाङ्गरुचिन्त्रिनेत्रम् ॥

आवरणपूजायां केशरेष्वग्न्यादिकोणेषु - हृदयशिरःशिखाकवचानि । अग्रे-नेत्रम् । दिक्ष्वस्त्रम् । पूर्वादिदलेषु-चन्द्र, कुज, बुध, गुरु, शुक्र, शनैश्चर, राहु, केतून्, तद्बहिर्लोकपालान्, तद्बहिस्तदस्त्राणि च पूजयेत् ।

भानुलक्षं जपेन्मन्त्रं साम्राज्येन दशांशतः ।
तिलैर्वा मधुराभ्यक्तैर्जुहुया - द्विजितेन्द्रियः ॥

अर्घदानविधिङ्कान्यो मार्त्तण्डीयभैरवीयो द्रष्टव्यः ।

आकाशमग्निपवनसद्यान्तर्धीशबिन्दुमत् ॥
मार्त्तण्डभैरवं नाम बीजमेतदुदाहृतम् ।
पुटितं विन्दुबीजेन सर्वकामफलप्रदम् ॥
दान्तन्दहननेत्रेन्दु - सहितन्तदुदाहृतम् ॥

सद्यान्त ओङ्कार अङ्गन्यासे । "दीर्घयुक्तेन नेत्राङ्गानि विन्यसे" दिति-वचनान्नेत्रान्तानि पञ्चैवाङ्गानीत्येके । अङ्गानन्तरं नेत्राङ्गमित्यपरे, तत्रोत्त-रन्तत्वपुरुषोत्तममन्त्रे तथा दर्शनात् ।

अस्य मन्त्रस्य देवभागृषिर्गायत्री - छन्दो मार्त्तण्डभैरवो देवता धनाद्यभीष्टसिद्धौ विनियोगः । मध्यमायां ह्स्रां सूर्याय नमः । तर्जन्याङ्ग्रि ह्स्रीं भास्कराय नमः । अङ्गुष्ठे ह्स्रुं भानवे नमः । अनामिकायां ह्स्रें रवये नमः । कनिष्ठायां ह्स्रौं दिवाकराय नम इति, विन्यस्य शिरो, मुख, हृदय, लिङ्ग, चरणेष्वपि सूर्यादिपञ्चकमंगुल्यु-क्तबीजेन विन्यस्य कराङ्गन्यासङ्कुर्यात् । तत्र ह्स्रां हृदयाय नमः । ह्स्रीं शिरसे स्वाहा । ह्स्रूं शिखायै वषट् । ह्स्रैं कवचाय हुँ । ह्स्रौं अस्त्राय फट् । ह्स्रांश्च नेत्रत्रयाय वौषट्, इति नेत्रान्ताङ्गमन्त्रान्विन्यस्य बीजेन व्यापकङ्कुर्यात् । वं दीप्ता, वीं सूक्ष्मा, वुं जया, वें भद्रा, वैं विभूति, वों विमला, वौं अमोघा, वं सर्वतोमुखी, एताः सबीजपीठशक्तयः ।

ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नम इति पीठमन्त्रेण पीठं सम्पूज्य कर्णिकायां पूर्वादिदिक्ष्-ङं उषायै, श्रं प्रज्ञायै, श्रं प्रभायै । सं सन्ध्यायै नम इति सम्पूज्य मूलेन मूर्त्तिङ्कल्पयेत् । ध्यानम् —

हेमाम्भोजप्रबालप्रतिमनिजरुचिञ्चारु खट्वाङ्गपद्मौ
चक्रं शक्तिङ्कपाणं त्रिशूलमतिरुचिराक्षमाला ङ्कपालम् ।
हस्ताम्भोजैर्द्दधानं त्रिनयनविलसद्देहरक्ताभिरामं
मार्त्तण्डं वल्लभार्द्धं मणिमयमुकुटं हारदीप्तं भजामः ॥

अत्रखट्वाङ्गादीनि वामोर्ध्वहस्तमारभ्य दक्षिणोर्ध्वहस्तपर्यन्तम् । आवरणपूजायां पूर्वादिचतुर्दिक्षु कर्णिकायां सूर्यभास्करभानुरवीन । अग्न्यादिकोणेषु--उं उषायै, श्रं प्रज्ञायै, श्रं प्रभायै, सं सन्ध्यायै नम इति । केशरेष्वग्न्यादिकोणेषु-हृदयशिरःशिखाकवचानि, दिक्ष्वस्त्रम्, ऐशान्यां-नेत्रम्, पत्रेषु-चन्द्र, कुज, बुध, गुरु, शुक्र शनि राहु, केतून्, तद्बहिर्लोकपालांश्च, पूजयेदिति । अत्र वज्राद्यावरणं नास्ति ।

"अर्घप्रधानं प्रयजेन्मन्त्री मार्त्तण्डभैरवम् ।" तस्य प्रकारः-प्रत्यहं रविवारे वा प्रभाते वह्निर्मण्डलङ्कृत्वा तत्र पीठं सम्पूज्य पाणीय प्रस्थग्राहिरम्यं ताम्रपात्रन्तत्र निधाय शुभोदकेन मूलेन तत्पूरयित्वा तत्र भानुना ऐक्यं सङ्कल्प्य कुङ्कुमरोचना वा रक्तचन्दनवैणवकरवीरजवाशालिकुशश्यामाकतण्डुलान् निःक्षिप्य तत्र साङ्गन्देवं यथाविधि गन्धादिभिरभ्यर्च्य कराग्रन्तत्पात्रम्पिधायाष्टोत्तरशतं मन्त्रं जप्त्वा पुनर्गन्धादिभिस्तत्र देवमभ्यर्च्य जानुभ्यामवनीङ्गत्वा आमस्तकन्तत्पात्रमुद्धृत्य सावरणे रवावौत्सुक्येन दृष्टिं निधाय मूलं मनसा जपन् सूर्यायार्घं प्रसन्नात्मा दद्यात् । ततः पुष्पाञ्जलिन्दत्वाऽष्टोत्तरशतं जपेदिति ।

लक्षत्रयं जपेन्मन्त्री बीजं विम्बपुटीकृतम् ।
दशांशं कमलैः फुल्लैर्जुहुयान्मधुरोक्षितैः ॥
वियदर्द्धेन्दुललितं तदादिस्सर्गसंयुतः ।
अजपाख्यो मनुः प्रोक्तो द्व्यक्षरः सुरपादपः ॥

हंसा षड्दीर्घयुक्त नेत्यनेन ह्रूमित्यादयोऽङ्गमन्त्राः प्रतिपादिताः। कला षड्दीर्घकैरित्येकाक्षरगोपालमन्त्रेषु क्लामित्याद्यङ्गमन्त्रवत्।

पीठपूजायां शैले समच्चर्नापीठ इति प्रपञ्चसारवचनाच्छक्तिवत्पीठमन्त्रोऽपि सौरपीठस्यैव पीठाद्वैक्येनैव चात्र प्रकरणेऽस्य मन्त्रस्योपन्यासः। अस्य ब्रह्मा ऋषिर्गायत्रीछन्द ईश्वरो देवता आयुरारोग्याद्यभीष्टसिद्धौ विनियोगः। ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रीं शिखायै वषट्। ह्रैं कवचाय हुम्। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्। इत्यङ्गमन्त्राः।

रां दीप्ता, रिं सूक्ष्मा, रूं जया, रें भद्रा, रैं विभूति, रों विमला, रौं अमोघा, रं विद्युता, रः सर्वतोमुखी, एताः सबीजपीठशक्तयः। ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठात्मने नम इति पीठमन्त्रः। ध्यानम्—

उद्यद्भानु - स्फुरित्तड़िदाकारमर्द्धाम्बिकेशं
पाशाभीतीवरदपरशूसन्दधानं कराब्जैः।
दिव्याकल्पैर्मणिगणमयैश्शोभितं विश्वमूलं
सौम्याग्नेयं वपुरवतु वश्चन्द्रचूडं त्रिनेत्रम्॥

उर्ध्वहस्तयोः पाशाभीती। अधोहस्तयोः वरदपरशू ध्यातव्यौ। आवरणपूजायां केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि। अग्रे नेत्रम्। दिक्ष्वस्त्रम्। पत्रेषु पूर्वादिदिक्षु ऋतुबसून्नवबरान्। विदिक्षु ऋतजा, गोजा, अब्जाऽद्रिजास्तद्वहिर्लोकपालान्, तद्वहिस्तदस्त्राणि च पूजयेत्। अर्घदानमष्टाक्षरसूर्यमन्त्रवत्।

भानुलक्षं जपेन्मन्त्रं पायसेन ससर्पिषा।
दशांशं जुहुयात्सम्यक् तस्य सिद्धो भवेन्मनुः॥

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजाप्रदीपे सूर्यपरमात्मपूजापरिच्छेद।

अथाग्निमन्त्राः

व्याहृतित्रयमग्निः स्याज्जातवेद इहावह ।
सर्वकर्माणि सम्भाव्य साधयाग्निप्रिया ततः ॥
तारायोऽयं मनुः प्रोक्तः पञ्चविंशति वर्णवान् ॥

अत्र सम्बोधनान्तत्वेऽर्थसङ्गतिसाकाङ्क्षमाणोऽग्निः स्यादित्यत्राग्निः स्यादिति पाठं कल्पयति। तत्तु कल्पनमेव। तारं व्याहृतयश्चाग्निर्जातवेद इहावह। इति प्रपञ्चसारटीकायामग्निरिति प्रथमान्तस्तथैव पाठनिर्णयः। स्वमण्डलान्तं प्रयजेत्पीठं सनवशक्तिकमिति वचनादाधारशक्त्यादि-वह्निमण्डलपर्यन्तं पीठं सम्पूज्य पीतश्वेतादि पीठशक्तयः पूजयेत् ।

अस्य मन्त्रस्य भृगुऋर्षिर्गायत्रीछन्दोऽग्निर्देवता धनाद्यभीष्टसिद्धौ विनि-योगः। ओं भूर्भुवः स्वः हृदयाय नमः । अग्निर्जातवेदशिरसे स्वाहा। इहावह शिखायै वषट्। सर्वकर्माणि कवचाय हुँ। साधय नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्। इत्यङ्गमन्त्राः। आधारशक्त्यादिवह्निमण्डलान्तं पीठं सम्पूज्य पीता, श्वेता, अरुणा, कृष्णा, धूम्रा, तीव्रा, स्फुलिङ्गिनी, रुचिरा ज्वालिन्यः पीठशक्तयः पूजयेत्। रं इति मन्त्रः। ध्यानम्—

अंशाशक्तसुवर्णमाल्यमरुण - स्रक्चन्दनालङ्कृतं
ज्वालापुष्पजटाकलापविलसन्मौलिं सुशुक्लांशुकम्।
शक्तिः स्वस्तिकदर्भमुष्टिकजपस्स्रक्स्रुक्स्रुवाभीरवान्
दोर्भिर्विभृतसञ्चितत्रिनयनं रक्ताभमग्निं भजे ॥

अत्र वामदक्षिणक्रमेण ऊर्ध्वहस्तयोः शक्तिमुष्टिके तदधः कुशमुष्टि-जपमाने तदधः स्रक्स्रुवौ। तदधश्चाभयवरौ ध्यातव्यौ। आवरणपूजायां केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि। अग्रे-नेत्रम्। दिक्ष्वस्त्रम् । पूर्वादिदलेषु जातवेद, सप्तजिह्व, हव्यवाहनश्वोदरज, वैश्वानर, कौमार, तेजो, विश्वमुख, देवसुखान् शक्तिस्वस्तिककरान्। तद्बहिर्लोकपालान्, तद्बहिस्तद-स्त्राणि च पूजयेत्।

गुरोर्लब्धमनुर्मन्त्री चतुर्दश्यामुपोषितः ।
उपेद्गानुसहस्राणि शुद्धाचारो जितेन्द्रियः ॥

आमावास्यादिने विप्रान् भोजयेन्मधुरोत्तमैः ।
भक्ष्यैर्भोज्यैर्यथाशक्ति दद्यात्तेभ्योऽथ दक्षिणाम् ॥

भक्त्वा स्वयं समानीय होमद्रव्याणि साधयेत् ।
अपरन्दिनमारभ्य होमङ् कुर्यादतन्त्रित। ॥

क्रमाद्वटसमिद्व्रीहि - लाजाजीवि - हविघृतैः ।
प्रत्येकमष्टोत्तरशतं जुहुयाद्दिनशः सुधीः ॥

दशाहमेवं निर्वर्त्य विधानेन विधानवित् ।
दत्वा पूर्णाहुतिं सम्यगेकादश्यां द्विजोत्तमान् ॥

सम्पूज्य तर्पयेद्वित्तैर्यथाविभवमादरात् ।
गुरवे दक्षिणान्दद्यादरुणां गां पयस्विनीम् ॥

वासांसि धनधान्यानि दत्वा संप्रीणयेत्पुनः ।

चतुर्द्दशी चैत्रकृष्णपक्षीया इति प्रपञ्चसारः ।

उत्तिष्ठ पुरुषं ब्रूयात् हरिपिङ्गलतत्परम् ॥
लोहिताक्षपदन्देहि मे ददापय च द्वयम् ।
चतुर्विंशत्यक्षरात्मा समृद्धि मनुरीरितः ॥

अत्राङ्गध्याने सर्वं पञ्चविंशत्यक्षरवत् । अङ्गमन्त्रास्तु—उत्तिष्ठपुरुष हृदयाय नमः । हरिपिङ्गल शिरसे स्वाहा । लोहिताक्ष शिखायै वषट् । देहि मे कवचाय हुँ । ददापय नेत्रत्रयाय वौषट् । स्व हा अस्त्राय फट् । ध्यानम्—

स्वर्णाश्वत्थविनिर्गतं हुतवहं सिन्दूरपूञ्जप्रभं
ज्वालाभिर्निचिताङ्गरोमनिचयं कान्त्या जगन्मोहनम् ।
अश्वाकारमनर्घ्यरत्नविलसद्भूषालसत्कन्धरं
रत्नैरिन्द्रियनिर्गतैर्वसुमतीमाच्छादयन्तं स्मरेत् ॥

लक्षं मन्त्रं जपेदेनं पयोऽन्नेन ससर्पिषा ।
दशांशं जुहुयाद्वह्नौ तुरङ्गाग्निमनुस्मरेत् ॥

वियतो दशमो विसर्गयुक्तो भुवस्सर्गो भृगुणान्तषोड़शार्चः ।
हुतभुग्दयिता ध्रुवादिकोऽयंमनुरक्तः सुसमृद्धिदः कृशानोः ॥

वियतो दशमः पूर्वोभकारः, अर्धीत्यर्धीशः । अस्य प्रपञ्चसारोक्तमन्त्रस्याङ्गमन्त्रध्याने विहाय सर्वं पञ्चविंशत्यक्षरवत् । अङ्गमन्त्रास्तु सहस्रार्चिषे हृदयाय नमः। स्वस्तिपूर्णाय शिरसे स्वाहा । उत्तिष्ठपुरुषाय शिखायै वषट् । धूमव्यापिने कवचाय हुम् । सप्तजिह्वाय नेत्रत्राय वौषट् । धनुर्द्धरास्त्राय फट् । अथवा भूः हृदयाय नमः । भुवः शिरसे स्वाहा । स्वः शिखायै वषट् । भूः कवचाय हुँ । भुवः नेत्राभ्यां वौषट् । स्वः अस्त्राय फट् । ध्यानम्—

शक्तिस्वस्तिपाशाल्सङ्कुशवरदाभयान् दधत्त्रिमुखः ।
मुकुटादिविविधभूषोवताच्चिरं पावकः प्रसन्नो वः ॥

अत्र दक्षिणवामयोरुर्ध्वहस्तयोः शक्तिस्वस्तिके, तदधः पाशाङ्कुशौ, तदधो-वराभये, इति प्रपञ्चसारविवरणम् । परन्तु द्वितीयवामहस्तमारभ्य तदूर्ध्वहस्तान्तं शक्त्यादिसन्निवेशे अङ्कुशस्यापि दक्षिणहस्ते निवेशनियमो न भुज्यत इति ।

प्रजपेदिमं मनुमृत्तलक्षमादराद्दशांशतः प्रजुहुयात्पयोन्धसा ।
ससर्पिषाप्यसितरैः षाष्ठिकैः समर्च्चयेदथ विधिवद्विभावसुम् ॥

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजापूदीपेऽग्निपूजापरिच्छेदः ।

अथ शिवमन्त्राः

हृदयं वपरं साक्षिणान्तो नन्तान्वितो मरुत् ।
पञ्चाक्षरो मनुः प्रोक्तस्ताराद्योऽयं षडक्षरः ॥

अत्र मन्त्रवर्णादिकान्न्यसेत् पञ्चमूर्त्तिर्यथाक्रममित्यत्रोङ्कारस्य सर्वमूर्त्तिष्वन्वयः । नकारादीनान्तु यथाक्रममेकैकन्तथैव सम्प्रदायात् । पञ्चानां षड्वर्ण-

पूर्वकतायाऽन्यथोपपादयितुमशक्यत्वाच्च । षण्णामपि सर्वत्रान्वये मन्त्रादिका नित्येव हि ब्रूयान्नतु मन्त्रवर्णादीनिति । गोलकन्यासे कण्ठे नाभौ द्विपार्श्वयोरित्यत्र कण्ठे विहितो न्यासस्तन्मूलदेशे विधेयः । कण्ठमूले तथा नाभाविति प्रपञ्चसारवचनात् । गोलकन्यासानन्तरं मूर्तिमानोदरांसे सुहृदये ताः पुनर्न्यस्येदित्यत्र मूर्त्तीरिति स्थाने मूर्द्धेति ता इति स्थाने तानिति पाठो न युक्तः ।

पुनस्तत्पुरुषाघोर - सद्य - वामेशसंज्ञकान् ।
ललाटजठरे द्व्यंसहृदयेषु क्रमान्न्यसेत् ।।

इति प्रपञ्चसारेण प्रथमपाठस्यैकवाक्यत्वाद् गोलकन्यासानन्तरं ऊर्ध्वाधः क्रमतः कुर्याद् गोलकन्यासमुत्तममिति प्रपञ्चसारे ।

अस्यार्थस्टीकायाम्—मस्तकात्पादपर्यन्तं पादाभ्यां मूर्द्धान्तञ्च गोलकन्यासप्रकाशकं मूलमन्त्रन्यासङ्कुर्यादिति । पूजा चोदङ्मुखेनैव कर्त्तव्या । "उदङ्मुखेनैव कुर्वीत शैवङ्कर्म सदैव हि" । इति वचनात् । आवरणपूजायाङ्कर्णिकायां यजेन्मूर्त्तिरिति वाक्ये यद्यपि तत्पुरुषादिक्रमेण पूजा युज्यते । ताः स्युस्तत्पुरुषाघोरसद्यवामेशसंज्ञका इति पूर्वोक्तवचने तथैव क्रमात् । तथाऽप्यत्र कर्णिकायां यजेन्मूर्त्तीरिति सामान्यतोऽभिधाय ईशमीशानदिग्गतमित्यादिवचनेषु प्रथममीशानस्य ततस्तत्पुरुषादीनां पूजाभिधानात्तथैव क्रमो ग्रहीतव्यः ।

अस्य मन्त्रद्वयस्य वामदेवऋषिः पाङ्क्तश्छन्दः शिवो देवताऽभीष्टप्राप्त्यर्थे विनियोगः । ओं हृदयाय नमः । नं शिरसे स्वाहा । मं शिखायै वषट् । सिं कवचाय हुँ । वां नेत्रत्रयाय वौषट् । यं अस्त्राय फट् । इत्यङ्गमन्त्राः । एभिः करन्यासमात्रं प्रथमतः कृत्वा मूर्त्तिन्यासङ्कुर्यात् । यथा तर्जन्याम् ओं नं तत्पुरुषाय नमः । मध्यमायाम् ओं मं अघोराय नमः । कनिष्ठिकायाम्- ओं सिं सद्योजाताय नमः । अनामिकायाम्-ओं वां वामदेवाय नमः । अङ्गुष्ठे ओं यं ईशानाय नमः । मुखे-ओं नं तत्पुरुषाय नमः । हृदि-ओं मं अघोराय नमः । पादयोः-ओं शिं सद्योजाताय नमः । गुह्ये-ओं वामदेवाय नमः । मूर्ध्नि-ओं यं ईशानाय नमः ।

पूर्वमुखे-ओं नं तत्पुरुषाय नमः । दक्षिणमुखे-ओं मं अघोराय नमः । पश्चिममुखे-ओं शिं सद्योजातायनमः। उत्तरमुखे-ओं वां वामेदवाय नमः । मध्यममुखे-ओं यं ईशानाय नमः। ततोऽङ्गन्यासङ्कृत्वा मन्त्रदशावृत्तिरूपं गोलकन्यासङ्कुर्यात् । स यथा-हृदि ओं । मुखे-न । दक्षिणांशे-मः । वामांशे-शिः । दक्षिणोरौ वा । वामोरौ-य । कण्ठमूले-ओं । नाभौ-न । दक्षिणपार्श्वे-मः । वामपार्श्वे-शि । पृष्ठे वा । हृदि-य । शिरसि-ओं । मुखे-न । नेत्रयोः मः शिः । नासापुटे-वा य । दक्षिणबाहौ-ओं । तत्सन्धिचतुष्टये-नमश्शिवा । तदग्रे-य । दक्षिणपादे-ओं । तत्सन्धिचतुष्टये-नमश्शिवा । तदग्रे-य । वामपादे-ओं । तत्सन्धिचतुष्टये-नमश्शिवा । तदग्रे-य । शिरसि-ओं । वदने-न । हृदि-मः । उदरे-शि । उर्वो--वा । पादद्वये-य । हृदि-ओं । मुखे-न । देवतामयस्यात्मनः टङ्कादिकं परिकल्प्य टङ्के मः। मृगे शि । अभये वा । वरे य ।

वक्त्रे-ओं । अंशयोः-न । हृदि-मः । पादयोः शि । उर्वोः-वा । जठरे-य । इति गोलकन्यासः । भाले-ओं नं तत्पुरुषाय नमः । उदरे-ओं मं अघोराय नमः । दक्षिणांशे-ओं शिं सद्योजाताय नमः । वामांशे-ओं वां वामदेवाय नमः । हृदि-ओं यं ईशानाय नम इति न्यसेत् ।

नमोऽस्तु त्वाद्यभूताय ज्योतिर्लिङ्गामृतात्मने ।
चतुर्मूर्त्तिरथच्छाया - भासिताङ्गाय शम्भवे ॥

इति मन्त्रेण व्यापकङ्कुर्यात् ।

वामा, ज्येष्ठा, रौद्री, काली, कलविकरणी, बलविकरणी, बलप्रमथिनी, सर्वभूतदमनी, मनोन्मन्यः पीठशक्तयः । ओं नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नम इत्यासनदानमन्त्रः । ध्यानन्तु—

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिम्बसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रन्त्रिनेत्रम् ॥

अत्रोर्ध्वयोर्दक्षिणवामयोस्ततस्तदधस्तनयोः । यद्वाऽधोवामहस्तमारभ्य परस्वादि ध्यातव्यम् । आवरणपूजायाङ्कर्णिकायामीशकोणे ईशानम् । पूर्वादिदिक्षु तत्पुरुषाघोरसद्योजातवामदेवान् । आग्नेयादिकोणचतुष्टये—निवृत्ति, प्रतिष्ठा, विद्या, शान्तीः ।

केसरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् । दिक्ष्वस्त्रम् । पत्रेषु पूर्वादिदिक्षु अनन्त, सूक्ष्म, शिवोत्तम, एकनेत्र, एकरुद्र, त्रिमूर्त्ति, श्रीकण्ठ, शिखण्डिनः ।

उत्तरादिदलाग्रेषु—उमा, चण्डेश्वर, नन्दि, महाकाल, गणेश, वृषभ, भृङ्गि, रिटि स्कन्दान् । तद्बहिरिन्द्रादीन् । तद्बहिर्वज्रादींश्च पूजयेत् । अथावरणध्यानम्—

शुद्धस्फटिकसङ्काशं दिक्षु तत्पुरुषादिकान् ।
पीताञ्जनश्वेतरक्तान् प्रधानसदृशायुधान् ॥

चतुर्वक्त्रसमायुक्तान् यथावत्सं प्रपूजयेत् । अनन्तादीनां विशेषणानि—

रक्तपीतसितारक्तकृष्णरक्ताञ्जनासितान् ।
किरीटार्पितबालेन्दून् पदमस्थभूषणान्वितन् ॥

त्रिनेत्रान् शूलवज्रास्त्रचापहस्तान्मनोरमान् । अस्त्रं बाणः । तमादीनां ध्यानम्-

स्वर्णतोयारुणश्याममुक्तेन्दुसितपाटलान् ।
तत्तल्लक्षं जपेन्मन्त्रन्दीक्षितैश्शैववर्त्मना ॥
तावत्संख्यसहस्राणि जुहुयात्पायसैश्शुभैः ॥
षड़क्षरः शक्तिरुद्धः कथितोऽष्टाक्षरो मनुः ।

अस्य मन्त्रस्य वामदेवऋषिः पङ्क्तिश्छन्द उमापतिर्देवताऽभीष्टसिद्धौ विनियोगः । ओं हृदयाय नमः । नं शिरसे स्वाहा । मं शिखायै वषट् । शिं कवचाय हुं । वां नेत्रत्रयाय वौषट् । यं अस्त्राय फट् । इत्यङ्गमन्त्राः ।

वामा, ज्येष्ठा, रौद्री, काली, कलविकरणी, बलविकरणी, बलप्रमथिनी, सर्वभूतदमनी, मनोन्मन्य। पीठशक्तयः। ओं नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नम इति पीठमन्त्रः। ध्यानम्—

बन्धूकाभं त्रिनेत्रं शशिसकलधरं स्मेरवक्त्रं वहन्तं
हस्तैश्शूलङ्कपालं वरदमभयदं चारुहासं भजामि।
वामोरुस्थम्भगायाः करतलविलसच्चारुरक्तोत्पलाया
हस्तेनाश्लिष्टदेहं मणिमयविलसद्भूषाणायाः प्रियायाः॥

अत्र शूलकपाले ऊर्ध्वयोर्दक्षिणवामहस्तयोः, वरदाभयदे तदधोहस्तयोर्ध्यातव्ये। आवरणपूजायां केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि। अग्रे-नेत्रम्। दिक्ष्वस्त्रम्। मध्ये-हृल्लेखाम्। अङ्गावृत्तेर्बहिः पूर्वतः दुर्गाम् दक्षिणतः रक्तामुत्तारतः करालिकां, पश्चिमतः महेष्वासाम्।

पूर्वादिपत्रेषु—वृषभ, क्षेत्रपाल चण्डेश, दुर्गाषण्मुख, नन्दि, विघ्नेश, सेनापतीन्। पत्राग्रेषु – ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महलक्ष्म्यः। तद्बहिर्लोकपालान्। तद्बहिस्तदस्त्राणि च पूजयेत्। अथावरणध्यानम्-

हृल्लेखाद्याः क्रमाद्ध्येयाः पञ्चभूतसमप्रभाः।
पाशाङ्कुशवराभीति - धारिण्योऽमितभूषणाः॥
हिमालयाभं वृषभं तीक्ष्णशृङ्गं त्रिलोचनम्।
सर्वाभरणसन्दीप्तं साक्षाच्छन्दःस्वरूपिणम्॥
कपालशूलविलसत्करं कालघनप्रभम्।
क्षेत्रपालं त्रिनयनं दिगम्बरमथार्च्चयेत्॥
शूलटङ्काक्षवलयङ्कमण्डलु - लसत्करम्।
रक्ताकारन्त्रिनयनं चण्डेशमथ पूजयेत्॥
चक्रशङ्खाभयाभीष्टकरां मरकतप्रभाम्।
दुर्गां प्रपूजयेत्सौम्यां त्रिनेत्राञ्चारुभूषणाम्॥

कल्पशाखां रत्नघण्टान्दधानं द्वादशेक्षणम् ।
कालार्क्काभं शिशुं काण्डं षण्मखं पूजयेत्ततः ॥
नन्दिनं प्रयजेत्सौम्यं रत्नभूषणमण्डितम् ।
परश्वेनवराभीतिधारिणं श्यामविग्रहम् ॥

पाशाङ्कुशवराभीष्टधारिणं कुङ्कुमप्रभम् ।
विघ्ननायकमभ्यर्च्य चन्द्रार्द्धकृतशेखरम् ॥
श्यामं रक्तोत्पलकरं वामाङ्कन्यस्ततत्परम् ।
द्विनेत्रं रक्तवस्त्राढ्यं सेनापतिमथार्च्चयेत् ॥

मातृणाञ्ध्यानम्--मातृकासरस्वतीमन्त्रपूजायामनुसन्घ्येयम् ।

मनुलक्षञ्जपेन्मन्त्रन्तत्सहस्रं यथाविधि ।
जुहुयान्मधुरासिक्तैरारग्बध - समिद्वरैः ॥

आरग्बधः--आरोग इति प्रसिद्धः ।

सन्तः सद्यान्तसंयुक्तो बिन्दुभूषितमस्तकः ।
प्रासादाख्यो मनुः प्रोक्तो भजतां सर्वसिद्धिदः ॥

अत्र ईशानाद्यष्टत्रिंशत्कलान्यासे-

तत. प्रविन्यसेद्विद्वान - ष्टत्रिंशत्कलास्तनौ ।
ईशानाद्या ऋचस्सम्यगङ्गुलीषु यथाक्रमम् ॥

इत्यादि वचनप्रतिपादिता ऋगादिन्यासास्तदङ्गान्येव वक्ष्यामि । शैवागमसारेऽष्टत्रिंशत्कलान्यासविधिं यथावदित्युपक्रम्य तेषां प्रपञ्चसारेऽभिधानात् । अतः शारदातिलके—

"ततः प्रविन्यसेद्विद्वानष्टत्रिंशत्कलास्तना" वित्युक्त्वा कथमित्याकाङ्क्षायाम्-"ईशानाद्या ऋचस्सम्यगङ्गुलीषु यथाक्रम" मित्यादिना तत्पूर्वंकृत्यानृगादिन्यासानभिधाय पूर्वदक्षिणपाश्चात्येत्यादिना कलान्यास उक्त

इति ऋगादिन्यासानन्तरमेव कलान्यासो नतु प्रथममिति । तारपञ्चकमुच्चार्य्य सर्वज्ञाय हृदयाय नम इत्यादि षड़ङ्गानि ऋक्पञ्चकस्येति प्रपञ्चसारे व्यक्तम् । तथा च तन्न्यासपूर्वमेव तदङ्गन्यासो युक्त इति प्रपञ्चसारे तथैवाभिहितः ।

शारदायान्तु—ऋचां न्यासमभिधायाङ्गन्यास उक्तस्तत्र प्रमाणमनुसन्धेयम् । ईशानादिकन्यासश्च न्यस्ततत्तन्मन्त्राभिरङ्गुलीभिः कर्त्तव्यः । विन्यसेदङ्गुलीभिरिति प्रपञ्चसारवचनात् । तत्रापि समुष्टिरङ्गुष्ठा । इतरास्तु-सांगुष्ठा इति तट्टीका । ऋक्पञ्चकन्यासे च ईशानस्तत्पुरुषाघोरौ वामदेवः सद्योजात इति क्रमः । कलान्यासे तथैव क्रमाभिधानात् । अङ्गमन्त्रे तारपञ्चकमुच्चार्य सर्वज्ञाय हृदीरितमित्यत्र तारपञ्चकं पञ्च ओङ्कारा इत्येके । ऐं क्लीं छुं स्त्रीं सः इत्यमी त्रिपुरापटलोक्ताः । पञ्च प्रणवाख्या मन्त्रा इत्यपरे । ऐं ह्रीं श्रीं ह्रैं ह्रौं पञ्च वीजानीति **प्रपञ्चसारटीका ।**

शिरोमन्त्रे दृप्ताय इति शारदायां दृप्ताय इति तु प्रपञ्चसारे उद्धारः । नेत्रमन्त्रे सौं रौं ह्रौं इति सम्भाष्य परतो आप्तशक्तय इत्यत्राप्तेत्यकारप्रश्लेषः । प्रपञ्चसारटीकाद्यनुरोधात्, युक्तार्थत्वाच्च । वामदेव कलान्यासे—

गुह्यमुष्कोरुयुग्मेषु जानुजङ्घायुगे स्फिचोः ।
कट्यां पार्श्वद्वये वामकलान्यासस्त्रयोदश ॥

इति वाक्ये मुष्कोऽण्डकोषः । मुष्कोऽण्डकोषो-वृषण, इत्यमरसिंहाभिधानात् । सचैक एव । एतदभिप्रायेणैव गुह्याण्डयोश्चेति प्रपञ्चसारवचने द्वित्वनिर्द्देशः । ततोनातिभवे पदमित्यत्रानातिभवे इत्यकार प्रश्लेषः । वेदे तथैव पदनिर्णयात्, शैवागमस्वरसाच्च । तदुक्तं शैवागमे—

ईशानं विभजेन्नाग वसुविश्वशरार्णवैः ।
ततस्तत्पुरुषन्नाग - नागसागरसागरैः ॥
अघोरं वेद एवादृग् वाणाग्नीषु शरेषुभिः ।
वामं हयेनाग्निशरैर्द्व्यश्वगैर्दिक्शराध्वभिः ॥

"सद्योजातन्तरन्दिक कराग्नीष्वाब्धिदिग्रसैः। अत्र च अघोरमन्त्रे सर्वत इति व्याधिकला"। सर्व सर्वेभ्य इति मृत्युकला भवतीति विशेषः। सद्योजातमन्त्रे वसुदिगिति सद्योजाताय वै नमो नम इति तैत्तरीयशाखायां नमोद्वयपाठानुरुद्धं शाखाविशेषे एकैव नमः पदस्य दर्शनात्तत्परा शारदाऽभवेऽनातिभवे इत्युभयत्र अकारश्लेषादग्नीष्वित्यविशेषः।

वामदेवमन्त्रे अघोरमन्त्रे ज्येष्ठाय नम इत्यनन्तरं श्रेष्ठायनम इति तैत्तरीयशाखायान्दर्शनादत्र च तथा विभागाभावेन शाखान्तरीयत्वमेव। वामं हयेन सप्तभिः, अग्निशरैः पञ्चकत्रयेण, द्व्यश्ववर्गः प्रथमं द्वयं ततः सप्त। एवं वारत्रयमित्यर्थः। ध्याने मुक्तापीतेत्यादिवर्णा ऊर्ध्वं पूर्वादिमुखेषु क्रमेण ध्यातव्याः।

ईशानतत्पुरुषादीनां तत्तद्वर्णतया तत्तन्मुखेषु तत्तद्वर्णतौचित्यात्। उपरितनं हस्तमारभ्य दक्षिणहस्तपञ्चके शूलादिपञ्चकमुपरितनमेवारभ्य वामपञ्चके नागेन्द्रादिपञ्चकम्। नच ग्रन्थकारस्य नेयं शैली। सहि प्रादक्षिण्येन वा दक्षिणवामक्रमेण वाऽस्त्राणि प्रतिपादयतीति वाच्यम्, शूलाहिटङ्कघण्टाशृणिकुलिशपाशाग्न्यभीतिदं धानमिति प्रपञ्चसारेणान्यथाविरोधात्। तत्र दक्षिणवामक्रमेण तदभिधानात्। आवरणपूजायामादिपूजनमुत्तरादिक्रमेण पञ्चाक्षरे तथैव तत्पूजाकथनम्प्रपञ्चसारे ता उक्त्वा सम्पूज्याश्चोत्तरादित इत्यभिधानाच्च।

अस्य मन्त्रस्य वामदेव ऋषिः पङ्क्तिश्छन्दः शिवोदेवता धनाद्यभीष्टसिद्धौ विनियोगः। हाँ हृदयाय नमः। हीं शिरसे स्वाहा। हुँ शिखायै वषट्। हैं कवचाय हुँ। हौं नेत्रत्रयाय वौषट्। हः अस्त्राय फट्। इत्यङ्गमन्त्राः। अथ मूर्त्यादिन्यासः—

अङ्गुष्ठे हों ईशानाय नमः। तर्जन्यां हें तत्पुरुषायनमः। मध्यमायां-हूँ अघोराय नमः। अनामिकायां हिं वामदेवाय नमः। कनिष्ठायां हं सद्योजाताय नमः। इति न्यसेत्। ततः शिरसि अङ्गुष्ठेन हों ईशानाय नमः। मुखे तर्जन्या हें तत्पुरुषाय नमः। गुह्ये अनामिकया हिं

वामदेवाय नमः । पादयोः-कनिष्ठया हं सद्योजाताय नमः । इति विन्यस्यैवमेवे-शानादीनाञ्चोर्ध्वप्राग्दक्षिणोत्तरपश्चिमेषु मुखेषु विन्यसेत् ।

ततोऽष्टत्रिंशत्कलान्यासः-ऐं ह्रीं श्रीं ह्रें ह्रः सर्वज्ञाय हृदयाय नमः । अमृते तेजोमालिनि तृप्ताय ब्रह्मशिरसे स्वाहा । ज्वलितशिखिशिखायादि-बोधाय शिखायै वषट् । वज्रिणे वज्रहस्ताय स्वतन्त्राय कवचाय हुँ । सौं रौं ह्रौं अलुप्तशक्तये नेत्रत्रयाय वौषट् । श्लीं पशुङ्क फट् अनन्तशक्तये अस्त्राय फट् । इति षड्ङ्गमन्त्रान् हृदयादिषु विन्यसेत् ।

ततः अङ्गुष्ठे ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्म शिवो मे अस्तु सदा शिवोम् । तर्ज्जन्याम्-तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् । मध्यमायाम्-अघोरेभ्योऽथ घोरेभ्यो घोराघोरतरेभ्यः सर्वतः सर्वं सर्वेभ्यो नमस्तेऽस्तु रूद्ररूपेभ्यः । अनामिकायां वामदेवाय नमो ज्येष्ठाय नमो रुद्रायनमः कालाय नमः कालविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः । कनिष्ठायाम्-सद्योजातं प्रपद्याय सद्योजाताय वै नमो भवे भवेनातिभवे भवस्व मांभवोद्भवाय नमः ।

आसामृचं ऋष्यादिकं विस्तरभयान्न कथितम् । इति ऋक्-पञ्चकं विन्यस्य पुनर्यथाक्रमं शिरोमुख - हृदयगुह्यपादेषु विन्यस्य ऊर्ध्वंप्राच्यदक्षिणोदीच्यपश्चिमेषु मुखेषु च विन्यसेत् । ततः पूर्ववक्त्रे-ओमीशानः सर्वविद्यानां शशिन्यै नमः । दक्षिणवक्त्रे-ईश्वरः सर्व-भूतानामङ्गदायै नमः । पश्चिममुखे-ओं ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मेष्टदायै नमः । उत्तरवक्त्रे-ओं शिरो मेऽस्तु मरीच्यै नमः । एताः समुष्टिनाऽङ्गुष्ठेन न्यसनीयाः । अथ तर्ज्जन्या साङ्गुष्ठया पूर्ववक्त्रे तत्पुरुषाय विद्महे शान्त्यै नमः । पश्चिममुखे-ओं महादेवाय धीमहि विद्यायै नमः । दक्षिणवक्त्रे-ओं तन्नो-रुद्रः प्रतिष्ठायै नमः । उत्तरवक्त्रे-ओं प्रचोदयात् निवृत्यै नमः । अथ मध्यमया साङ्गुष्ठया हृदि ओं अघोरेभ्यस्तमायै नमः । ग्रीवायाम्-ओमथ घोरेभ्यो मोहायै नमः । दक्षिणांसे-ओं घोरक्षयायै नमः । वामांसे-ओं घोरतरेभ्यो निद्रायै

नमः। नाभौ-ओं सर्वतः सर्वव्याधये नमः। उदरे-ओं सर्वेभ्यो मृत्युभ्यो नमः। पृष्ठे ओं नमस्तेऽस्तु क्षुधायै नमः। वक्षसि-ओं रुद्ररूपेभ्यस्तृषायै नमः।

अथ साङ्गुष्ठानामिकया-गुह्ये ओं वामदेवाय नमः राजायै नमः। अण्ड-कोषे-ओं ज्येष्ठायनमो रक्षायै नमः। दक्षिणोरौ -ओंरुद्रायनमो रत्यै नमः। वामोरौ - कालाय नमः पाणिन्यै नमः। दक्षिणजानौ ओं कलकामायै नमः। वामजानौ-ओं विकरणाय नमः। संयमन्यै नमः। दक्षिणजङ्घायाम्-ओं वसुक्रियायै नमः। वामजङ्घायाम्-ओं विकरणाय-नमो वृद्ध्यै नमः। दक्षिणस्फिचि बलस्थिरायै नमः। वामस्फिचि-ओंप्रमथनाय नमो रात्र्यै नमः। कट्याम्-ओं सर्वभूतदमनाय नमो द्राविण्यै नमः। दक्षिण-पार्श्वे ओं मनमोहिन्यै नमः। वामपार्श्वे-ओमुन्मनाय नमो जरायै नमः।

अथ साङ्गुष्ठकनिष्ठिकया-दक्षिणपादे-ओं सद्योजातप्रपद्यादिसिद्धये नमः। वामपादे-ओं सद्योजाताय वै नमो बृद्धये नमः। दक्षिणहस्ततले-ओं भवे द्युत्यै नमः। वामहस्ततले-ओमभवे लक्ष्म्येनमः। नासायाम्-ओमनाभि भवे मेधायै नमः। शिरसि ओं भवस्व मां प्रज्ञायै नमः। दक्षिणबाहौ-ओं भव-प्रभायै नमः। वामबाहौ-ओमुद्भवाय नमः स्वधायै नमः।

अष्टपत्रगुणवृत्तराशिभिर्वीथिकल्पतरुभिस्समावृत्तम्।
मण्डलम्प्रतिविधाय शूलिनः पीठमत्र नवशक्तिभिर्यजेत्।

प्रथममष्टदलम्। ततो वृत्तत्रयम्। ततो राशिचक्रम्। ततो वीथी। ततः कल्पलतेति। वामा, ज्येष्ठा, रौद्री, काली, कलविकरणी, बलप्रमथिती, सर्व-भूतदमनी, मनोन्मन्यः पीठशक्तयः। ओंनमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः इति पीठमन्त्रः। ध्यानम्—

मुक्तापीतपयोदमौक्तिकजरावर्णैर्मुखैः पञ्चभि-
स्त्र्यक्षै रञ्जितमीशमिन्दुमुकुटं पूर्णेन्दुकोटिप्रभम्।
शूलं टङ्ककृपाणवज्रदहनन्नागेन्द्रघण्टाकुशान्
पाशं भीतिहरं दधानममिताकल्पोज्ज्वलम्भावये॥

मुक्तापीतेत्यादि ऊर्ध्वादिक्रमेण उपरितनं हस्तमारभ्य हस्तपञ्चके शूला-दिपञ्चकम् । वामपञ्चके उपरिहस्तमारभ्य नागेन्द्रादिपञ्चकन्ध्येयम् । आवरण - पूजायाङ्कर्णिकायामैशान्यामीशानम् । दक्षिणस्या - मघोरम् । उत्तरस्यां वामदेवम् । पश्चिमायान्दिशि सद्योजातम् । एते ईशानाद्याः शिवे-श्वररुद्रविष्णुब्रह्मरूपतया क्रमेण ध्यातव्याः ।

अग्न्यादिकोणकेशरेषु निवृत्ति, प्रतिष्ठा, विद्या, शान्ति कलाः । पूर्वादि-पत्रेषु-अनन्त, सूक्ष्म, शिवोत्तमैकरुद्र - त्रिमूर्त्ति-श्रीकण्ठ-शिखण्डिनः । उत्तरादि पत्राग्रेषु-उमा, चण्डेश्वर नन्दि महाकाल, गणेश वृषभ भृङ्गि- रिटिस्कन्दान् । तद्बहिरिन्द्रादीन् । तद्बहिस्तदस्त्राणि च पूजयेत् । ईशानादीनां ध्यानम्—

शक्तिं डमरुकाभीतिवरांस्तं बिभ्रतङ्करैः ।
ईशानं तीक्ष्णं शुभ्रमैशान्यान्दिशि पूजयेत् ॥
परश्वेन वराभीतिर्दधानं विद्युदुज्वलम् ।
चतुर्मुखन्तत्पुरुषन्त्रिनेत्रम्पूर्वतोऽर्च्चयेत् ॥

अक्षस्रजं वेदपाशौ शूलं डमरुकन्ततः ।
खट्वाङ्गं निशितं शूलं कपालं बिभ्रतङ्करैः ॥

अञ्जनाभञ्चतुर्वक्त्रं भीमदंष्ट्रं भयावहम् ।
अघोरं तीक्ष्णं याम्ये पूजयेन्मन्त्रवित्तमः ॥

कुङ्कुमाभं चतुर्वक्त्रं वामदेवं त्रिलोचनम् ।
वराभयाक्षवलयं कुठारन्दधतं करैः ॥

बिलासिनं स्मेरवक्त्रं सौम्ये सम्यक् समर्चयेत् ।
कर्पूरेन्दुनिभं सौम्यं सद्योजातन्त्रिलोचनम् ॥

हरिणाक्षगुणाभीति - वरहस्तञ्चतुर्मुखम् ।
बालेन्दुशेखरोल्लासं मुकुटं पश्चिमे यजेत् ॥

वेदो मृग इति कश्चिद् वेदपुस्तकमित्यन्ये । अनन्तादीनामुमादीनाञ्च पञ्चाक्षरशिवमन्त्रपूजापरिच्छेदे द्रष्टव्यम् ।

एवं ध्यात्वा जपेन्मन्त्रं पञ्चलक्षं मधुप्लतैः ।
प्रसूनैः करवीरोत्थैर्जुहुयात्तु दशांशकम् ॥
तारोमाया-वियद्विन्दु-मन्त्रस्वर-समन्वितम् ।
पञ्चाक्षरसमायुक्तो वसुवर्णो मनुर्मतः ॥

विन्दुमन्त्रस्वरसमन्वित वियत् हौं । अस्य मन्त्रस्य ध्यानावरण - पूजातिरिक्तं सर्वं हृदयं रपरमित्यादि पञ्चाक्षरवत् । ध्यानन्तु—

वन्दे सिन्दूरवर्णं मणिमुकुटलसच्चारुचन्द्रावतंसं
भानोद्यन्नेत्रमीशं स्मितमुखकमल दिव्यभूषाङ्गरागम् ।
वामोरुन्यस्तपाणेरणुवु वलयं सन्दधत्याः प्रियाया
वृत्तोत्तुङ्गस्तनाग्रे निहितकरतलं वेदटङ्केष्टहस्तम् ॥

अधोवामहस्तमारभ्य वेदादित्रयमूर्ध्ववामहस्तस्तु प्रियास्तनाग्रे निहितो ध्यातव्यः। आवरणपूजायां केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखा-कवचानि। अग्रे नेत्रम्। दिक्ष्वस्त्रम् । पत्रेष्वनन्तादीन् उत्तरादिदलाग्रेषु-उमादीन्, ततः लोकपालान् , ततस्तदस्त्राणि च पूजयेत् ।

अष्टलक्षं जपेदेनं मन्त्रम्मन्त्रविदाम्वरः ।
तत्सहस्रं प्रजुहुयात्पयसा च घृतप्लुतैः ॥
तास्सिथरा वामवर्णैस्तु भृगुः सर्वविभूषितः ।
त्र्यक्षरात्मा निगदितो मन्त्रो मृत्युंजयात्मकः ॥

स कर्णेन्दुः स्थिराजुं इति वीजम् । अस्य मन्त्रस्य कहोलऋषिर्देवी गायत्री छन्दो मृत्युञ्जयो देवता आयुरारोग्याद्यभीष्टसिद्धौ विनियोगः । सां हृदयाय नमः। सिं शिरसे स्वाहा । सुं शिखायै वषट । सें कवचाय हुं। सौं नेत्रत्रयाय वौषट् । सेः अस्त्राय फट् । इत्यङ्ग मन्त्राः । वामा, ज्येष्ठा, रौद्री, काली, कलविकरणी, बलविकरणी, बलप्रमथिनी, सर्वभूतदमनी, मनोन्मलीति पीठशक्तयः । ओं नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नम इति पीठमन्त्रः। ध्यानम् —

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितम्
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिताभ्रप्रभम् ।
कोटीरेन्दुगलत्सुराप्लुततनुं हारादिभूषोज्वलम्
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत् ॥

ऊर्ध्वदक्षिणमुद्राया दक्षिणपाणिना निष्पाद्यत्वात्तस्याः दक्षिणपाणावेव न्यासः । पाशजपमानयोर्दक्षिणहस्तधार्यत्वेऽपि जपमालाया दक्षिणहस्ते न्यासः ।

नच पाशस्य वामहस्तधार्यत्वे पूर्वग्रन्थविरोधः । सति सम्भवे पाशस्य वामहस्तधार्यत्वापरित्यागित्वादित्यस्य तदर्थत्वात् । नन्वेवं जपमालायाङ्काम्यन्तत्र विषय एव । हस्तमारभ्य तदधो हस्तान्तं मुद्रादिचतुष्टयं ध्येयम् ।

आवरणपूजायामाग्नेयादिकोणकेशरेषु हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् । दिक्केशरेष्वस्त्रम् । तद्बहिरिन्द्रादीन् । तद्बहिर्वज्रादीन्पूजयेदिति ।

गुणलक्षं जपेन्मन्त्रं तद्दशांशं विशालधीः ।
जुहुयादमृताखण्डैः शुद्धदुग्धाज्यलोलितैः ॥
दक्षिणामूर्त्तये पूर्वं तुभ्यम्पदमनन्तरम् ।
वटमूलपदस्यान्ते पदं पश्चान्निवासिने ॥
ध्यानैकनिरताङ्गाय पश्चाद्भयान्नमः पदम् ।
रुद्राय शम्भवे तारशक्तिरुद्धोऽयमीडितः ॥
षट्त्रिंशदक्षरो मन्त्रः सर्वकामफलप्रदः ।

अत्र ध्याने मुद्राटङ्केत्यादिभिर्विलसत्पाणिभिरित्यर्थः । तत्र मुद्रादित्रयस्याधेयतया जानुतस्त्वाधारतया बिलासहेतुत्वमिति । आवरणपूजा च प्राक्प्रोक्तविधानेन सम्यक् सम्पूज्य साधु कलशाद्यैः पञ्चाक्षरतुल्या ब्रह्मप्रदिष्टपूजा चेति प्रपञ्चसारवचनात् । पञ्चाक्षरतुल्याऽत्र पञ्चब्रह्म, ईशानादिपञ्चकम् ।

अस्य शुकऋषिरनुष्टप्छन्दो दक्षिणामूर्त्तिः शिवो देवता सर्वार्थसिद्धौ विनियोगः। ओं ह्रीं दक्षिणामूर्त्तये ह्रीं हृदयाय नमः। ओं ह्रीं तुभ्यं शिरसे स्वाहा। ओं ह्रीं वषट् मूलनिवासिने हुँ शिखायै वषट्। ओं ह्रीं ध्यानैकनिरताय ह्रौं कवचाय हुँ। ओं ह्रीं नमो रुद्राय ह्रौं नेत्रत्रयाय वौषट्। ओं ह्रीं शम्भवे ह्रः अस्त्राय फट्। इत्यङ्गमन्त्राः। अथ मन्त्रवर्णन्यासः शिरसे-ओं। भाले-ह्रीं। नेत्रयोः दक्षि। कर्णयोः-णा म्। गण्डयोः-ओ ये। नासापुटयोः-तुभ्यम्। मुखे-व। दक्षिणबाहुसन्धिचतुष्टये ट। मूले-नि। वाममाहुसन्धिचतुष्टये-वासिनेध्या। गले-नै। स्तनद्वये-कनि। हृदि-वा। नाभौ-ता। कट्याम्-गा। लिङ्गे-य। दक्षिणपादसन्धिचतुष्टये-शम्भवे। ओं ह्रीं इति शिष्टाभ्यां व्यापकङ्कुर्यात। वामा, ज्येष्ठा, रौद्री, काली, कलविकरणी, बलविकरणी- बलप्रमथिनी, सर्वभूतदमनी, मनोन्मन्यः पीठशक्तयः। ओं नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठासने नम इति पीठमन्त्रः। ध्यानम्—

विन्ध्याचलतटे रम्ये सिद्धकिन्नरसेविते।
विविधद्रुमशाखाभिः सर्वतो वारिता तथा॥
पत्रपुष्पलताबालै - रश्लिष्ट - कुसुमद्रुमैः।
शिलाविवरनिर्गच्छन् निर्जरानिलशीतले॥
गायद्भृङ्गाङ्गनासङ्घे नृत्यद्बर्हिकदम्बके।
कूजत्कोकिलसङ्घेन मुखरीकृत - दिङ्मुखे॥
परस्पर - विनिर्मुक्तो मात्सर्यकृशसेवितैः।
आद्यैः सुराद्यैर्मुनिभि - रजस्र समुपस्थिते॥
पुरन्दरमुखैर्देवैः सेवायातैर्विलोकितम्।
वटवृक्षं महोच्छ्रायं पद्मरागफलोज्वलम्॥
गारुत्मकमयैः पत्रैर्निविडै — रुपशोभितम्।
विविधैरुपकल्पेन मुदमानै - रलङ्कृतम्॥
जलजैः स्थलजैः पुष्पै - रामोदिभिरलङ्कृतम्।
गृणद्भिर्वेदशास्त्राणि शुकवृन्दैर्निषेवितम्॥

संसारतापविच्छेद - कुशलोच्छ्रायमद्भुतम् ।
विचिन्त्य तस्य मूलस्थे वसेच्च तापशान्तये ॥
आसीनमसिताकल्पं शरच्चन्द्रनिभाननम् ।
स्तूयमानं मुनिगणैर्दिव्य - ज्ञानाभिलाषिभिः ॥
संस्मरेज्जगतामाद्यं दक्षिणामूर्त्तिं मध्यमम् ॥

ध्यानम्—कैलाशाद्रिनिभं शशाङ्कसकलस्फुर्यज्जटामण्डलं
नासालोकनतत्परं त्रितयनं वीरासनाध्यासितम् ।
मुद्राटङ्ककुरङ्गजानुविलसत्पाणिं प्रसन्नाननं
कक्षाबद्धभुजङ्गमं मुनिवृतं वन्दे महेशं परम ॥
मुद्रादिचतुष्टयन्ध्यातव्यम् ।

आवरणपूजायाङ्कर्णिकायामीशानकोणे ईशानम् । पूर्वादि दिक्षु तत्पुरुषादीन् । आग्नेयादिकोणचतुष्टये निवृत्याद्याः केशरेष्वङ्गानि । पत्रेष्वनन्तादीन् । चतुरादिदलाग्रेषु उमादीन् । तद्बहिरिन्द्रादीन् । तद्बहिर्वज्रादींश्च पूजयेत् । ध्यानं पञ्चाक्षरे द्रष्टव्यम् ।

अयुतद्वय - संयुक्तं गुणलक्षं जपेन्मनुम् ।
तद्दशांशं तिलैः शुद्धैर्जुहुयात् क्षीरसंप्लुतैः ॥
प्रणवो हृदयं पश्चात् ततो भगवते पदम् ।
ङेन्तं दक्षिणामूर्त्तिः मह्यं मेधामुदीरयेत् ॥
प्रयच्छ च द्वयान्तोयं द्वाविंशत्यक्षरो मनुः ॥

अस्य चतुर्मुखऋषिर्गायत्री छन्दो दक्षिणामूर्त्तिर्देवता मेधाद्यभीष्टसिद्धौ विनियोगः । ओं आं अं हृदयाय नमः । ओं इं ओं शिरसे स्वाहा । ओं उं ओं शिखायै वषट् । ओं ऐं ओं कवचाय हुँ । ओं औं ओं नेत्रत्रयाय वौषट् । ओं अः ओं अस्त्राय फट् । इत्यङ्गमन्त्राः ।

वामा, ज्येष्ठा, रौद्री, काली, कलविकरणी, बलविकरणी, बलप्रमथनी,

सर्वभूतदमनी, मनोन्मन्यः पीठशक्तयः। ओं नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नम इति पीठमन्त्रः। ध्याने-"हेमाचलतटे रम्य" इत्यादि दक्षिणामूर्त्तिमव्ययमित्यन्तं षड्विंशदक्षरन्तत्र द्रष्टव्यम्।

स्फटिकरुचिरवर्णं मौक्तिकीमक्षमाला-
ममृतकलशविद्याज्ञानमुद्राः कराग्रैः।
दधतमुरगकक्षं चन्द्रचूडं त्रिनेत्रं
विधृतविविधभूषं दक्षिणामूर्त्तिमीडे॥

अत्रोर्ध्वदक्षिणहस्तमारभ्य तदधोहस्तान्तं मालादीनि ध्यातव्यानि। आवरणपूजायां केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि। अग्रे-नेत्रम्। दिक्ष्वस्त्रम्। पत्रेषु पुस्तकं वाचयन्तीं स्मितमुखीं सरस्वतीम्। ब्रह्म, सनक, सनन्दन, सनत्कुमार, शुक, व्यास, गणेश्वरांश्च। तद्बहिः पूर्वादि दिक्षु-सिद्ध, गन्धर्व, योगीन्द्र, विद्याधरान्। तद्बहिरिन्द्रादीन्। तद्बहिस्तदस्त्राणि च पूजयेदिति।

लक्षमेकं जपेन्मन्त्रं ब्रह्मचारी व्रते स्थितः।
जुहुयात्सघृतैः पद्मैर्दशांशं संस्कृतेऽनले॥
अग्निसम्वर्त्तकादित्यबालिनो षष्ठमिन्दुमत्।
चिन्तामणिरिति ख्यातं बीजं सर्वसमृद्धिदम्॥

अस्य काश्यपऋषिरनुष्टुप्छन्दोऽर्द्धनारीश्वरो देवता धनाद्यभीष्टसिद्धौ विनियोगः। रं हृदयाय नमः। कं शिरसे स्वाहा। यं शिखायै वषट्। मं कवचाय हुँ। वं नेत्रत्रयाय वौषट्। यं अस्त्राय फट्। इत्यङ्गमन्त्राः। वामा, ज्येष्ठा, रौद्री, काली, कलविकरणी, बलविकरणी, बलप्रमथनी, सर्वभूतदमनी, मनोन्मन्यः पीठशक्तयः। ओं नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नम इति पीठमन्त्रः। ध्यानम्—

नीलप्रबालरुचिरं विलसत्त्रिनेत्रं
पाशारुणोत्पलकपालकशूलहस्तम्।

अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुरुद्धमुकुटं प्रणमामि रूपम् ॥

अत्रोर्ध्वदक्षिणहस्तादि तदधोहस्तान्तं पाशादिचतुष्कन्ध्येयम् । आवरणपूजायाङ्केशरेष्वग्न्यादिकोणेषु-हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् । दिक्ष्वस्त्रम् । पूर्वादिपत्रेषु-वृषभ, क्षेत्रपाल, चण्डेश, दुर्गा, षण्मुख, नन्दि, विघ्नेश, सेनापतीन् । पत्राग्रेषु ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्म्यः, तद्वहिर्लोकपालान् , तद्वहिस्तदस्त्राणि च पूजयेत् । वृषभादिध्यानं पञ्चाक्षरे ब्राह्म्यादिध्यानञ्च मातृकामन्त्रे द्रष्टव्यम् ।

एकलक्षञ्जपेद्बीजमित्थं मन्त्री विचिन्तयन् ।
अयुतं मधुरासक्तै - र्जुहुयात्तिल - तण्डुलैः ॥

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजाप्रदीपे
शिवपूजापरिच्छेदः

अथ चण्डेशमन्त्राः

अर्घी ईशो वह्निशिखो लान्तसोदान्त ईडितः ।
फडन्तश्चण्डमन्त्रोऽयं त्रिवर्णात्मा समीरितः ॥

अस्य मन्त्रस्यात्रिको ऋषिरनुष्टुप्छन्दो चण्डेशो देवता धनाद्यभीष्टसिद्धौ विनियोगः । दीप्तफट् हृदयाय नमः । ज्वलफट् शिरसे स्वाहा । ज्वलिनी फट् शिखायै वषट् । तटकट कवचाय हुँ । हनफट् नेत्राभ्यां वौषट् । सर्वज्वालिनि फडस्त्राय फट् । इत्यङ्गमन्त्राः । वामा, ज्येष्ठा, रौद्री, काली, कलविकरणी, बलविकरणी, बलप्रमथनी, सर्वभूतदमनी मनोन्मन्यः पीठशक्तयः। ओं नमोभगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने इति पीठमन्त्रः । चं इति वीजं मूर्त्तिकल्पनमन्त्रः । ध्यानम्—

चण्डेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशुकाढ्यं हृदि भावयामि।
टङ्कं त्रिशूलं स्फटिकाक्षमालां कमण्डलुं विभ्रतमिन्दुचूडम् ॥

चं चण्डेश्वराय नम इति पूजामन्त्रः । आवरणपूजायाङ्केशरेष्वग्न्यादि-कोणेषु-हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् । दिक्ष्वस्त्रम् । पूर्वादिदलेषु-ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुण्डा, महालक्ष्म्यः । तद्बहिरिन्द्रादीन्, तद्बहिर्वज्रादींश्च पूजयेदिति । ब्राह्म्यादिध्यानं मातृका-सरस्वतीपूजापरिच्छेदे द्रष्टव्यम् । वर्णलक्षत्रयङ्कृतसन्दीक्षो मन्त्री जप्याल्लक्ष-त्रयञ्च मन्त्रमिति प्रपञ्चसारवचनात् ।

लक्षमन्त्रञ्जपेन्मन्त्री होमङ्कुर्याद्दशांशतः ।
मधुरत्रयसंयुक्तै - र्विशुद्धैस्तिल - तण्डुलैः ॥

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजाप्रदीपे
चण्डेशपूजापरिच्छेदः

अथ गायत्रीमन्त्रः

प्रणवाद्या व्याहृतयः सप्त स्युस्तत्पदादिका ।
चतुर्विंशत्यक्षरात्मा गायत्री शिरसा सह ॥
सर्ववेदोद्धृतः सारो मन्त्रोऽयं समुदाहृतः ।

ब्रह्मणा हृदयम्प्रोक्तमिति शारदावचनमत्राङ्गमन्त्रेषु चतुर्थीनमोन्तै-र्यांति । युक्तैर्ब्रह्मादिपदैः षड़ङ्गानीति प्रपञ्चसारटीका । आवरणपूजाया-ङ्कोणेषु त्रिषु सम्पूज्याच्च ब्राह्म्याः शक्तयो वहिः सत्येव शारदायान्तद्वैषम्यं प्रपञ्चसारे इत्याह—"त्रिमूर्त्तिशक्तिः प्रथमं समर्च्येति,, । प्राक्कोणेषु-सावित्री, गायत्री, सरस्वत्यः । अग्निवरुणैशान् दिक्षु ब्रह्मविष्णुरुद्राः पूज्याः, इति तट्टीकायां मनु. । पञ्चमावृत्तावष्टपद्मरूपा अष्टमीशक्तिरिति शारदा । पञ्चमी भद्ररूपा इन्द्रादि । पूजानन्तरञ्च सूर्यपार्षदा । आदित्यपार्षदान्तै-रष्टमीन्द्रादिभिः सुरैरिति तत्रोक्तेः । दीनां पूजयेदिति प्रपञ्चसारः । अथ मन्त्रार्थः—

प्रणवस्तावच्चिन्मन्त्रे हंसोर्लोपे सिद्ध इति सोऽहमित्यर्थकः । भूरिति व्याहृतिर्भू सत्तायामित्यनुसारेण सदर्थिका । स एव मनुनाऽनादितया पारमार्थिकतया च भवत्यस्माद्वियद्विवर्यादिप्रपञ्च इति भवशब्देनोच्यते । स एवान्तर्यामितया सर्वेषां प्रेरकतया सुष्ठु इवायतीति स्वरितिपदप्रतिपाद्यः । तस्यैव चाद्वितीयतया महद्भावेन चैतन्यरूपप्रकाशात्मतया वा महच्छदेन महश्शब्देन वा सिद्ध्या मह इति व्याहृत्याप्रतिपादनम् । स एव च सर्वेषां जीवभावेन व्यवस्थितत्वाज्जनयतीति जनः पदेन बोध्यते । स एव च नियन्ता ईश्वररूपेण सर्वपालकत्वात्प्रलयादौ सर्वसंहर्तृकत्वाच्च तपतीति व्युत्पत्त्या तम् इति प्रतिपाद्यः । तस्यैव च परत्वादित्यस्यैव व्याख्यानं सर्वस्मादित्यादि सत्यत्वे परत्वादात्मत्वादनन्ततो नतु इति हेतुत्रयम् । परत्वात्सर्वस्मादुत्कृष्टपरमानन्दरूपत्वात्तथो आत्मत्वात् ।

रज्वादौ सर्पादिकल्पनायां रज्वादिवत् स्वस्मिन्कल्पितानां सर्वेषां घटपटादीनामनात्मत्वात् स्वरूपत्वात् । तथाऽनन्तज्ञान इत्यस्य व्याख्यानमबाधितत्वादित्यज्ञानतःऽबाधितत्वात्सत्य इत्येनन प्रतिपादनमिति व्याहृत्यर्थः ।

अकारोकारमकारबिन्दुनादशक्तिशान्तरूपाः प्रणवस्य सप्त प्रभेदा भूरादि सप्तव्याहृत्येकार्थाः । अखिलवस्तुसृष्ट्यादिकारणात्तेजोरूपमादित्यमण्डलेऽभिध्येयम् । सदानन्दं परं ब्रह्म हानिरहिततेजोमयतया हिरण्मयाख्यं सद्रूपन्तदित्यनेन प्रतिपाद्यते । वरेण्यमिति वरणीयमित्यर्थः । धिय इति द्वितीयाबहुवचनम् । य इति लिङ्गव्यत्यासेन यदित्यर्थकम् । तथा च यत्सृष्टिकारणत्वादिविशिष्टम् । । सवितुः सर्वेषां प्राणिनां प्रसवितुः देवस्य वृष्टिदानादिगुणयुक्तस्य प्रभूतचित्प्रकाशेन दीप्यमानस्य वा तत्सद्रूपं तेजः सूर्यमण्डले चिन्तनीयम् । हिरण्मयाख्यं परब्रह्मेति यावत् । धीमहि ओङ्कारेण समन्वयात्सोहमिति चिन्तयामः । वरेण्यं सर्वैर्भजनीयं प्रार्थनीयम् । भर्गः पापानां भञ्जकन्नाशकं यः यत् एवम्भूतन्तत् नोऽस्माकं धियो बुद्धीः प्रचोदयात्, परमपुरुषार्थतया प्रेरयतु इति गायत्र्यर्थः ।

अपशब्देन सोमो ज्योतिश्शब्देनाग्निरुच्यते सोमोऽन्नमग्निरत्ता । अन्ना-

च्च भावेन मिलितं रूपं सर्वाधारकं रसः। अमृतमविनाशि ब्रह्म बृहत्। भूर्भुवः स्वरिति व्याहृतिभिः सदानन्दज्ञानान्युच्यन्ते। ओङ्कारश्च सोऽहमित्यर्थकः। तथाच यत्प्रतिपादितरूपं ब्रह्म सोऽहमिति शिरसोऽर्थः। एवमोङ्कारव्याहृत्योः ओङ्कारगायत्र्योरोङ्कारव्याहृतिगायत्रीशिरसाञ्चार्थसङ्गतिर्द्रष्टव्या।

व्याहृतीः सप्त भावाद्या हृन्मुखांसोरुयुग्मके।
जठरे न्यस्य मन्त्रज्ञो गायत्र्यार्णां विशेषतः॥

यत्र द्वयोः स्थानयोरेकवर्णन्यासस्तत्र श्रीकरमन्त्रादौ बहुषु स्थानेषु युग्म इति विधिर्दृश्यते। तथा च युग्ममेव तत्स्थानं लब्ध्वा तनौ न्यसेत्।

पत्सन्धिषु ध्वजे नाभौ हृत्कण्ठभुजसन्धिषु।
आस्यनासाकपोलाक्षि - कर्णभ्रूमस्तके पुनः॥
पाश्चात्योत्तरयाम्यप्रागूर्ध्ववक्त्रेषु साधकः।
पदानि दश विन्यस्येदेषु स्थानेषु मन्त्रवित्॥
शिरोभ्रूमध्यदृग्वक्त्रकण्ठहृन्नाभि - गुह्यके।
जानुनोः पादयोर्युग्मे तच्छिरः शिरसि न्यसेत्॥

इत्यत्र पत्सन्धिषु चत्वारः भुजसन्धिषु चत्वारः नासादिष्वेकैकवर्णो न्यसनीयः। केचित्तु पत्सन्धिषु द्वौ भुजसन्धिषु द्वौ नासादिषु द्वौ द्वौ भ्रुवोरेकवर्णश्च न्यसनीय इत्याहुः। तन्न। नासादिषु द्वयं भ्रुवोरेकमिति विनिगमकाभावात्।

नच भ्रुवोर्वर्णद्वयस्यान्यत्र न्यासस्यानभिधानमेव विनिगमकम्। त्रिपुरामन्त्रे-भूषणन्यासे भ्रुवोर्वर्णद्वयन्यासाभिधानात्। ध्याने तत्त्वात्मवर्णात्मिकामिति तत्र वरेण्यमिति-णि अं इति विभज्य चतुर्विंशतिवर्णता। अतएव शताक्षरे देवस्येत्यन्तैः त्रयोदश वर्णैर्हृदयाङ्गमुक्तम्। ओङ्कारस्य ब्रह्मऋषिर्दैवी गायत्री छन्दः परमात्मा देवता सर्वकर्मारम्भे विनियोगः। सप्तव्याहृतीनाञ्जमदग्निभरद्वाजभृगुगौतमकश्यपविश्वामित्रवशिष्ठा ऋषयो गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तिस्त्रिष्टुब्जगत्यश्छन्दांसि अग्निवाय्वादित्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवता यजुः प्राणायामे विनियोगः।

गायत्र्या विश्वामित्रऋषिर्गायत्रीछन्दः सविता देवता पुरुषार्थचतुष्टये विनियोगः। शिरसो ब्रह्मऋषिर्देवी गायत्रीछन्दः परमात्मा देवता प्राणायामे विनियोगः। सर्वानपि ऋष्यादीन् मस्तकादिषु न्यसेत्। हृदि ओं भूः। मुखे ओं भुवः। अंसयोः-ओं स्वः, ओं महः। ऊर्वोः-ओं जनः ओं तपः। जठरे-ओं सत्यम्। इति व्याहृतिन्यासः।

पादयोः सन्धिचतुष्टययोः तत्सवितुः। भृजेर्ण। नाभौ-रे। हृदि-णि। कण्ठे अं। भुजयोः सन्धिचतुष्टययोः-भर्गोदेव। मुखे-स्य। नासापुटयोः धी। गण्डयोः-म। नेत्रयोः-हि। कर्णयोः-धि। भ्रुवोः-यो। मस्तके यो। पश्चिममुखे-नः। उत्तरमुखे-प्र। दक्षिणमुखे चो। पूर्वमुखे द। ऊर्ध्वमुखे यात्। इति वर्णन्यासः। अथ पदन्यासः –

शिरसे-तत्। भ्रूमध्ये-सवितुः। दृशोः वरेण्यम्। मुखे-भर्गः। कण्ठे-देवस्य। हृदि-धीमहि। नाभौ-धियः। गुह्ये-यो। जानुनोः-नः। पादयोः-प्रचोदयात्। इति न्यसेत्। शिरसि-आपोज्योतिरित्यादि शिरः विन्यस्य कराङ्गन्यासं कुर्यात्। तत्र षड्ङ्गमन्त्राः-ब्रह्मणे हृदयाय नमः। विष्णवे शिरसे स्वाहा। रुद्राय शिखायै वषट्। ईश्वराय कवचाय हुम्। सदाशिवाय नेत्रत्रयाय वौषट्। सर्वात्मने अस्त्राय फट्। इति।

त्रिकोणकर्णिकं मण्डलं पूजायन्त्रम्। रं दीप्ता, रीं-सूक्ष्मा। रां जया। रें-भद्रा। रैं-विभूति। रों-विमला। रौं-अमोघा। रं विद्युता। रः सर्वतोमुखी। एताः सबीजपीठशक्तयः। ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठात्मने नम इति पीठमन्त्रः। ध्यानम्—

मुक्ताविद्रुमनीलहेमधवलच्छायैर्मुखैस्त्रीक्षणैः
मुक्ताविन्दुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम्।
सावित्रीं वरदाङ्कशाभयकरीं शुभ्रङ्कपालं गुणं
शङ्खञ्चक्रमथारविन्दयुगलं हस्तैर्वहन्तीम्भजे ॥

अत्र दक्षिणवामक्रमेण वराभयादि ध्येयमिति। आवरणपूजायाम्—

त्रिकोणस्य कोणेषु ब्राह्मी, वैष्णवी, कौमारी, रौद्री । तद्बहिष्कर्णिकायां पूर्वादिदिक्चतुष्टये-आं आदित्याय नमः । रं रवये नमः । भां भानवे नमः । भां भास्कराय नम । आग्नेयादिकोणेषु-उं उषायै, प्रं-प्रभायै, सं सन्ध्यायै नमः । केशरेष्वग्न्यादिकोणेषु—हृदयशिरः शिखाकवचानि । अग्रे नेत्रम् । दिक्षु अस्त्रम् । दलमूलेषु-प्रह्लादिनी, प्रभा, नित्या, विश्वम्भरा, विलासिनी, प्रभावती, जया, शान्तिः । दलमध्येषु – कान्ता, दुर्गा, सरस्वती, विद्या, रूपा, विशाला, ईशा, व्यापिनी, विमलाः । दलाग्रेषु--तमोपहारिणी, सूक्ष्मा, विश्वयोनि, जयावहा, पद्मालया, परा, शोभा, पद्मरूपाः, । तद्बहिः ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, इन्द्राणी चामुण्डा, महालक्ष्म्यः । अग्रेऽरुणम् । तद्बहिः ग्रहान् । तद्बहिरिन्द्रादीन् । तद्बहिर्वज्रादींश्च पूजयेदिति ।

प्राणायामान् पुरा कृत्वा गायत्रीसन्ध्ययोर्यजेत् ।
सप्तव्याहृतिसंयुक्तां गायत्रीं शिरसान्विताम् ॥
त्रिरुच्चरणन्धिया प्राणान् धारयेद्यतमानसः ।
प्राणायामोऽयमाख्यातः समस्तदुरितापहः ॥
व्याहृतित्रयसंयुक्तां गायत्रीन्दक्षिणतो जपेत् ।
तत्त्वलक्षं विधानेन भिक्षाशी विजितेन्द्रियः ॥
क्षीरोदनन्तिलान्दूर्वाक्षीरद्रुमसमिद्वरान् ।
पृथक् सहस्रत्रितयं जुहुयान्मन्त्रसिद्धये ॥

प्रपञ्चसारे तु—

जुहुयात्पायसघृततिलदूर्वाभिः क्षीरतरुसमिद्भिः ।
एकैकं त्रिसहस्रं मन्त्री समभीष्ट - सिद्धये ।

सुक्तयं इति घृतमप्यधिकमुक्तम् । तच्च युक्तम् । तथा सति हि चतुर्विंशतिसहस्राणि होमो भवतीति ।

इति श्रीभवानन्दरायकारिते श्रीगोविन्दकृते पूजाप्रदीपे
गायत्रीपूजापरिच्छेदः

अथ विष्णुमन्त्रा:

तत्र सर्वमन्त्रसाधारणो केशवादितत्त्वन्यासौ। तयोः केशवादि न्यासे क्रमदीपिकामतेऽपि अं केशवकीर्त्तिभ्यां नम इत्यादि मन्त्रान् केचिन्मन्यन्ते, तदयुक्तम्। वर्णानुक्त्वा सार्द्धचन्द्रान् पुरस्तान्मूर्त्तिः शक्तीङेवसाना नतिञ्चोक्त्वा न्यस्येत्यादिभिः सप्तधातून-प्राणम्, जीवम्, क्रोधमप्यात्मनेऽनन्तापीत्यत्र ङेवसान इति वचनात्। नच तच्चतुर्ह्युपलक्षणम्। शक्ये बाधकाभावात्।

किञ्चात्मनेऽनन्तान्सप्तधातुन् न्यस्येदित्येव प्राप्तस्य त्वगात्मने इत्यादि भागस्य पुरुषोत्तमवासुदेवाभ्यामित्यादि भागेनान्वयः स्यात्।

नच त्वगात्मन इत्यस्य न तद्विशेषणतेति वाच्यम्। तस्य नित्यं विशेष्यसाकाङ्क्षतया विशेष्यान्तराभावे सन्निहितोत्तरभागप्रतिपाद्यस्यैव तद्विशेष्यत्वात्। अविशेषणत्वेऽपि च तस्यासमस्तत्त्ववन्मूर्त्तिशक्त्योरप्यसमासस्यैवोचितत्वादिति।

तत्त्वन्यासे तु-परमेष्ठ्यादि न्यासे षोपरा बलवल्लैस्सत्यवै रिति पठित्वा षोकारादि वर्णपुरस्सरमेव न्यासम्बदन्ति। अस्मत्सम्प्रदाये तु-षोपरबलवर्णैरिति पाठः। तत्र रपट इत्यनेन च रेफसमीरवर्त्तिनौ यकारलकारौ गृह्येते। तथा च सर्वेषां हलां सङ्ग्रहो भवन्ति।

पूर्वपाठे तु कियतां हलामनुपादानम् कियताञ्च पुनरुपादानं छन्दोभङ्गश्च दूषणानि। अन्यच्च षं नमः पराय वासुदेवादयश्चेति "तत्त्वान्येतानि शार्ङ्गिणः" । इति द्वात्रिंशद्वैष्णवतत्त्वेषु वासुदेवादीनामेव गणनेन तेषामेव तथात्वादिति वदन्ति। तदपि न सम्यक्। तत्रापरिगणितानामप्यहङ्कारलाभाय कोपतत्त्वानां न्यासदर्शनेनास्य पक्षान्तरत्वस्यापि सम्भाव्यत्वात्। तत्पक्षान्तर्भावेऽपि परमेष्ठ्यादीनामेवात्मनेऽनन्तत्वम्। वासुदेवादीनान्तु अनात्मनेऽन्ततयैव न्यासः, तथैव क्रमदीपिकास्वरसात्। तथा हि

> इ[illegible] सर्द्वकपराक्षरम्युपेतम्।
> भूयः पराय स तदा द्वयमात्मने च नात्य तमुद्धरतु तत्त्वममून् क्रमेण॥

इत्युक्त्वा तदा द्वयमित्यनेन प्रतिपादितानि । मासानि न्यासस्थानानि च "सकलवपुषि जीवं प्राणमायोज्य मध्य" इत्यादि ग्रन्थेनोक्ता । अथ परमेष्ठिपुमांसौ विश्वनिवृत्ती च शर्वं इत्युपनिषदः । न्यस्येदाकाशादिस्थानस्थानयोः परबलवर्णैस्सलवैः ।

वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ।
नारायणश्च क्रमशः परमेष्ठ्यादिभिर्युताः ॥

इति वचनेन तादृशप्रक्रमात् सलवैरित्यन्तेन परमेष्ठ्यादीनामेवात्मनेऽन्तत्वपर्याप्तौ वासुदेवादीनां तत्साहित्येन न्यासमात्रं प्रतिपाद्यत इत्येव युक्तम् । नतु वासुदेवादीनामात्मनेऽन्तत्वम् ।

नचैतावता—तत्त्वन्यासत्वभङ्गः । अनात्मनेऽन्ततयाऽपि तन्न्यासस्याक्षतत्वादिति सन्तु वा यन्नमः । पराय वासुदेवाय परमेष्ठ्यात्मने इत्यादय एव कैश्चिद् दूरीकृतास्तन्न्यासमन्त्रा इति । अयं तत्त्वन्यासो विष्णुमंत्रजपादिष्वावश्यकः । "इति कृतेऽधिकृतो भवति ध्रुवं सकलवैष्णवमंत्रजपादिषु,, इति वचनात् ।

अथ केशवादिन्यासः

उद्यत्प्रद्योतन - शतकटिन्तप्तहेमावदात
पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम् ।
नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं
विष्णुं वन्देरथकमलकौमोदकीचक्रपाणिम् ॥

इति ध्यात्वा मातृकान्यासोक्तस्थानेषु-अं केशवाय कीर्त्यैनमः । आं नारायणाय कान्त्यैनमः । इं माधवाय तुष्ट्यैनमः । एँ दामोदराय लज्जायैनमः । ईं॰ गोविन्दाय पुष्ट्यैनमः । उं विष्णवे धृत्यैनमः । ऊं-मधुसूदनाय शान्त्यैनमः । ऋं त्रिविक्रमाय क्रियायैनमः । ॠं वामनाय दयायैनमः । लृं श्रीधराय मेधायै नमः । लॄं हृषीकेशाय हर्षायैनमः । एँ पद्मनाभाय श्रद्धायैनमः । एँ दामोदराय लज्जायैनमः ।

ओं वासुदेवाय लक्ष्म्यैनमः। ओं सङ्कर्षणाय सरस्वत्यैनमः। अं प्रद्युम्नाय प्रीत्यैनमः। अः अनिरुद्धाय रत्यैनमः: कं चक्रिणे जयायैनमः। खं गदिने दुर्गायै नमः। गं शार्ङ्गिणे प्रभायैनमः। घं खड्गिणे सत्यायैनमः। ङं-शङ्खिने चण्डायैनमः। चं-हलिने वाण्यैनमः। छं-मुशलिने विलासिन्यैनमः। जं शूलिने विजयायैनमः। झं-पाशिने विरजायैनमः। ञं अंकुशिने विश्वायैनमः। टं-मुकुन्दाय विनदायैनम.। ठं नन्दजाय सुनन्दायैनमः। डं-नन्दिने स्मृत्यैनमः। ढं नराय ऋद्ध्यै नमः। णं नरकजिते समृद्ध्यै नमः।

तं हरये शुद्ध्यैनमः। थं कृष्णाय तुष्ट्यै नमः। दं सत्याय बुद्ध्यैनमः। धं-साश्वताय सत्यैनमः। नं सौरये क्षमायैनमः। पं-शूराय वसायैनमः। फं-जनार्दनाय उमायैनमः। बं भूधराय-क्लेदिन्यैनमः। भं विश्वमूर्त्तये क्लिन्नायैनमः। मं-वैकुण्ठाय वसुधायैनमः। यं त्वगात्मने पुरुषोत्तमाय वासुदेवायनमः। रं-अमृतात्मने बलिने परायै नमः। लं-मांसात्मने बलानुजाय परायणायैनमः। बं-भेदात्मने बलाय सूक्ष्मायैनमः। शं अस्थ्यात्मने बृषघ्नाय सन्ध्यायैनमः। षं-मज्जात्मने बृषाय प्रज्ञायैनमः। सं शुक्रात्मने हंसाय प्रभायैनमः। हं-प्राणात्मने वराहाय निशायै नमः। लं जीवात्मने विमलाय अमोघायैनमः। क्षः-क्रोधात्मने नरसिंहाय विद्युतायैनमः। एवं विन्यस्य श्रीबीजपूर्वकान्विन्यसेत्। यथा – श्रीं अं केशवाय कीर्त्यैनम इत्यादि। अथ तत्त्वन्यासः —

मंनमः पराय जीवात्मने नमः। भंनमःपराय प्राणात्मने नम इतिद्वयं सकलवपुषि। हृदि - बं नमः पराय सत्वात्मने नमः। फंनमः परायाहङ्कारात्मने नमः। पंनमःपराय सत्वात्मनेनमः। शिरसि - नंनमःपराय शब्दात्मने नमः। मुखे - धंनमः परायस्पर्शात्मने नमः। हृदि दंनमः पराय रूपात्मने नमः। गुह्ये-थंनमः पराय वसात्मनेनमः। पादयोः तंनमः पराय गन्धात्मने नमः। कर्णयोः णंनमःपराय श्रोत्रात्मनेनमः। त्वचि - ढं नमः पराय त्वगात्मने नमः। चक्षुषोः डं नमःपराय चक्षुरात्मनेनमः। रसनायाम् ठं नमःपराय रसनात्मनेनमः। नासायाम्-टंनमःपराय घ्राणात्मने नमः। मुखे - ञंनमःपराय रागात्मनेनमः। हस्तयोः झं नमःपराय पाण्यात्मने नमः।

पादयोः जंनमःपराय पादात्मने नमः। गुह्ये - छंनमः पराय पाय्वात्मने नमः। लिङ्गे-चं नमःपरायोपस्थात्मने नमः। शिरसि ङं नमः परायाकाशात्मने नमः।

मुखे - घं नमः पराय वाय्वात्मने नमः। हृदि -गन्नमःपराय तेजसे आत्मने नमः। लिङ्गे खन्नमः पराय जलात्मने नमः। पादयोः कन्नमः पराय पृथिव्यात्मने नमः। हृदि - शंनमः पराय हृत्पुण्डरीकात्मने नमः। हं नमः पराय द्वादशकलाव्याप्तसूर्यमण्डलात्मने नमः। सन्नमः पराय षोडश-कलाव्याप्तचन्द्रमण्डलात्मने नमः। रं नमःपराय दशकलाव्याप्तवह्निमण्ड-लात्मने नमः। शिरसि षण्नमः पराय परमेष्ठ्यात्मने वासुदेवायनमः। मुखे यन्नमः पराय पुरुषात्मने सङ्कर्षणाय नम। हृदि - नं नमः पराय विश्वात्मने प्रद्युम्नाय नमः। लिङ्गे - वं नमः पराय निवृत्यात्मने अनिरुद्धाय नमः। पादयोः लंनमः परायसर्वात्मने नारायणाय नमः। सर्वाङ्गेषु - क्षौंनमः पराय तत्त्वात्मने नृसिंहाय नमः

अथ नारायणमन्त्रः

तावन्नमःपदं ब्रूयान्नरो दीर्घसमन्वितौ।
पवनोनाय मन्त्रोऽयं प्रोक्तो वस्वक्षरात्मकः॥

अत्र षड्भिर्मन्त्रवर्णैः षडङ्गानि। शिष्टवर्णानां पृष्ठयोर्न्यासमात्रमिति शारदा। प्रपञ्चासारे स्वष्टभिर्वर्णैरष्टाङ्गान्येवोक्तानि। वर्णन्यासपूर्वं दिग्बन्धने बद्धदिक्चक्रमन्त्रेणेति शारदा। अस्त्रमन्त्रप्रबद्धाश इति प्रपञ्चसारः। किरीटमन्त्रे च-गदाम्भोजेत्यत्र गदाब्जेति साग्निज्योतिरिति स्थाने स्वात्मज्योति-रिति सहस्रादित्यवर्चस इति स्थाने सहस्रादित्यतेजस इति च प्रपञ्चसार-पाठः। तदेतेषां विकल्प एव। मूर्त्तिपञ्जरन्यासे द्वादशादित्यसहिता मूर्त्ति-र्द्वादश विन्यसेत। ललाटे केशवद्धात्रे त्यादि शारदावचनेष्वादित्यानाङ्केशवादि-युगषट्कमूर्त्तिभिर्वा त्रिपूर्वमिहिरान्तमोन्तकानिति क्रमदीपिकावचने केशवादि-विष्णुमूर्त्तीनामेव सहयोगदर्शनं त्।

ओं अं धातृसहितकेशवाय नम इति वा, ओं अं केशवसहितधात्रे नम इति वा मन्त्र, इति न युक्तम्। वैष्णवजपादौ तन्मूर्त्तेरप्राधान्यस्यानौचित्यात्। तस्मात्क्रमदीपिकावचनं साहित्येनोभयन्यासमात्रतात्पर्यकम्। नत्वेकस्याप्यप्राधान्यतात्पर्यकम्।

तथाच-ओं अं केशवधातृभ्यान्नम इत्यादय एव तन्मते मन्त्रः। सन्तु वा धातृसहितकेशवाय नम इत्यादय इति। ध्याने दक्षिणाधोहस्तमारभ्य प्रादक्षिण्येन शङ्खपद्मगदाचक्राणि ध्येयानि। नारायणमूर्त्तौ तथैव स्कन्दपुराणादिषु शङ्खादिप्रतिपादनात्। तथाच स्कन्दपुरोणोक्तार्थसङ्ग्राहकश्लोकः।

शंखं गोपीशपद्मञ्च शंखचक्रं शरोधरम्।
शंखपद्मं शरं पञ्च शंखाद्याः षट् प्रदक्षिणाः॥

तथा चोर्ध्वदक्षिणहस्तमारभ्य शङ्खादीनां चतुर्णां विन्यासषट्केन केशवमेधुसूदनसङ्कर्षणदामोदरवामनप्रद्युम्नाः षण्मूर्त्तयः। एवं वामोर्ध्वहस्तमारभ्य गोविन्दत्रिविक्रमविष्णुमाधवानिरुद्धपुरुषोत्तमाधोक्षजजनार्दनाः। अधोवामहस्तमारभ्य - गोविन्दत्रिविक्रममाधवहृषीकेशनृसिंहाच्युताः। अधो दक्षिणहस्तमारभ्य - वासुदेवनारायणपद्मनाभोपेन्द्रहरिकृष्णमूर्त्तयो भवन्तीति। मन्त्रवर्णन्यासे दोःपादसन्ध्यङ्गुलीष्वित्यत्र मूलवर्ज्जं दोःपादसन्धित्रयं ग्राह्यम्। मूले आवृत्त्यन्तर एव न्यासाभिधानाच्च, ननु त्यागे वीजाभावः। अतः दोःपादसन्ध्यङ्गुलीष्वावृत्तिद्वयं भवति, अन्यथा तु व्यवस्थैव दुर्घटा।

अस्य मन्त्रस्य साध्यनारायणऋषिर्देवी गायत्रीछन्दो नारायणो देवता पुरुषार्थचतुष्टये विनियोगः। क्रुद्धोल्काय हृदयाय नमः। महोल्काय शिरसे स्वाहा। वीरोल्काय शिखायै वषट्। द्युल्काय कवचाय हुँ। सहस्रोल्कायास्त्राय फट्। इति पञ्चाङ्गमन्त्राः। एतैः कराङ्गन्यासं विधाय पुनः षड़ङ्गन्यासङ्कुर्यात्। तत्र मन्त्राः-ओं हृदयाय नमः। न शिरसे स्वाहा। मों शिखायै वषट्। नां कवचाय हुँ। रां नेत्राभ्यां वौषडिति हृदयादिषु विन्यस्य नां कुक्षौ, यं पृष्ठे, न्यसेत्। प्रपञ्चसारमते तु नां कुक्षये नमः। यं पृष्ठाय नम इति कुक्षिपृष्ठयोर्वर्णद्वयन्यासः।

ततः ओं सहस्रारङ्ग फट्, इति मन्त्रेण दिशो बध्वा-ओं इति आघोर॰ हृदि न । मुखे-मो । बाहुमुलयोः नारा । पदलमूलयोः-यणा, नाभौ-य । कण्ठे-ओं । नाभौ न । हृदि-मो । कुक्षयोः-नारा । पार्श्वयोः-यणा । पृष्ठे-य । शिरसि-ओं । मुखे-न । नेत्रयोः-मोना । श्रवणयोः-राय । नासापुटयोः-णाय । दक्षिणबाहु-कफोणिकेत्यादि-सन्धित्रयाङ्गुलीषु ओंनमोना । वामबाहुसन्धित्रयाङ्गुलीषु रायणाय । वामपादसन्धित्रयाङ्गुलीषु-ओंनमोना। दक्षिणपादसन्धित्रयाङ्गुलीषु-रायणाय । हृदि त्वचि ओं । असृजि-ना । मांसे-मो । मेदसि ना । अस्थिनि रा । मज्जायाम्-य । शुक्रे-णा । प्राणेषु य । शिरसि-ओं । नयनयोः-न । मुखे-मो । हृदि-ना । कुक्षौ रा । उर्वोः य । जङ्घयोः णा । पादद्वये य । गण्डयोः ओं । अंशयोः न । उर्वोः मो । चरणयो. ना । चक्रस्थाने रा । शंखस्थाने य । गदास्थाने णा । पद्मस्थाने य । इत्यष्टावृत्या मन्त्रवर्णान्विन्यस्य विष्णुपञ्जरन्यास—ङ्कुर्यात् । यथा—ललाटे ओं अं धातृसहितकेशवाय नमः । ओं अं केशवधातृ—भ्यां नम इति वा । एवमग्रेऽपि । उदरे-न । आं अर्यमासहितनारायणय नमः । हृदि मो । इं-मित्रसहित माधवाय नमः । गलकूवरे-भ इं वरुणसहितगोविन्दाय नमः । दक्षिणपर्श्वे-ग । उं अंशुसहितविष्णवे नमः । दक्षिणांशे-व । ऊं भगसहित॰ मधुसूदनाय नमः । दक्षिणगले-ते, एं विवस्वतसहित त्रिविक्रमाय नमः । वाम-पार्श्वे वा, ऐं इन्द्रसहितवामनाय नमः । वामांशे-सु । ओं पूषासहितश्रीधराय नमः । वामगले-दे । ओं पर्यन्यसहितहृषीकेशाय नमः । पृष्ठे-रा अं त्वष्टृसहित-पद्मनाभाय नमः ककुदि य । अः विष्णसहितदामोदराय नमः । मूर्घ्नि द्वादशा-क्षरं न्यसेत् ।

ततः ओं किरीट-केयूरहारमकरकुण्डलचक्रशंखगदाम्भोजहस्तपीताम्बर श्रीवत्साङ्कितवक्षःस्थलश्रीभूमिसहितसाग्निज्योतिद्वयदीप्तिकराय सहस्रा—दित्यवर्च्चसे नम इति किरीटमन्त्रेण व्यापकं कुर्यात । विमलोत्कर्षिणीज्ञाना-क्रियायोगाप्रह्वीसत्यैशानानुग्रहाः पीठशक्तयः । ओं नमो भगवते विष्णवे सर्वभूता॰त्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः ।

ध्यानम्—उद्यत्कोटिदिवाकराभमनिशं शङ्खङ्गदां पङ्कजं
चक्रम्विभ्रतमिन्दरावसुमती - संशोभिपार्श्वद्वयम् ।

कोटीराङ्गदहारकुण्डलधरं पीताम्बरं कौस्तुभो-
द्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे ॥

शङ्खचक्रे ऽधोदक्षिणवामहस्तयोः, पद्मगदे ऊर्ध्वयोर्दक्षिणवामहस्तयो-र्ध्यातव्ये । आवरणपूजायाङ्कर्णिकायामग्न्यादिकोणेषु - हृदयशिरःशिखा-कवचानि । दिक्ष्वस्त्रम् । पूर्वादिकेशरेषु-ओङ्कारायनम इत्यादिमन्त्रैः मन्त्र-वर्णाष्टकम । पूर्वादिदिग्दलचतुष्टये-वासुदेव, सङ्कर्षण, - प्रद्युम्नानिरुद्धान् । अग्न्यादिविदिग्दलेषु शान्ति, सरस्वती, रतयः । दलाग्रेषु-चक्र, शङ्ख, गदा, पद्म, कौस्तुभ, मुशल, खड्ग, बनमालाः । तद्बहिरग्रे गरुड़म् । दक्षिणपार्श्वे शङ्खनिधी । वामपार्श्वे-पद्मनिधी । पश्चाद् ध्वजम् । देवापेक्षया पारि-भाषिकाग्नेयादिकोणेषु-विघ्नार्यदुर्गासेनान्य । तद्बहिरिन्द्रादीन् । तद्बहि-स्तदस्त्राणि च पूजयेत् । अथावरणध्यानम्—

हिमपीततमालेन्दुनीलाभाः पीतवाससः चक्रशङ्खगदाम्भोजधरा वासुदे-वाद्याः । श्वेतकाञ्चनगोदुग्धदूर्वावर्णाः शान्त्यादयः । रक्तश्वेतपीतकनकाभश्याम-कृष्णासितपाण्डुरानि चक्रादीनि । रक्तो गरुडः । मुक्तामाणिक्यरुची-शङ्ख-पद्मनिधी । ध्वजः श्यामः । अरुणश्यामपीता विघ्नाद्या ध्येयाः ।

विकारलक्षं प्रजपेत् मन्त्रमेनं समाहितः ।
तद्दशांशं सरसिजैर्जुहुयान्मधुराप्लुतैः ॥
प्रणवो हृद्भगवते वासुदेवाय कीर्त्तितः ।
प्रधानं वैष्णवे तन्त्रे मन्त्रोऽयं द्वादशाक्षरः ॥

अस्य मन्त्रस्य प्रजापतिऋषिर्गायत्रीछन्दो वसुदेवो देवता पुरुषार्थ-चतुष्टये विनियोगः । ओं हृदयाय नमः । नमः शिरसे स्वाहा । भगवते शिखायै वषट् । वासुदेवाय कवचाय-हुं । ओं नमो भगवते वासुदेवाय अस्त्राय फट् । इत्यङ्गमन्त्राः । अथ मन्त्रवर्णन्यासः— शिरसि ओं । भाले-न । नेत्रयोः मो । मुखे-भ । गले-ग । वाह्वोः-व । हृदि-ते । उदरे-वा ।

नाभौ-सु। ध्वजे-दे। जानुनोः-वा। पदद्वये-य। इति न्यसेत्। प्रथममष्टदलम्। ततो द्वादशदलं पद्मं पूजायन्त्रम्। विमलोत्कर्षिणी, ज्ञाना, क्रिया, योगा, प्रह्वी सत्या ईशानानुग्रहाः पीठशक्तयः। ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः। ध्यानम्—

विष्णुं शारदचन्द्रकोटिसदृशं शङ्खं रथाङ्गंदा-
मम्भोजन्दधत सिताब्जनिलयं कान्त्या जगन्मोहनम्।
आरब्धाङ्गदहारकुण्डलमहामौलिस्फुरत्कङ्कणं
श्रीवत्साङ्कमुदारकौस्तुभधरं वन्दे मुनीन्द्रैः स्तुतम्॥

अत्राधोदक्षिणहस्तमारभ्य प्रदक्षिणक्रमेण शङ्खादिचतुष्टयं ध्येयम् तत्प्रमाणमुक्तं नारायणमन्त्रप्रकरणे। आवरणपूजायां केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि। दिक्ष्वस्त्रम्। पूर्वादिदिग्दलेषु वासुदेव, सङ्कर्षण, प्रद्युम्नानिरुद्धान्। अग्न्यादिविदिग्दलेषु शान्ति, सरस्वती, रतयः। तद्बहिः केशव, नारायण, माधव, गोविन्द, विष्णु, मधुसूदन, त्रिविक्रम, वामन, श्रीधर, हृषीकेश, पद्मनाभ, दामोदरान्। तद्बहिर्लोकपालान्। तद्बहिस्तदस्त्राणि च पूजयेदिति। वासुदेवादिध्यानमष्टाक्षरमन्त्रे द्रष्टव्यम्।

वर्णलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः।
तत्सहस्रं प्रजुहुयात्तिलैराज्य-परिप्लुतैः॥

हृल्लेखाबीजयुगलं रमाबीजयुगं पुनः।
लक्ष्यन्ते वासुदेवाय हृदन्तः प्रणवादिकः॥

चतुर्दशाक्षरैः प्रोक्तो मन्त्रोऽयं सुरपादपः॥

अस्य लक्ष्मीवासुदेवमन्त्रस्याङ्गमन्त्रध्याने विहाय सर्वं द्वादशाक्षरवत्। तत्रत्यश्च वर्णन्यासोऽत्र न विधेयः, तन्मन्त्रासाधारणत्वात्। अङ्गमन्त्रास्तु— ओं ह्रीं ह्रीं हृदयाय नमः। ओं श्रीं श्रीं शिरसे स्वाहा। ओं लक्ष्मी शिखायै वषट्। ओं वासुदेवाय कवचाय हुम्। ओं नम अस्त्राय फट्। ध्यानम्—

विद्युच्चन्द्रनिभं वपुः कमलजावैकुण्ठयोरेकतां
प्राप्तं स्नेहवशेन रत्नविलसद्भूषाभवालंकृतम्।
विद्यापङ्कजदर्पणान्मणिमयं कुम्भं सरोजङ्गदां
शंखं चक्रमसूनिविभ्रदसितां दिश्याच्छ्रियम्वस्सदा ॥

अत्र विद्यादिचतुष्टयं वामहस्तेषु, सरोजादिकन्दक्षिणहस्तेषु।

वर्णलक्षञ्जपेदेनं तत्सहस्रं सरोरुहैः।
होमङ्कुर्याद्विकशितैर्मधुरत्रय—संयुतैः॥
तारो हृद्विष्णवे पश्चात् ङेन्तः सुरपतिर्भवेत्।
महाबलाय च द्वन्द्वं मनुरष्टादशाक्षरः॥
मूर्ध्नि भाले दृशोर्युग्मे कर्णयुग्मौष्ठतालुषु।
कण्ठे बा हृदये पश्चाद्धृदयोदरनाभिषु॥
गुह्योरुजानुयुग्मेषु जङ्घयोः पादयोर्न्यसेत्।

इति मन्त्रवर्णन्यासे नेत्रादिषु जान्वन्तेषु युग्मावयवेष्वेकैकमेवाक्षरं न्यसनीयम्। जङ्घयोः पादयोश्च द्वे द्वे, दृशोर्युग्म इत्यादिना पूर्वेषां सर्वेषामपि युग्मतयैव न्यासस्थानताऽभिधानात्। अन्त्ययोस्तुः जङ्घयोः पादयोर्न्यसेदित्येवाभिहितत्वात्। अतो न विनिगमकान्तरस्याभावेन स्थानाधिक्यमिति। आवरणपूजायां-अभ्यर्च्य वासुदेवादीन् ध्वजादीनर्च्चयेत् ततः। इत्यत्र विष्णोर्गरुडध्वजतया ध्वजशब्देन गरुड उच्यते। यद्वा आदिशब्दः प्रकारवाची। प्रकारश्च-सादृश्यम्। ध्वजेनावरणविशेषोक्तत्वमेव। तेनाष्टाक्षरोक्त-गरुडाद्यष्टकविवरणं लभ्यते। ध्वजाद्यावरणन्तु न क्वचिदप्युक्तमिति ऋजुरर्थो नादरणीयः। नच गरुडादित्रयम्बिहाय ध्वजादिपञ्चकेनैवावरणमिति युक्तम्। अस्य मन्त्रस्येन्द्रुऋषिर्विराट्छन्दोऽधिवामनोदेवता विभूत्याद्यभीष्ट सिद्धौ विनियोगः। ओं हृदयाय नमः। नमश्शिरसे स्वाहा। विष्णवे शिखायै वषट्। सुरपतये कवचाय हुम्। महाबलाय नेत्राभ्यां वौषट्। स्वाहा अस्त्राय फट्। इत्यङ्गमन्त्राः।

अथ वर्णन्यासः शिरसि-ओं। भाले-न। नेत्रयोः-मो। कर्णयोः-वि। ओष्ठे-ष्ण। तालुनि-वे। कण्ठे-सु। भुजयोः-र। हृदि-प। उदरे-त। नाभौ-ये। गुह्ये-म। उर्वोः-हा। जानुनोः-ब। जङ्घयोः दक्षिण-वामक्रमेण-लाय। पादयोः-स्वाहा। अष्टदलन्द्वादशदलान्तःस्थितं पद्मं पूजायन्त्रम्। चन्द्रमण्डलान्ताः पीठदेवतास्सम्पूज्य पीठशक्तीः पूजयेत्। ताश्च विमलोत्कर्षिणी, ज्ञाना, क्रिया, योगा, प्रह्वी, सत्येशानानुग्रहाः। ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः। ध्यानम् –

मुक्तागौरं नवमणिलसद्भूषणं चन्द्रसंस्थं
भृङ्गाकारैरणकनिकरैः शोभिवक्त्रारविन्दम्।
हस्ताब्जाभ्यां कनककलशं शुद्धतोयाभिपूर्णं
दध्यान्नाढ्यं कनकचषकं धारयन्तं भजामः॥

अत्र चषकं दक्षिहस्ते चिन्तयेत्। आवरणपूजायां केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि। अग्रे नेत्रम्। दिक्ष्वस्त्रम्। दिग्दलचतुष्टये वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धान्। आग्नेयादिकोणेषु-शान्ति-सरस्वती-रतयः। दलाग्रेषु-गरुडम्। दक्षिणवामपार्श्वयोः-शङ्ख, पद्मनिधी। पश्चात्-ध्वजम्। देवाग्नेयादिकोणेषु-विघ्नार्यदुर्गा-सेनान्यः। तद्बहिः द्वादशदलाग्रेषु केशव, नारायण, माधव, गोविन्द, विष्णु-मधुसूदन, त्रिविक्रम, वामन श्रीधर, हृषीकेश, पद्मनाभ, दामोदरान्। तद्बहि-र्लोकपालान्। तद्बहिस्तदस्त्राणि। तद्बहिरैरावत, पुण्डरीक, वामन, कुमुदा-ञ्जन, पुष्पदन्त, सार्वभौम, सुप्रतीकान् गजान्पूजयेत्। वासुदेवादीनाङ्गरुडा-दीनाञ्च ध्यानमष्टाक्षरमन्त्रे द्रष्टव्यम्।

गुणलक्षं जपेन्मन्त्रं तद्दशांशं घृतप्लुतैः।
पायसान्नैः प्रजुहुयाद्दध्यन्नैर्वा यथाविधि॥
वह्निवत्पदमाभाष्य प्रणवोङ्गाथ शब्दतः।
सर्ववागीश्वरेत्यन्ते प्रवदेदीश्वरे त्वथ॥

सर्ववेदमयाचिन्त्यपदान्ते सर्वमुच्चरेत् ।
बोधयद् द्वितयान्तोऽयं मन्त्रस्तारादिरीडितः ॥

अस्य मन्त्रस्य ब्रह्माऋषिरनुष्टुप्छन्दो हयग्रीवो देवता वागैश्वर्याद्यभीष्टसिद्धौ विनियोगः । ओं हृदयाय नमः । वह्निवत्प्रणवोङ्गाथ शिरसे स्वाहा । सर्ववागीश्वरेश्वरशिखायै वषट् । सर्ववेदमयाचिन्त्य कवचाय हुम् । सर्वम्बोधयबोधयास्त्राय फट् । इति पञ्चाङ्गमन्त्राः । विमलोत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानानुग्रहाः पीठशक्तयः । ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः । हुँ इति वीजं मूर्तिकल्पनमन्त्रः । ध्यानम्—

शरच्छशाङ्कप्रतिमञ्च वक्त्रं मुक्तामयैराभरणैरुपेतम् ।
रथाङ्गशङ्खाञ्चितबाहुयुग्मं जानुद्वयन्यस्तकरम्भजामः ॥

ऊर्ध्वहस्तयोश्चक्रशङ्खौ । अधोहस्तौ तु जानुन्यस्तौ ध्येयौ । आवरणपूजायां केशरेषु पूर्वादिदिक्षु ऋग्वेद, यजुर्वेद, सामवेदाथर्ववेदान् । आग्नेयादिविदिक्केशरेषु-वेदाङ्गस्मृतिन्यायसर्वशास्त्राणि । पत्रेष्वाग्नेयादिकोणेषु हृदयशिरःशिखाकवचानि । दिक्ष्वस्त्रम् । तद्बहिर्लोकपालान् । तद्बहिस्तदस्त्राणि च पूजयेदिति ।

वर्णलक्षं जपेन्मन्त्रं कुन्दपुष्पैः मधुप्लुतैः ।
दशांशं वैष्णवे वह्नौ जुहुयान्मन्त्रसिद्धये ॥
अनन्तोग्न्यासनः सेन्दुर्बीजं रामायहृन्मनुः ।
षडक्षरोऽयमादिष्टो भजताङ्कामदो मणिः ॥

अस्य मन्त्रस्य ब्रह्माऋषिर्गायत्रीछन्दो श्रीरामो देवता धनाद्यभीष्टार्थसिद्धौ विनियोगः । रां हृदयाय नमः । रिं शिरसे स्वाहा । रीं शिखायै वषट् । रैं कवचाय हुँ । रौं नेत्रत्रयाय वौषट् । रः अस्त्राय फट् । इति षडङ्गमन्त्राः । कराङ्गन्यासानन्तरं मन्त्रवर्णन्यासः ।

यथा—ब्रह्मरन्ध्रे-रां। भ्रूमध्ये-रा। हृदि-मा। नाभौ-य। लिङ्गे-न। पादयोः-मः। विमलोत्कर्षिणीज्ञानाक्रियायोगा-प्रह्वी-सत्येशानुग्रहाः पीठशक्तयः। ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः। ध्यानम्—

कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासिनं
मुद्राज्ञानमयीन्दधानमपरं हस्ताम्बुजं जानुनि।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तम्मुकुटाङ्गदादि विविधाकल्पोज्ज्वलाङ्गम्भजे॥

आवरणपूजायां पार्श्वे-श्रीं सीतायै नम इति मन्त्रेण सीतामग्रे वामदक्षिणपार्श्वयोः शार्ङ्गपाणिश्च। तद्बहिः केशरेष्वग्न्यादिकोणेषु-हृदयशिरःशिखा—कवचानि। अग्रे नेत्रम। दिक्ष्वस्त्रम्। देवस्याग्रदलमारभ्य प्रादक्षिण्येन दलेषु हनुमत्सुग्रीव, भरत, विभीषण लक्ष्मणाङ्गदशत्रुघ्नजाम्बवन्तः। अग्रादिदलाग्रेषु सृष्टि, जयन्त, विजय, सुराष्ट्र, राष्ट्रवर्द्धन, अकोप धर्मपाल, सुमन्तून्। तद्बहिस्तदस्त्राणि च पूजयेत्। अत्र हनुमदादिध्यानम्—

वाचयन्तं हनुमन्तमग्रतो धृतपुस्तकम्।
यजेद्भरतशत्रुघ्नौ पार्श्वयोर्धृतचामरौ॥
धृतातपत्रं हस्ताभ्यां लक्ष्मणं पश्चिमे यजेत।
वर्णलक्षं जपेन्मन्त्रं दशांशं कमलैः शुभैः।
जुहुयादर्चिते वह्नौ ब्राह्मणान्तो यजेत्ततः॥
तारं नमो भगवते वरदपदमीरयेत्।
रूपाय भूर्भुवः स्वः स्यात् शतये तदनन्तरम्॥
भूपतित्वंसे पदान्ते देह्यन्ते च ददापय।
वह्निजायावधिर्मन्त्रः स्यात्त्रयस्त्रिंशदक्षरः॥

अस्य मन्त्रस्य भार्गवऋषिरनुष्टुप्छन्द आदिवराहो देवता भूम्याद्यभीष्टसिद्धौ विनियोगः। एकदंष्ट्राय हृदयाय नमः। व्योमोल्काय शिरसे स्वाहा। तेजोधिपतये शिखायै वषट्। विश्वरूपाय कवचाय हुँम्। महादंष्ट्राय अस्त्राय फट्।

इति पञ्चाङ्गमन्त्राः । विमलोत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्या - ईशानानुग्रहाः पीठशक्तयः । ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः । ध्यानम् —

आपादं जानुदेशाद्वरकनकनिभं नाभिदेशादधस्तान्
मुक्ताभं कण्ठदेशात्तरुणरविनिभं मस्तकान्नीलभासम् ।
ईडे हस्तैर्दधानं रथचरणदरौ खड्गखेटौ गदाभ्यां
शक्तिं दानाभये च क्षितिधरणलसदस्त्रमाद्यं वराहम् ॥

उपरि हस्तयोश्चक्रशङ्खौ । तदधोऽधः द्वौ द्वौ च ध्यातव्यौ । आवरणपूजायां केशरेषु पूर्वादिदिक्चतुष्टये-हृदयशिरःशिखाकवचानि । अग्न्यादि—कोणचतुष्टये अधस्तादूर्ध्वञ्चास्त्रम् । पूर्वादिपत्रेषु चक्र, शङ्ख, खड्गखेटक, गदा, शक्ति, वराभयानि । तद्बहिर्लोकपालान् । तद्बहिस्तदस्त्राणि च पूजयेदिति ।

लक्षमेनं जपेन्मन्त्रं मधुराक्तैः सरोरुहैः ।
जुहुयात्तद्दशांशेन पीठे विष्णोः प्रपूजनम् ॥
अथाभिधारयेद्विधिवन्नारसिंहं महामनुम् ।
उग्रं वीरं वदेत्पूर्वं महाविष्णुमनन्तरम् ॥
ज्वलन्तं पदमाभाष्य सर्वतो मुखमीरयेत् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं वदेत्ततः ॥
नमाम्यहमयं प्राक्तो मन्त्रराजः सुरद्रुमः ।

अत्र वर्णन्यासेऽपरांशे ककुदि चेदित्यापरांशे पृष्ठभाग इत्यर्थः । अपरे ककुदि न्यसेद्वर्णानिति प्रपञ्चसारः । अपरञ्च पृष्ठमिति तट्टीका । अस्य मन्त्रस्य ब्रह्मा प्रजापतिर्वा नारदो वा ऋषिरनुष्टप्छन्दो नरसिंहो देवता धनाद्यभीष्टसिद्धौ विनियोगः । उग्रं वीरं हृदयाय नमः । महाविष्णुं शिरसे स्वाहा । ज्वलन्तं सर्वतोमुखं शिखायै वषट् । नृसिंहं भीषणङ्कवचाय हुम् । भद्रं मृत्युमृत्युं नेत्रत्रयाय वौषट् । नमाम्यहमस्त्राय फट् । इति षडङ्गमन्त्राः ।

अथ वर्णन्यासः-शिरसि उ । भाले ग्रं । नेत्रयोःक्रमेण वीरं । मुखे म । दक्षिणबाहुसन्धिचतुष्टयाङ्गुल्यग्रेषु हाविष्णुं ज्वल । वामबाहुसन्धिचतुष्टयाङ्गुल्य-

ग्रेषु-न्तं सर्वतोमु । दक्षिणपादसन्धिचतुष्टयाङ्गुल्यग्रेषु-खंनृसिंहं भी । वामपादचतुष्टयाङ्गुल्यग्रेषु-षणं भद्रं मृ । उदरे-त्यु । हृदि-मृ । गले-त्युं । पार्श्वयोः-नमा । पृष्ठे म्य । ककुदि-हं । विमलोत्कर्षिणीज्वालाक्रियायोगाप्रह्वी-सत्या-ईशानानुग्रहाः पीठशक्तयः । ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः । ध्यानम्

माणिक्यादिसमप्रभं निजरुचा सन्त्रस्तरक्षोगणं
जानुन्यस्तकराम्बुजं त्रिनयनं रत्नोल्लसद्भूषणम् ।
बाहुभ्यां धृतचक्रशंखमनिशं दंष्ट्रोग्रवक्त्रोल्लस-
ज्ज्वालाजिह्वमुदग्रकेशनिचयं वन्दे नृसिंहं विभुम् ॥

अत्रोपरितनहस्तयोः चक्रशङ्खावधस्तनौ तु जानुन्यस्तौ ध्यातव्यौ । आवरणपूजायाङ्केशरेष्वग्न्यादिकोणेषु - हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् । दिक्ष्वस्त्रम् । दलेषु दिक्षु-पक्षीन्द्रशङ्करशेषोऽब्जयोनीन् । अग्न्यादिकोणेष श्री-ह्री - धृतिपुष्टीः । तद्वहिर्लोकपालान् । तद्बहिस्तदस्त्राणि च पूजयेदिति । प्रयोगेषु तु ध्यानविशेषः-

उद्यत्कोटिरविप्रभं नरहरिं कोटीरहारोज्वलं
दंष्ट्राभीममुखं लसन्नखमुखैर्दोर्घैरनेकैर्भजैः ।
निर्भिन्ना सुरनाथमग्निशशिभृत् सूर्यात्मनेत्रत्रयं
विद्युत्पुञ्जसटाकलापभयदं वह्नि रमन्तम्भजे ॥
सौम्यं सौम्ये स्मरेत्कार्ये क्रूरे क्रूरमिमं भजेत् ।
वर्णलक्षं जपेन्मन्त्रं तत्सहस्रं घृतप्लुतैः ।
पायसान्नैः प्रजुहुया - द्विधिवत्संस्कृते मुने ॥

अस्य मन्त्रस्य ब्रह्माऋषिः पङ्क्तिश्छन्दो नरसिंहो देवता धनाद्यभीष्टसिद्धौ विनियोगः । आं हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रौं शिखायै वषट् । ह्रौं कवचाय हुं । ह्रं नेत्रत्रयाय वौषट् । ह्रः अस्त्राय फट् । इत्यङ्गमन्त्राः । विमलोत्कर्षिणी - ज्वालाक्रियायोगाप्रह्वीसत्येशानानुग्रहाः पीठशक्तयः । ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः । ध्यानम्—

कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्याग्निनेत्रं
पादादानाभिरक्तप्रभमुपरिसितं भिन्नदैत्येन्द्रगात्रम् ।
शङ्खं चक्रं सपाशांकुशकुलिशगदापारणान्मुद्वहन्तं
भीमं तीक्ष्णोग्रदंष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहम् ॥

अत्राधोमुखविमुक्तहस्तद्वयं दारणमुद्रातया हिरण्यकशिपुं दारयन् देवो भावनीयः । आवरणपूजायां केशरेष्वग्न्यादिकोणेषु – हृदयशिर शिखाकवचानि अग्रे नेत्रम् । दिक्ष्वस्त्रम् । पत्रेषु-चक्रशङ्खपाशाङ्कुशवज्र - कौमोदकीखड्गखेटकान् । तद्बहिरिन्द्रादीन् । तद्बहिस्तदस्त्राणि च पूजयेदिति ।

चतुर्लक्षं जपेदेनं घृतेन जुहुयात्ततः ।
तत्सहस्रं समिद्धेऽग्नौ तोषयेद्द्रविणैर्गुरुम् ॥
जवो भृगुर्वियदभूयस्तदाद्यं वह्निर्दीर्घयुक् ।
पावकः कवचास्त्रान्तो मनुस्सप्ताक्षरः स्मृतः ॥

अस्य मन्त्रस्याहिर्बुध्न्यऋषिरनुष्टुप्छन्दः चक्रस्वरूपी हरिर्देवताऽभीष्टार्थसिद्धौ विनियोगः । आ-चक्राय स्वाहा हृदयाय नमः । वि. चक्राय स्वाहा शिरसे स्वाहा । सु चक्राय स्वाहा शिखायै वषट् । वी चक्राय स्वाहा कवचाय हुँ । सं चक्राय स्वाहा नेत्राभ्यां वौषट । ज्वाला चक्राय स्वाहा अस्त्राय फट् । इत्यङ्गमन्त्राः । एतैः कराङ्गन्यासौ विधाय—

ऐँ ह्रीं चक्रेण बध्नामि नमश्चक्राय स्वाहा । इति पूर्वां दिशं बध्वा ऐन्द्रीमिति स्थाने आग्नेयीमित्यादीन्येतानि पदान्युक्त्वा आग्नेय्याद्या अपि दिशो बध्नीयात् । ततः ओं त्रैलोक्य रक्ष रक्ष हुँ फट् स्वाहेति मन्त्रेणाग्नि - प्राकारेण रक्षां कृत्वा मन्त्रन्यासं कुर्यात् । शिरसि-ओं । भ्रूमध्ये स । मुखे-ह । हृदि-स्रा । गुह्ये-र । जानुनोः-ङ्क । पदद्वयसन्धौ-फट् । अत्र सितरक्ताञ्जनाभ ओङ्कारः । अन्ये तु वर्णा अग्निप्रभा ध्येयाः । विमलोत्कर्षिणी, ज्ञाना क्रियायोगाप्रह्वीसत्येशानानुग्रहाः पीठाशक्तयः । ओंनमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः । ध्यानम् –

कल्पान्तार्कप्रकाशं त्रिभुवनमखिलं तेजसा पूरयन्तं
रक्ताक्षं पिङ्गकेशं विपुलभयदं भीमदंष्ट्राट्टहासम् ।
चक्रं शङ्खं गदाऽब्जे पृथुतरमृशलं चापपाशाङ्कुशानं
विभ्राणं दोर्भिराद्यैर्मनसि सुररिपुं भावयेच्चक्रसंज्ञम् ॥

अर्कलक्षं जपेन्मन्त्रं जुहुयात्तत्सहस्रकम् ।
तिलैस्ससर्षपैः पद्मैर्बिल्वैर्दुग्धोदनैः क्रमात् ॥

अथावरणपूजायां केशरेष्वग्न्यादिकोणेषु हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् । दिक्ष्वस्त्रम् । पत्रेषु चक्र, शङ्ख, गदा, पद्म, मुशल, शर धनुः-पाशाङ्कुशान् । दलाग्रेषु–लक्ष्मी - सरस्वतीरतिप्रीतिकान्तितुष्टिपुष्टीः । तद्बहिर्लोकपालान् । तद्बहिस्तदस्त्राणि च पूजयेदिति ।

अथ गोपालमन्त्राः

गोपीजनान्ते प्रवदेद्वल्लभायाग्निसुन्दरीम् ।
अयन्दशाक्षरो मन्त्रो दृष्टादृष्टफलप्रदः ॥

अत्राङ्गानि पञ्चहुतभग्दयिता समेतैरित्यादिपञ्चाङ्गदशाङ्गस्वरूपमात्र-कथनपरम् । नतु तदा तन्न्यासपरमपि । एतदनन्तरं बीजशक्तिविनियोगानभि-धानात् । नहि कराङ्गन्यासानन्तरं बीजादीनां स्मरणादि । किन्तु तदनन्तरमेव कराङ्गन्यासः । अतोऽङ्गुलीषु सृष्ट्यादिक्रमेण वर्णन्यासानन्तरमेव दशाङ्ग-न्यासपञ्चाङ्गकरन्यासौ ।

दशतत्त्वन्यासे-संहृतावनुगतो मनुवर्यं सृष्टिवर्त्मनि भवेत् प्रतियात इत्यत्र महीसलिलपावकानि वियन्ति गर्वो महान् । ततः प्रकृतिपुरुषौ पर इमानि तत्त्वान्यथेति पृथिव्यादिक्रमः संहारः । तद्वैपरीत्येन परपुरुषादिक्रमश्च सृष्टि-क्रमः । प्रकृतेर्महान्महतोऽहङ्कारोऽहङ्कारात्पञ्चतन्मात्राणि ततस्तत्पञ्चभूता-नीति सृष्टिक्रमाभिधानात् । शरीरे सृष्ट्यादिक्रमेण दशवर्णन्यासे मूर्धन्यक्ष्णोः श्रुत्योर्घ्राणे मुखहृदयजठरशिरजानुपत्सु तथाक्षरान् न्यस्येदुक्ता सृष्टिः शिष्टैः-स्थितिरपि मुनिभिरभिहिता हृदादिमुखान्तिका संहारोऽङ्घ्र्यादि मूर्द्धान्तस्तृतयमिति

विरचयतु सृष्टिपूर्वमनुस्थितिरित्यत्र स्थितौ हृदादिपञ्चकन्यासः।

मस्तकादि मुखान्तेषु गोकरादिवर्णपञ्चकन्यासः। संहारे तु प्रपदादि शिरोन्तं हकारादि गोकारान्तदशवर्णन्यास इति मतमयुक्तम्। वस्थानार्णयोर्विनिमयो नाङ्गुलिस्थानयोर्भवेदिति तन्न्यासशेषस्थवचनेन विरोधापत्तेः। तन्मते स्थानावर्णयोर्विनिमयाभावात्। तस्मात्सृष्टिवत्स्थितावपि गोकारादि दशवर्णानां क्रमेण हृदयादिषु मुखान्तेषु, संहारे प्रपदादिशिरोऽन्तेषु स्थानेषु न्यास इत्येव युक्तम्।

सृष्टिपूर्वमिति सृष्ट्यनन्तरं स्थितिन्यासः। क्वचित् स्थित्यनन्तरं सृष्टिन्यासः। पूर्वानुशब्दयोरुभयत्रान्वयादित्यर्थः। अत्र न्यासेऽङ्गुलिनियमे तथा विहिता शिरे इति क्वचित्।

क्वचित्तु श्रवोविहिता शिरे इति पाठः। विभूति न्यासे। कन्धराभ्योरिति क्वचित् कन्धरानाड्योरिति पाठः। विष्णुपञ्जारन्यासमन्त्रस्वरूपं प्रतिपादितं नारायणाष्टाक्षरमन्त्रपरिच्छेदे।

सृष्टिस्थिती दशपञ्चाङ्गयुग्म मुन्यादिकत्रितयं काम्यहृत्सु।
विन्यस्य च ग्रथयित्वा तु मुद्रां भूयो दिशां दशकं बन्धनीयम्॥

इत्यनेन मुद्रादर्शनदिग्बन्धने विहिते। तत उत्तरग्रन्थेनमुद्रास्वरूप मुक्त्वा दिग्बन्धनं प्रहृत्य आमुनाग्रथयेन्मनुनाऽस्त्रमुद्रया हरित इति स एव दिग्बन्धोऽस्त्रमन्त्रं मुद्रान् विधानायानुदितो नत्वन्यो दिग्बन्धो विहित इति।

विभूतिन्यासे काम्याक्षिश्रुतिनः कपोलकरपत् सन्ध्यग्रशाखासुका इत्यत्र दक्षिणहस्तसन्ध्यग्रशाखास्वेकाऽऽवृतिः। एवमावृत्यन्तराणि।

सम्प्रदायस्तुकरपत सन्ध्यग्रेष्वावृत्तिद्वयतत्ततः। शाखास्वावृत्ति द्वयमिति।

अत्र मन्त्रे विशेषः स्नानादिभूतशुद्ध्यन्तकर्म केवल सविन्दुसविसर्गस-

विन्दुविसर्गान् केशवादिमूर्त्तिकीर्त्यादिशक्तिसहितान् श्रीवीजपूर्व्वकेशवादि मूर्त्तिकृत्यादिशक्तिसहितान् मातृकावर्णान विन्यस्य प्रपञ्चयागं विधाय तद्वन्न्यासं विदध्यात् । केशवकीर्त्यादिसहित - मातृकान्यासश्चविष्णु मन्त्रपरिच्छेदोपक्रमे द्रष्टव्यः ।

ततो मूलेन कामवीजेन वा प्राणायामान्विधायान्तरपूजापक्षे शरीरे योगपीठन्यासङ्कुर्यात् । तत्र विमलोत्कर्षिणी ज्ञानाक्रियायोगाप्रह्वीसत्येशानानुग्रहाः पीठशक्तयः । ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः । ततः करयोर्मूलमन्त्रं न्यसेत् । ततोऽमुकदशाक्षरमन्त्रस्य नारदऋषिर्विराट्छन्दः श्रीकृष्णो देवता क्लीं वीजं स्वाहा शक्तिः कृष्णः प्रकृतिर्दुर्गाधिष्ठानदेवता पुरुषार्थ-चतुष्टये विनियोगः ।

इति स्मृत्वा शिरोवदनहृदयेषु ऋषिच्छन्दोदेवताः गुह्ये- बीजं, पादयोः शक्तिञ्च न्यसेत्। ततः ओङ्कारपुटितंमूलमन्त्रङ्करयोरन्तर्भाव्यपार्श्वेषु विन्यस्य कराङ्गुलीषु प्रणवपुटितान्नमोन्तान्विन्दुसहितान्मन्त्रवर्णान् सृष्ट्यादिक्रमेण दशाङ्गुलीषु पर्व्वत्रयव्यापि न्यसेत् ।

यथा दक्षिणहस्ताङ्गुष्ठ-ओं गों ओं नमस्तर्ज्जन्याम् । तथा ओं पीं नमः मध्यमायाम् । ओं ज ओं नमःअनामिकायाम् । ओं नमः नं ओं कनिष्ठायाम् । ओं वं ओं नमः वामकरकनिष्ठायाम् । ओं ल्लं ओं नमः अनामिकायाम् । ओं भां ओंनमः मध्यमायाम् ।ओं य ओं नमःस्तर्ज्जन्याम् । ओं स्वां ओंनमः अङ्गुष्ठे । ओं हां ओं नम इति न्यसेदिति सृष्टिक्रम· ।

दक्षिणाङ्गुष्ठाद्यङ्गुलिपञ्चके ओं गों ओं नमः इत्यादि पञ्चकं विन्यस्य वामाङ्गुष्ठादि तत्कानिष्ठान्तं ओं ल्लं ओं नम इत्यादिपञ्चकं न्यसेदिति स्थितिक्रमः । वामांगुष्ठादिदक्षिणाङ्गुष्ठान्तं ओं गों ओं नम इत्यादिदशकं न्यसेदिति संहारक्रमः ।

ततः·गोंःनमो हृदयायनमः । पां नमश्शिरसे स्वाहा । जं नमश्शिखायै

वषट् । नं नमः कवचाय हुँ । वं नम अस्त्राय फट् । ल्लं नमः दक्षिणपार्श्वाय नमः । भां नमः वामपार्श्वाय नमः । यं नमः कट्यै नमः स्वां नमः पृष्ठाय नमः । हां नमो मूर्ध्ने नमः इति दशाङ्गमन्त्राः ।

केचित्तु गों नम इत्यादि मन्त्रान्वदन्ति । एतान् दशाङ्गमन्त्रान् स्थितिप्रकारेण विन्यसेदत्र च केचिच्छिरो मन्त्रादिष्वपि नम इत्येव वदन्ति । न तु स्वाहादीन् ।

तत आचक्राय स्वाहा हृदयाय नमः । विचक्राय स्वाहा शिरसे स्वाहा । सुचक्राय स्वाहा शिखायै वषट् । त्रैलोक्यरक्षणचक्राय स्वाहा कवचाय हुँ । असुरान्तकचक्राय स्वाहा अस्त्राय फट् । इति पञ्चाङ्गमन्त्रणान् करयोरङ्गुष्ठाद्यङ्गुलीषु विन्यस्य गोपीजनवल्लभाय स्वाहा अं गोपीजनवल्लभाय स्वाहेत्यादि प्रकारेणमन्त्रपुटितसविन्दुमातृकावर्णान् स्व स्व स्थाने विन्यसेत् ।

ततः संहारसृष्टिमार्गेण दशतत्त्वन्यासः । यथा पादयोः गों नमः पराय पृथिव्यात्मने नमः । लिङ्गे पीं नमः परायावात्मने नमः । हृदि जं नमः पराय तेजात्मने नमः । मुखे नं नमः पराय वाय्वात्मने नमः । शिरसि वं नमः परायाकाशात्मने नमः । हृदि ल्लं नमः परायाहङ्कारात्मने नमः । भां नमः पराय महदात्मने नमः । सकलशरीरे यं नमः पराय प्रकृत्यात्मने नमः । स्वां नमः पराय पुरुषात्मने नमः । हां नमः परात्परात्मने नम इति न्यसेदितिसंहारः ।

अथ सृष्टिप्रकारः

सकलवपुः हि हां नमः पराय परमात्मने नमः । स्वां नमः पराय पुरुषात्मने नमः । यं नमः पराय प्रकृत्यात्मने नमः । हृदि भां नमः पराय महदात्मने नमः ल्लं नमः परायाहङ्कारात्मने नमः । शिरसि वं नमः परायाकाशात्मने नमः । मुखे नं नमः पराय वाय्वात्मने नमः । हृदि जं नमः पराय तेजसात्मने नमः । लिङ्गे पीं नमः परायावात्मने नमः । पादयोः गों नमः पराय पृथिव्यात्मने नम इति ।

तत आकेशादापादं शरीरे ओङ्कारद्वयमध्यस्थं मूलमन्त्रं वारत्रयं हस्ताभ्यां विन्यस्य शरीरे सृष्ट्यादिमार्गेण मन्त्रवर्णान्विन्यसेत्। तद्यथा शिरसि गों। नेत्रयोः पीं। कर्णयोः जं। श्रवणे नं। मुखे·वं। हृदि-ल्लं। उदरे·भां। लिङ्गे यं। जानुनोः स्वां पादयोः हां विन्यसेदिति सृष्टिः। पादयोः गों। जानुनोः-पीं। लिङ्गे जं। उदरे·नं। हृदि-वं। मुखे·ल्लं। घ्राणे·भां। कर्णयोः-यं। नेत्रयोः-स्वां। शिरसि·हां। इति संहारः।

हृदि-गों। उदरे-पीं। लिङ्गे·जं। जानुनोः नं। पादयोः- वं शिरसि-ल्लं। नेत्रायोः-भां। कर्णयोः-यं। घ्राणे स्वां। मुखे हां इति स्थितिप्रकारः। त्रिष्वपि प्रकारेषु शिरसि मध्यमया। नेत्रयोस्तर्ज्जनीसहितया मध्यमया कर्णयोनङ्गुष्ठाभिश्चतसृभिः। घ्राणे·अंगुष्ठाभ्यांमनामिकाभ्याम्। मुखे-सर्वाभिः। हृदि अंगुष्ठाभ्यान्तर्ज्जनीभ्याम्। जठरलिंगयोः अंगुष्ठाभ्यां मध्यमाभ्याम्। जानुनोरङ्गुष्ठेतराभिः पादयोः पञ्चभिरंगुलिभिस्तत्तद्वर्णन्यासं कुर्यात्। श्रोत्रे विहिताः शिर इति पाठपक्षे लिङ्गे अंगुष्ठेतराभिर्न्यासः। न्यासश्चायं यतिवैखानसयोः सृष्टिस्थितिसंहारक्रमेण। गृहस्थस्य सहारसृष्टिस्थितिक्रमेण। वैराग्ययुक्तगृहस्थस्य तु यतिक्रमेण,विद्यार्थीनां संहार-स्थितिसृष्टिक्रमेण बोद्धव्यः।

अथ विभूतिपञ्जरन्यासः-आधारे·गो। लिङ्गे-पी। नाभौ·ज। हृदि-न। गले-व। मुखे ल्ल। अंशयोः भाय। उर्वोः·स्वाहा। कन्धरानाड्यः गोपी। कन्धरानाभ्योरिति पाठपक्षे कन्धरानाभ्योः गोपी, कुक्षौ·ज, हृदि·न। स्तनयोः-वल्ल। पार्श्वयोः·भाय। श्रोण्योः·स्वाहा। शिरसि·गो। मुखे·पी। नेत्रयोः·जन। कर्णयोः-बल्ल। नासापुयटोः·भाय। कपोलयोः स्वाहा। दक्षिणकरस्य सन्ध्यग्रेषु·गोपीजनव। वामपादस्य सन्ध्यग्रेषु·ल्लभाय स्वाहा। एवम् दक्षिणहस्तस्याङ्गुष्ठादि पञ्चाङ्गुलीषु·गोपीजनव। वामहस्तस्य कनिष्ठादिषु·ल्लभाय स्वाहा दक्षिणपादकनिष्ठादिषु·गोपीजनव। वामपादस्यांगुष्ठादिषु·ल्लभाय स्वाहा। अथवा दक्षिणहस्तस्य सन्ध्यग्रेषु·गोपीजनव। तदङ्गुलीषु ल्लभाय स्वाहा। एवमपरपादद्वयेषु। एवमावृत्तिचतुष्टयं ज्ञेयम्।

शिरसि-गो। शिरसः पूर्वादिदिक्षु क्रमेण पीजनव। सकलशिरसि-ल्ल। भ्रुजयोःभाय। उरुद्वये-स्वाहा च। शिरसि-गो। नेत्रयोःपी। मुखे ज। कण्ठे न। हृदि-व। तुन्दे-ल्ल। मूलाधारे-भा। लिङ्गे-य। जानुनोः-स्वा। पादयोः-हा। श्रोत्रयोः गो। गण्डयोः-पी। अंशयोः-ज। स्तनयोः-न। पार्श्वयोः-व। स्फ्योः-ल्ल। ऊर्वोः-भा। जानुनोः-य। जङ्घयोः-स्वा। पादयोः-हा। इति दशावृत्या मन्त्रं न्यसेदिति। ततो मूर्त्तिपञ्जरन्यासः—

यथा—ललाटे ओं केशवधातृभ्यां नमः। उदरे न आं नारायणार्यमाभ्यां नमः। हृदि - मो इं-माधवमित्राभ्यां नमः। गलकूबरे - भ ईं गोविन्द-वरुणाभ्यां नमः। दक्षिणपार्श्वे - ग उं विष्णुभगाभ्यांनमः। दक्षिणांशे-वं ऊं मधुसूदनभगाभ्यां नमः। गलदक्षिणभागे-ते एं त्रिविक्रमविवस्वद्भ्यांनमः। वामपार्श्वे-वा ऐं वामनेत्राभ्यां नमः। वामांशेषु - सु ओं श्रीधरपूषाभ्यां नमः। गलवामभागे-दे औं हृषीकेशपर्यन्याभ्यां नमः। पृष्ठे-वा अं पद्मनाभत्वष्टृभ्यां नमः। ककुदि य अः दामोदरविष्णुभ्यांनमः। इति विन्यस्य शिरसि द्वादशाक्षरं न्यसेत्। ओं अं धातृसहितकेशवाय नम इत्यादयो वा न्यासमन्त्राः।

ततः पूर्वोक्तं शरीरे मूर्धादिषु पूर्वोक्तसृष्टिस्थितिप्रकाराभ्यां मन्त्रन्यासम्। हृदादिषु गों नमो हृदयाय नम इत्यादि दशाङ्गं पञ्चाङ्गञ्च शिरोरसनाहृदयेषु ऋषिछन्दोदेवतानि च विन्यस्य वेणुविल्वादिमुद्राः प्रदर्श्यास्त्रमुद्रया ओंनमस्सुदर्शनायास्त्राय फडिति सुदर्शनमन्त्रेण दिग्बन्धनङ्कुर्यात्। ततो ध्यानम्—अथ प्रकटसौरभाकुलितेत्यादि विस्तारतः क्रमदीपिकायामनुसन्धेयम्। संक्षेपतस्तु—

स्मरेद्वृन्दावने रम्ये मोहयन्तमनावृतम्।
गोविन्दं पुण्डरीकाक्षं गोपकन्याः सहस्रशः॥
आत्मनो वदनाम्भोज-प्रेषिताक्षि-मधुव्रताः।
पीडिताः कामवाणेन चिरमश्लेषणो अपाः॥
मुक्ताहार-लसत्पीन-तुङ्गस्तनभरानताः।
स्रस्तधम्मिल्लवसना मदस्खलित-भाषणाः॥

दन्तपङ्क्तिप्रभोद्भासि-स्पन्दमाना धराञ्चिता: ।
विलोभयन्ती विविधैर्विभ्रमैर्भारगर्भितैः ॥
फुल्लेन्दीवरकान्तिमिन्दुवदनं वर्हावतंसं प्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृत्तं
गोगिन्दङ्कलवेणुवादनपरं दिव्याङ्गभूषम्मजे ॥

तद्वहिरग्रे वित्तार्थिनः स्तोत्रपरान्मुनीन् । पश्चान्मुक्तिकामान् समाधिपरान् सनकादीन् । वामे कामार्थिनो नृत्यगीतपरान् सिद्धगन्धर्वाप्सरः प्रभृतीन् । उपरि भक्तिकामं महत्या गायन्तं सादरं स्मरेत् । ततोऽर्घस्थापनम्विधाय आन्तरपूजापक्षे मूर्ध्नि-गुरुम् । आधारे-गणेशम् । हृदयादिषु यथान्यास-माधारशक्त्यादि पीठान्तं । मूलाधारे हृदि भ्रूमध्ये च देवतातेजश्च सम्पूज्य तड़ित्प्रभ तत्तेजस्त्रयं वीजेनैकीकृत्य सकलीकृत्य देवशरीरे विभूतिमूर्त्तिपञ्जर-सृष्टिस्थितिदशाङ्ग पञ्चाङ्गानि विन्यस्यायनादिभिभूषान्तैर्देवमभ्यच्चर्य-जलगन्धादिभिरर्चयेत् ।

देवशरीर विभूतिमूर्त्तिपञ्जरसृष्टिस्थितिदशाङ्गपञ्चाङ्गानि-मुखेवेणुम् । हृदि वनमालाम् । स्तनादूर्ध्वं श्रीवत्सङ्कौस्तुभञ्चाभ्यर्च्य मूलेन चन्दनानु-लिप्तदेहोऽनामिकया भालादिषु द्वादशस्थानेषु दीपशिखाकृतान् तिलकान्-व्यासोक्तमूर्त्तिपञ्जरमन्त्रैः कुर्यात् ।

ततः दक्षिणपादे श्वेततुलस्या, वामपादे कृष्णतुलस्या, हृदि-श्वेतरक्त-करवीराभ्याम् । शिरसि-श्वेतरक्तपद्मद्वयेन । सर्वाङ्गेषु-तुलसीद्वय, करवीर-द्वय - पद्मद्वयैः प्रशस्त-पुष्पाञ्जलिपञ्चकन्दद्यात् । तत्र श्वेतचन्दनसिक्तानि दक्षिणभागे देयानि । अपरानि रक्तचन्दनसिक्तानि वामभागे । ततो धूपदीपौ समर्प्य मुखेवासादिकन्दत्वा पुनर्गन्धादिभिरभ्यर्च्य ताम्बूलगीतनर्त्तनवाद्यैः सन्तोष्योमितः पूर्वं प्राणबुद्धीत्यादिमन्त्रेण चुलूकजलेनात्मानं ब्रह्माणं समर्पयेत् । सङ्कुचितधियस्तु मूर्त्तिपञ्जरमारभ्यैव न्यासान् कुर्युः ।

ततः प्राणायामत्रयं कृत्वा सुप्रसन्नं देवं चिन्तयन् जपङ्कृत्वा प्रणवपुटितम्बीजमष्टोत्तरशतञ्जप्त्वा प्राणायामान्विधाय गुह्यातिगुह्येत्यादिमन्त्रेण देवदक्षिणहस्ते चुल्लुकोदकेन जल समर्पयेत्। सर्वमेतत्प्रोक्षिणीवारिणैव कर्त्तव्यम्। प्रोक्षिणीजलं विसृज्य जलान्तरेण पूरयेत्।

अथ बाह्यपूजालिखितयन्त्रे गुर्वादिज्ञानात्मपर्यन्तं सम्पूज्य केशरमध्ये च पीठशक्तीः सम्पूज्य ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रेण पीठमभ्यर्च्य मूलेन मूर्त्तिं परिकल्प्यामुकमूर्त्तये नम इति मूर्त्तिं सम्पूज्य तत्र देवमावाह्य स्थापनादीनि परमीकरणपर्यन्तानि कृत्वा मातृकावर्णानां तत्त्वमन्त्राणाञ्च पूर्वोक्तानां न्यासेन सकलीकृत्य विभूषणदानान्तम्विधाय मन्त्रपुटितमातृकार्णैर्देवं गन्धपुष्पाभ्यामभ्यर्च्य देवशरीरे सृष्टिस्थितिदशाङ्गपञ्चाङ्ग - वेणुवनमालाश्रीवत्सकौस्तुभान् सम्पूज्य मूलेन पुष्पाञ्जलिभिस्त्रिरभ्यर्च्य तुलस्यादिभिः पुष्पाञ्जलिपञ्चकं पादादिषु दत्वाऽऽवरणपूजां कुर्यात्।

यथा—कर्णिकायान्दिक्षु दाम, सुदाम, वसुदामकिङ्किण्यः। केशरेष्वग्न्यादिकोणेषु, हृदयशिरःशिखाकवचानि। दिक्ष्वस्त्रम्। दलेषु—रुक्मिणी, सत्यभामा, नाग्नजिती, सुनन्दा, मित्रविन्दा, सुलक्षणा, जाम्बवती, सुशीलाः। दलाग्रेषु-वसुदेव, देवकी, नन्दगोप, यशोदा, बलभद्र, सुभद्रा, गोप गोपीः। मध्ये-वसुदेवादयः। बहिश्च मन्दार सन्तानक, पारिजात, कल्पद्रुम, हरिचन्दनाः। तद्बहिरिन्द्रादयः। तद्बहिस्तदस्त्राणि च-जलगन्धपुष्पैः पूजनीयानि।

ततः श्रीकृष्ण, वासुदेव, नारायण देवकीनन्दन, यदुश्रेष्ठ, वार्ष्णेय, असुराक्रान्तभारहारि, धर्मसंस्थापकान् पुष्पैः पूजयेत्।

आवरणपूजनाशक्तावङ्गेन्द्रवज्रादिभिः कृष्णाद्यष्टकेन च। तत्राशक्तौ श्रीकृष्णाद्यष्टकेनैव पूजयेत्। ततो धूपमारभ्यार्घदानानन्तरं पुष्पाञ्जलिदानपर्यन्तं कृत्वा शेषं समापयेदिति। अथ रुक्मिण्यादि ध्यानम्—

दक्षिणकरधृतकमला वसुभरितसुपात्रमुद्रितान्यकरा। ।
उपनीय मरकताभा: सुचितविचित्रासुराद्विषस्त्वेता: ।।
पृथुकुचभरालसांग्यो विविधमणिप्रकरविलसिताभरणा: ।।

रुक्मिणीसत्ययोरनुक्रमेण श्वेतचित्रवस्त्रत्वे तपनीयमरकताभत्वे चेति।। एवं नाग्नजितीसुनन्दयोरसुरादिद्विषत्वमित्यस्यार्थः ।

ज्ञानमुद्राभयकरौ पितरौ पीतपाण्डुरौ।
दिव्यमाल्याम्बरालेपभूषणौ मातरौ पुन: ।।

धारयन्तौ वरदं पायसापूपपात्रिकाम् ।
अरुणश्यामले हारमणिकुण्डलमण्डिते ।।

बनशंखेन्दुधवलो मुशलं लाङ्गलन्दधत् ।
हालालोलो नीलवासा हेलावानेककुण्डल। ।।

कलायश्यामला भद्रा अभद्रा भद्रभूषणा: ।
वराभययुता पीतवसनारूढयौवना ।।

वेणुवीणावेत्रयष्टिशङ्खशृङ्गादि पाणय: ।
गोपा गोप्यश्च विविधः प्रभृतार्णकराम्बुज: ।।

त्रिकालपूजाविधि: क्रमदीपिकायामनुसन्धेय:। पुरश्चरणे –

प्रजपेदयुतचतुष्कं दशाक्षरं मनुवरं पृथक्क्रमश: ।
अष्टादशाक्षरञ्चेदयुतद्वयमीरिता संङ्ख्या ।।

इत्याद्यभिधाय गदितमिति मया पूर्वमेव बिधानात्। "निर्वृतेस्मिन्पुनश्च प्रजपतु विधिवत् सिद्धये मारकेश: । इत्यादि चोक्त्वा दशलक्षमक्षयफलप्रदं मन्त्रं प्रतिजप्य शीक्षितमतिर्दशाक्षरम् । जुहुयान्तमाज्यमधुसंप्लुतैर्नवैररुणाम्बुजैर्हुतवहेन शास्वतमित्यादि ।

न्यासश्च बीजमन्त्रपूजापरिच्छेदोपक्रमे द्रष्टव्यः । ततो मूलेन कामबीजेन वा प्राणायामान् कृत्वा आन्तरपूजापक्षे योगपीठन्यासं कुर्यात् । तत्र विमलोत्कर्षिणी, ज्ञाना, क्रियायोगा, प्रह्वीसत्येशानानु ग्रहाः पीठशक्तयः । ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः ।

ततः करयोर्मूलमन्त्रं विन्यस्य अमुकमन्त्रस्य नारदऋषिर्गायत्रीछन्दः श्रीकृष्णो देवता क्लीं बीजं स्वाहा शक्तिः कृष्णः प्रकृतिर्दुर्गाधिष्ठानदेवता पुरुषार्थचतुष्टये विनियोगः । इति स्मृत्वा ऋषिछन्दोदेवतानां शिरोमुखहृदयेषु लिङ्गे बीजस्य पादयोः शक्त्या न्यासं विधाय क्लीं कृष्णाय हृदयाय नमः । गोविन्दाय शिरसे स्वाहा । गोपीजनशिखायै वषट् । बल्लभाय कवचाय हुम् । स्वाहा अस्त्राय फट् । इति पञ्चाङ्गमन्त्रानंगुष्ठाद्यङ्गुलिपञ्चके करद्वये विन्यस्य सकलशरीरे दशो मूलं सकृत्प्रणवञ्च विन्यस्य मन्त्रवर्णन्यासं कुर्यात् । शिरसि क्लीं । ललाटे कृ । भ्रूमध्ये ष्णा। कर्णयोः-यगो । नेत्रयोः-विन्दा नास पुटयोः-यगो । मुखे पी । ग्रीवायाम् ज । हृदि न । नाभौ व । कटिद्वये— ल्लभा । लिङ्गे य । जानुनोः स्वा । पादयोः हा । ततश्शिरसि ओंकारं न्यसेत् । ततो मन्त्रपदन्यासः । यथा नेत्रयोः-क्लीं । मुखे-कृष्णाय। हृदि गोविन्दाय । गुह्ये गोपीजनवल्लभाय । पादयोः स्वाहा इति विन्यस्य झटितिफलसिद्धिकामनायान्दशाक्षरोक्तदशतत्त्वन्यासं कुर्यात् । स यथा—पादयोः गों नमः । पराय पृथिव्यात्मने नमः । लिङ्गे पीं नमः परायात्मने नमः । हृदि जं नमः पराय तेजसात्मने नमः । मुखे नं नमः पराय वाय्वात्मने नमः । शिरसि वं नमः परायाकाशात्मने नमः । हृदि ल्लं नमः परायाहङ्कारात्मने नमः । भां नमः पराय महदात्मने नमः । सकल शरीरे यं नमः पराय प्रकृत्यात्मने नमः । स्वां नमः पराय पुरुषात्मने नमः । हां नमः पराय परमात्मने नम इति न्यसेदिति संहारक्रमः ।

अथ सृष्टिक्रमः

सकल वपुषि हां नमः पराय परमात्मने नमः । स्वां नमः पराय पुरुषात्मने नमः । यं नमः पराय प्रकृत्यात्मने नमः । हृदि भां नमः पराय

महदात्मने नमः । ल्लं नमः परायाहङ्कारात्मने नमः । शिरसि वं नमः परायाकाशात्मने नमः । मुखे नं नमः पराय वाय्वात्मने नमः । हृदि जं नमः पराय तेजसात्मने नमः । लिङ्गे पीं नमः परायात्मने नमः । पादयोः गों नमः पराय पृथिव्यात्मने नम इति ।

ततो हृदादिषु पञ्चाङ्गमन्त्रान् शिरोवदनहृत्सु ऋषिच्छन्दोदैवतानि विन्यस्य बिल्वादिमुद्राः प्रदर्श्य ओं नमः सुदर्शनायास्त्राय फडिति सुदर्शनमन्त्रेणास्त्रमुद्रया दिग्बन्धनं कुर्यात् । शिष्टन्ध्यानादिसर्वं दशाक्षर-तुल्यम् । केवलमत्र देवशरीरे विभूतिविष्णपञ्जरसृष्टिस्थितिदशाङ्गानां न्यासः पूजा च न विधेयौ । पञ्चाङ्गं वेण्वादीनान्तौ विधेयावेवेति ।

पुरश्चरणेऽयुतद्वयं जपस्तद्दशांशं गुडाज्यमध्वक्तैररुणाम्भोजैर्जुहुयात् । तदभावे घृतसितायुतैः पायसैर्होमः । सिद्धिविशेषान्वितायान्तु पञ्च-लक्षञ्जपस्तद्दशांशं होमः । एतत्प्रमाणं दशाक्षरपटले प्रोक्तम् ।

श्रीमन्मुकुन्दचरणौ सदेति शरणन्ततः ।
अहं प्रपद्य इत्युक्तो मौकुन्दोष्टा दशाक्षरः ॥

एतन्मन्त्रादिमन्त्रचतुष्कमुक्त्वा –

अङ्गान्यमीषां मन्त्रणामाचक्रादिभिरर्च्चना ।
अङ्गैरिन्द्रादिवज्राद्यैरुदिता सम्पदे सदा ॥

इति वचनेऽमीषामिति पदेनास्यापि संग्रहः । अन्यथाऽत्राङ्गमन्त्र-निश्चयो न स्यात् । तथा च पूजाप्यावरणत्रयेणैव स्यान्मन्त्रुस्तज्जपध्यानपूजा होमफलोपकार इत्यनेनावरणातिरिक्त पूजाष्टादशाक्षरसमा बोध्यते । नत्वावरणमपि । अर्च्चनाङ्गैरिन्द्रादिवज्राद्यैरिति विशेषाभिधानादेवमेव सिद्धिनाथादिकृताः क्रमदीपिकाटीकाः ।

विमलोत्कर्षिणीज्ञाना क्रियायोगाप्रह्वीसत्येशानानुग्रहादिभिःपीठशक्तिभिः-पीठन्यासपर्यन्तं कृत्वा करयोर्मूलं विन्यसेत् । अस्य मन्त्रस्य नारदऋषि-र्गायत्री छन्दो मुकुन्दो देवता पुरुषार्थचतुष्टये विनियोगः । इति स्मृत्वा

ऋष्यादित्रयं विन्यस्य-आचक्राय स्वाहा हृदयाय नमः । विचक्राय स्वाहा शिरसे स्वाहा । स्वचक्राय स्वाहा शिखायै वषट् । त्रैलोक्यरक्षणचक्राय स्वाहा कवचाय हुँ । असुरान्तचक्राय स्वाहा अस्त्राय फट् । इत्यङ्गमन्त्रान् करयोरंगुष्ठादिपञ्चांगुलीषु विन्यस्य मन्त्रपुटितमातृकावर्णान् यथास्थानं विन्यसेत् । ततो झटित फलसिद्धिकामनायान्दशाक्षरोक्तदशतत्त्वन्यासं कुर्यात् । ततो हृदयादिषु अङ्गमन्त्रान्, मस्तकादिषु ऋष्यादींश्च विन्यस्य मुद्राः प्रदर्श्य ओं नमस्सुदर्शनायास्त्राय फडिति सुदर्शनमन्त्रेण दिग्बन्धनं कुर्यात् ।

ततो ध्यानादि शेषम्, ततो ध्यानमित्यादिदशाक्षरसमं केवलदेवशरीरे विभूतिविष्णुपञ्जरसृष्टिस्थितिदशाङ्गानां न्यासः । पूजा च न तद्वद्विधेया । पञ्चाङ्गवेण्वादीनान्तं विधातव्यैवेति । आवरणानि चाङ्गलोकपालतदायुधानीति , पुरश्चरणङ्कामबीजाद्यष्टादशाक्षरतुल्यम् , शक्तिधीपूर्वकाष्टादशार्णोविंशतिवर्णक मन्त्रेण व्यापकम्बिधाय करन्यास इति ।

सिद्धिनाथ टीका ।

आवरणपूजायामादौ वह्निपुरन्दरकोणेष्वङ्गानि पूजयेत् । सकृच्छिरः शिखाधर्मनेत्रमस्तकमिति क्रमादित्यङ्गविवरणकोणेषु यथाक्रमं पूजनीयम् । नतु मन्त्रान्तरवत् । न त्वत्र हृदयादिक्रमो विधीयते,तस्य प्राप्तत्वात् ।

किन्तु कोणेषु क्रमेण हृदयादिपूजनमित्यप्राप्तं विधीयत इति । विमलोत्कार्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानानुग्रहानुरूपा नव शक्तयः । ओं नमो भगवते इत्यादि पीठमन्त्रकपीठन्यासम्विधायास्य मन्त्रस्य ब्रह्माऋषिर्गायत्रीछन्दः कृष्णो देवता क्लीं वीजं स्वाहा शक्तिः कृष्णः प्रकृतिर्दुर्गाधिष्ठानदेवता पुरुषार्थचतुष्टये विनियोगः । इति स्मृत्वा मस्तकादिषु ऋष्यादिपञ्चकं विन्यस्य क्लीं श्रीं क्लीं हृदयाय नमः । कृष्णाय शिरसे स्वाहा । गोविन्दाय शिखायै वषट् । गोपीजन कवचाय हुँ । बल्लभाय नेत्राभ्यां वौषट् । स्वाहा अस्त्राय फडिति षड्ङ्गमन्त्रानङ्गुष्ठादिषु विन्यस्य मूलेन व्यापकं कृत्वा मूलपुटितमातृकावर्णान् स्वस्वस्थाने विन्यस्य संहारसृष्टिमार्गाभ्यां दशतत्त्वन्यासं कुर्यात् ।

यथा-पादयोः गों नमः पराय पृथिव्यात्मने नमः । लिङ्गे-पीं नमः परायावात्मने नमः । हृदि जं नमः पराय तेजसात्मने नमः । मुखे-नं नमः पराय वाय्वात्मने नमः । शिरसि वं नमः परायाकाशात्मने नमः । हृदि-लं नमः परायाहङ्कारात्मने नमः । इं नमः पराय महदात्मने नमः । सकल शरीरे-यं नमः पराय प्रकृत्यात्मने नमः । स्वां नमः पराय पुरुषात्मने नमः । हां नमः पराय परमात्मने नमः । इति संहारप्रकारः ।

सकलशरीरे-हां नमः पराय परमात्मने नमः । स्वां नमः पराय पुरुषात्मने नमः । यं नमः पराय प्रकृत्यात्मने नमः । ह दि भां नमः पराय महदात्मने नमः । ल्लं नमः परायाहङ्कारात्मने नमः । शिरसि-व नमः परायाकाशात्मने नमः । मुखे-नं नमः पराय वाय्वात्मने नमः । हृदि-यं नमः पराय तेजसात्मने नमः । लिङ्गे-पीं परायावात्मने नमः । पादयोः गों नमः पराय पृथिव्यात्मने नमः । इति सृष्टिप्रकारः ।

पुनर्मूलेन व्यापकं कृत्वा सृष्टिस्थितिसंहारक्रमेण पञ्चावृत्या मन्त्रवर्णान् विन्यसेत् । यथा-शिरसि-ह्रीं । भाले श्रीं । भ्रूमध्ये-क्लीं । चक्षुषोः-कृ । कर्णयोः-ष्णा । नासापुटयोः-य । मुखे गो । चिवुके वि । कण्ठे-न्दा । मूलयोः-य । हृदि-गो । तुन्दे पी । नाभौ-ज । लिङ्गे-न । आधारे-व । कट्योः-ल्ल । जानुनी-भा । जङ्घयोः य । गुल्फयोः-स्वा । पादयोः-हा । इति सृष्टिः ।

हृदि-गो इत्यादि दशवर्णान् विन्यस्य शिरसि-ह्रीं इत्यादि दोर्मूलयोः य इत्यन्तम्वर्णदशकं न्यसेदिति स्थितिः । पादयोः इत्यादि शिरसि क्रीं इत्यन्तं वैपरीत्येन मन्त्रवर्णान्न्यसेदिति संहारः । पुनः पूर्ववत्सृष्टिः । ततः पर्ववदेव स्थितिरिति । ततो मूर्त्तिपञ्जरन्यासो ललाटे-ओं अं केशवधातृभ्यां नमः । धातृसहितकेशवाय नम इति वा । एवमग्रेऽपि उदरे-न आं नारायणार्यमाभ्यां नमः । हृदि-मो इं माधवमित्राभ्यां नमः । गलकूवरके-भ ईं गोविन्द वरुणाभ्यां नमः । दक्षिणपार्श्वे-ग उं विष्णुवसुभ्यां नमः । दक्षिणांशे व ऊँ मधुसूदनभगाभ्यां नमः । गलदक्षिणभागे-ते एं त्रिविक्रमविवस्वद्भ्यां नमः । वामपार्श्वे-वा ऐं वामनेन्द्राभ्यां नमः । वामांशे-सुओं श्रीधरपुष्षाभ्यां नमः । गलवामभागे-दे औं हृषीकेश-

पर्य्यन्याभ्यां नमः। पृष्ठे वा अं पद्मनाभत्वष्टृभ्यां नमः। ककुदि-य अं दामोदरविष्णुभ्यां नमः। इति विन्यस्य शिरसि द्वादशाक्षरं न्यसेत्।

ततः पुनः सृष्टिस्थितिप्रकाराभ्यां मन्त्रवर्णन्यासं कृत्वा हृदयादिषु षड्ङ्गन्यासमभिधाय ऋषिच्छन्दोदेवताः शिरोरसनाहृदयेषु विल्वादिमुद्राः प्रदर्श्य किरीटमुद्रामबध्वा ओं नमस्सुदर्शनास्त्राय फड़ित्यस्त्रमुद्रया दिग्बन्धनं कुर्यात्। अथ ध्यानम् —

द्वारवत्यां सहस्रार्क्कभास्वरै - र्भवनोत्तमैः।
अनल्पैः कल्पवृक्षैश्च पवित्रे मणिमण्डपे॥
ज्वलद्रत्नमयस्तम्भ - द्वार - तोरणकुड्यके।
फुल्लस्रग्ल्लसच्चित्र - वितानालम्बमौक्तिके॥
पद्मरागस्थलीराजद्रत्नमध्योश्च मध्यतः।
अनारतगलद्रत्न - स्वधामस्थ - तरोरधः॥
रत्नप्रदीपाबलिभिः प्रदीपितदिगन्तरे।
उद्यदादित्यसङ्काश - मणिसिंहासनाम्बुजे॥
समासीनोऽच्युतो ध्येयो द्रुतहाटकसन्निभः।
समानोदितचन्द्रार्क - तडित्कोटिसमद्युतिः॥
सर्वाङ्गसुन्दरः सौम्यः सर्वाभरणभूषितः।
पीतवासाश्चक्रशङ्खगदापद्मोल्लसद्भुजः॥
अनारतोच्छलद्रत्नधारौघकलशं स्पृशन्।
वामपादाम्बुजाग्रेण सुष्णता पल्लवच्छविम्॥
रुक्मिणीसत्यभामेऽस्य मूर्ध्नि रत्नौघधारया।
सिञ्चन्त्यौ दक्षवामस्थे स्वदोःस्थकलशोत्थया॥
नाग्नजिती सुनन्दा च दिशन्त्यौ कलशौ तयोः।
ताभ्याञ्च दक्षवामस्थे मित्रविन्दासुलक्षणे॥
रत्ननद्योः समुधृत्य रत्नपूर्णौ घटौ तयोः।
जाम्बवतीसुशीला च दिशन्त्यौ दक्षवामके॥

बहिःषोडशसाहस्रसंख्याताः परितः स्त्रियाः ।
ध्येयाः कनकरत्नौघधारासु कलशोज्वलाः ॥
तद्बहिश्चाष्टनिधयः पूरयन्तो धनैर्द्धराम ।
तद्बहिस्सिद्धयस्सर्वे पुरोवच्च सुरादयः ॥

वाममधोहस्तमारभ्य तदुपरि हस्तान्तञ्चक्रादि चतुष्टयं ध्येयम् । पुरोवदिति-गोपीगोपपशूनां बहिः ।

स्मरेदग्रतोऽक्षय गीर्वाणघटां वित्ताम्बिनीं
विरञ्चित्रिनयनशतमन्यु- पूर्विकां स्तोत्रपराम् ।
तद्दक्षिणतो स्वनिकरं धर्मकच्छमाम्नायस्तोत्रपरान् ।
योगीन्द्रानथ पृष्ठेमुमुक्षमालान् समाधिना सनकाद्यात् ।
सव्ये सकान्तानथ सिद्धयक्ष गन्धर्व विद्याधरचारणाश्च ।
सकिन्नरानप्सरश्च मुख्याः कामान्विता नर्त्तनगीतवाद्यैः ।

उपरि श्वेतवर्णं वीणया परमेश्वरं प्रीणयन्तं पिङ्गजटं परमेश्वरभक्तिकामनारदं चिन्तयेदिति दशाक्षरोक्तमतिदिष्टम् । ततोऽर्घस्थापनम् । तत आन्तरपूजा । तत्र बीजेन तेजस्त्रयस्यैकीकरणानन्तरन्देवशरीरे मूर्त्तिपञ्जरसृष्टिस्थितिषडङ्गानि न्यसेत् । ततो भूषणदानपर्यन्तम्विधाय देवशरीरे मूर्त्तिपञ्जरादीनि सम्पूजयेत् । शेषं दशाक्षरान्तरपूजावत्कुर्यात् ।

अथ बाह्यपूजा । तत्र स्वर्णादिपात्रे गन्धपङ्कलिप्ते यन्त्रं लिखेत् । यथा--

विलिप्य गन्धतोयेन लिखेदष्टदलाम्बुजम् ।
कर्णिकायान्तु षट्कोणं ससाध्यन्तत्र मन्मथम् ॥
शिष्टैस्तं सप्त दशभिरक्षयैर्वेष्टयेत्स्मरम् ।
प्राग्रक्षोनिलकोणेषु श्रियं शिष्टषु सम्विदम् ॥
षड़क्षरं सन्धिषु च केशरेषु त्रिशस्त्रिशः ।
विलिखेत् स्मरगायत्रीं मालामन्त्र दलाष्टके ॥
षट्शः सँलिख्य तद्बाह्ये वेष्टयेन्मातृकाक्षरैः ।
भूरिमुञ्च लिखेद्बाह्ये श्रीमायादिग्विदिष्वपि ॥

सम्वित् मायावीजं क्लीं कृष्णाय नमः इति षड्क्षरमन्त्रः। कामदेवाय विद्महे पुष्पवाणाय धीमहि तन्नोऽनङ्गः प्रचोदयात्, इति स्मरगायत्रीम्।

नमःकामदेवाय सर्वजनप्रियाय सवजनसम्मोहनाय ज्वल ज्वल प्रज्वल सर्वजनस्य हृदयं मम वशं कुरु कुरु स्वाहेति मालामन्त्रः। इति मन्त्रं विलिख्य गुर्वादिज्ञानात्मपर्यन्तं सम्पूज्य केशरमध्ये च विमलोत्कर्षिणी-ज्ञानाक्रियायोगाप्रह्वीसत्येश नानुग्रहाः पीठशक्तयः सम्पूज्य ओं नमो भगवते विष्णवे सवभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठ-मन्त्रेण पीठं सम्पूज्य मूलेन मूर्त्तिं परिकल्प्य श्रीगोपालमूर्त्तये नम इति मूर्त्तिं सम्पूज्य तत्र देवतामावाह्य भूषणदानपर्यन्तम्विधाय मन्त्रपुटितमातृका वर्ण-रभ्यर्च्य देवशरीरे यथास्थानं सृष्टिस्थितिषडङ्गकिरीटकुण्डलद्वयचक्रशङ्ख-गदापद्ममाला श्रीवत्सकौस्तु ान् सम्पूज्य मूलेन यवगन्धपुष्परभ्यर्च्य चर-णादिषु पुष्पाञ्जलिपञ्चकन्दत्वाऽऽवरणपूजां कुर्यात् -

षट्कोणस्य पूर्वादिकोणेषु-हृदयशिरःशिखाकवचानि, नेत्रे, अस्त्राणि, दशमूलेष्वाग्नेयादिकोणेषु-वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धान्। दिक्षु शान्ति-लक्ष्मीसरस्वतीरतयः ततो वामदक्षक्रमेण पत्राग्रेषु– रुक्मिणीसत्यभामा-नग्नजितीसुनन्दामित्रबृन्दासुलक्षणाजाम्बवतीसुशीलाः, तद्बहिरेकदेव षोडशसहस्राणिगोपालप्रियः। तद्बहिरिन्द्रनिधिनीलनिधिमुकुन्दनिधि-मकरनिध्यानन्दनिधिकच्छपनिधिशंखनिधिपद्मनिधीन्, तद्बहिरिन्द्रादीन्, तद्बहिर्वज्रादींश्च सम्पूज्य ततो धूपदानादि।

पुनरर्घदानानन्तरं पुष्पाञ्जलिदानपर्यंन्त विधाय दधिखण्डाद्यमिश्रपायस-बुद्ध्या तोयेन पूर्वोक्तप्रकारेण तर्पयित्वा विसर्जनान्तङ्कर्म कृत्वा सपरिवारन्देवं स्वहृदयमानीयांगन्यासादिकं कृत्वाऽऽत्मानं गन्धादिभिरभ्यर्च्य प्राणायामान् कृत्वा तन्मयस्सन् यथाशक्तिमन्त्रञ्जपेत्। ततः प्राणायामजपसमर्पणादिकं कुर्यादिति। रुक्मिण्यादिध्यानं दशाक्षरपूजायां द्रष्टव्यम्।

ध्यात्वैव परमात्मानं विंशत्यर्णं मनुं जपेत्।
चतुर्लक्षं हुनेदाद्यैश्चत्वारिंशत्सहस्रकम्॥

ध्यात्वैवं परमात्मानं विंशत्यर्णमं जपेत ।
चतुर्लक्षं हुनेदाद्यश्चत्वारिंशत्सहस्रकम् ॥
वाग्भव मारबीजञ्च कृष्णाय भुवनेश्वरीम् ।
गोविन्दाय रमा गोपीजनवल्लभङें शिवः ॥
चतुर्द्दश स्वरोपेतः शुक्लः सर्गोतदूर्ध्वतः ।
द्वाविंशत्यक्षरो मन्त्रो वागीशत्वप्रदायकः ॥

तदूर्ध्वतः स्वाहानन्तरमित्यर्थः ।

केचित्तु तदूर्ध्वतस्तेषां वर्णानामुपरि प्रथमत इत्यर्थ इत्याहुः । अस्य मन्त्रस्य नारदऋषिर्गायत्री छन्दः श्रीकृष्णो देवता क्लीं वीजं स्वाहा शक्तिः कृष्णः प्रकृतिर्दुर्गाधिष्ठानदेवता वागाद्यभीष्टसिद्धौ विनियोग । अत्राप्यन्यत्सर्वमङ्गमन्त्रध्याने विहाय विंशत्यक्षरवत् । तत्रापि मन्त्रन्यासो विंशत्यर्णो साधारणतया विधेयः ।

आन्तरपूजायां वाह्यपूजायाञ्च सृष्टिस्थित्योर्न्यासः पूजनञ्च न विधातव्यम् । अङ्गमन्त्रास्तु-क्लीं कृष्णाय हृदयाय नमः । गोविन्दाय शिरसे स्वाहा । गोपीजन शिखायै वषट् । वल्लभाय कवचाय हुम् । स्वाहा अस्त्राय फट् । ध्यानम्—

वामोर्ध्वहस्ते दधतं विद्यासर्वस्वपुस्तकम् ।
अक्षमालाञ्च दक्षोर्ध्वं स्फाटिकीं मातृकामयीम् ॥
शब्दब्रह्ममयं वेणुमधः पाणिद्वयेरितम् ।
गायन्तं पीतवसनं श्यामलं कोमलच्छविम् ॥
बर्हिबर्हकृतोत्तंस सर्वज्ञं सर्ववेदिभिः ।
उपासितं मुनिगणैरुपतिष्ठेद्धरिं सदा ॥
ध्यात्वैवं प्रमदात्वेष विलासं भुवनेश्वरम् ।
चतुर्ल्लक्षं जपेन्मन्त्रमिमं मन्त्री स्वयं यतः ।
पलाशपुष्पैः स्यादुक्तैश्चत्वारिंशत्सहस्रकम् ॥
जुहुयात्कर्मणानेन मन्त्रसिद्धो भवेद्ध्रुवम् ।
श्रीशक्तिस्मरकृष्णाय गोविन्दायशिरो मनुः ॥

अस्य मन्त्रस्य ब्रह्माऋषिर्गायित्री छन्दः कृष्णोदेवता ऐश्वर्यसिद्धौ विनियोगः। श्रीं हृदयाय नमः। ह्रीं शिरसे स्वाहा। क्लीं शिखायैवषट्। कृष्णाय कवचायहुम्। गोविन्दाय नेत्राभ्यां वौषट्। स्वाहा अस्त्राय फट्। इत्यङ्गमन्त्राः। शेषं सर्वं विंशत्यक्षरवत्। तत्रापि विंशत्यर्णवर्णन्यासादेव शरीरे सृष्टिस्थित्योर्न्यासपूजने न विधेयानि, तन्मन्त्रसाधारणत्वात्। पुरश्चरणमपि विंशत्यक्षरतुल्यमेव।

श्रीशक्तिकाम वोंङ्गपूजन्मशक्तिरमान्तिकः।
दशाक्षरः स एवादौ स्याच्चेच्छक्तिरमान्वितः॥

मन्त्री विकृतिरव्यर्णा चक्राद्यविनाविमौ। दशाक्षर इत्यन्तेन षोडशाक्षरः। स एवेत्यादिना द्वादशाक्षरः प्रतिपादितः। अत्रादौ शक्तिरमान्वित इति सम्बन्ध इति केचित्।

अनयोर्मन्त्रयोर्ब्रह्माऋषिर्गायत्री छन्दः श्रीकृष्णो देवता सम्पत्सुखसौभाग्येषु विनियोगः। एतयोरपि मन्त्रयोरङ्गमन्त्रध्याने विहाय सर्वं विंशत्यक्षरवत्।

विंशत्यर्णोक्तो वर्णन्यासः परं न विधेयः। एवम् देवशरीरे सृष्टिस्थित्योर्न्यासः पूजनञ्च न विधेये। पञ्चाङ्गमन्त्रास्तु-आचक्राय स्वाहा हृदयायनमः। विचक्राय स्वाहा शिरसे स्वाहा। सुचक्राय स्वाहा शिखायै वषट्। त्रैलोक्यरक्षणचक्राय स्वाहा कवचाय हुम्। असुरान्तकचक्राय स्वाहा अस्त्राय फडिति। ध्यानम्-

वरदाभयहस्ताभ्यां श्लिष्यन्तं स्वाङ्कगे प्रिये।
पद्मोत्पलकरे ताभ्यां श्लिष्टञ्चक्रदरोज्वलम्॥

प्रिये रुक्मिणीसत्यभामे। शङ्खचक्रावुपरितनदक्षिणवामहस्तयोः।

दशलक्षजपादान्त्यै-स्तावत्साहस्र-होमतः।
सिद्धाविमौ मनू सम्पत् सुखसौभाग्यदायकौ॥

सारशक्तिरमापूर्वः शक्तिः श्रीरामपूर्वकः।
श्रीशक्तिरामपूर्वश्च दशार्णो मनवस्त्रयः॥

एषु प्रथममन्त्रस्य नारदऋषिर्विराट्छन्दः श्रीकृष्णो देवता सम्पत्तिकान्त्योर्विनियोगः। आचक्राय स्वाहा हृदयाय नमः। विचक्राय स्वाहा शिरसे स्वाहा। सुचक्राय स्वाहा शिखायैवषट्। त्रैलोक्यरक्षणचक्राय स्वाहा कवचाय हुम्। असुरान्तकचक्राय स्वाहा अस्त्राय फट्। इत्यङ्गमन्त्राः। विमलोत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानानुग्रहाः पीठशक्तयः। ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः।

पाणौ पायसभक्तमर्चितरसं बिभ्रन्मुदा दक्षिणे
सर्वे शारदचन्द्रमण्डलनिभं हैयंङ्गवीनं दधत्।
कण्ठेकल्पितपुण्डरीकनखसत्युद्दामदीप्तिन्दधे
देवो दिव्यदिगम्बरो दिशतु नः सौख्यं यशोदा शिशुः॥

पद्मस्थञ्च देवं पूजयेत्। आवरणपूजा तु केशरेष्वग्न्यादिकोणेषु-हृदय-शिरःशिखाकवचानि, दिक्ष्वस्त्रम्, तद्बहिरिन्द्रादीन्, तद्बहिस्तस्त्राणि च पूजयेत्।

दिनशोभ्यर्च्य गोविन्दन्द्वाविंशल्लक्षमानतः।
जप्त्वा दशांशं जुहुयात्सिताब्जेन पयोन्धसा॥
पद्मस्थन्देवमभ्यर्च्य तर्पयेत्तन्मुखाम्बुजे।
क्षीरेण कदलीपक्वैर्दध्ना हैयङ्गवेन च॥
तारं हृद्भगवान् ङेन्तो नन्दपुत्रपदन्तथा।
नन्दान्ते वपुषेस्त्यग्निमायान्तो दशवर्णक॥
अष्टाविंत्यक्षरोऽयं हरेद्वात्रिंशदक्षरम्।
नन्दपुत्रपदंङेन्तं श्यामलाङ्गपदन्तथा॥
तथा बालवपुः कृष्णो गोविन्दो दशवर्षकः॥

तथाङ्गितमित्यर्थः । कृष्णगोविन्दावित्यत्र तथेत्यनुषज्यते । प्रथममन्त्रे सार इकारः । सचात्र सबिन्दुरिति सम्प्रदायः । मायान्ते दशवर्णक इति पाठे स्पष्ट एवार्थः । मायान्तो दशवर्णक इति पाठेऽपि माया अन्त इति तत्पुरुषेण एवार्थः ।

केचित्तु दशाक्षरान्ते श्रीबीजमित्यर्थमाह । अनयोर्मन्त्रयोर्नारदऋषि-र्यथाक्रममुष्णिगनुष्टुभौ छन्दसी श्रीकृष्णो देवता ऐश्वर्ये विनियोगः । शेषं ध्यानवर्जं सारशक्तिरमापूर्वं इत्यादि त्रयोदशाक्षरवत् । ध्यानम्—

दक्षिणे रक्तचषकं वामे सौवर्णवेत्रकम् ।
करे दधान देवीभ्यामाश्लिष्टश्चिन्तयेद्धरिम् ॥
जपेल्लक्षं मनुवरो पायसैरयुतं हुनेत् ।
तारं हृद्भगवान् ङेन्तो रुक्मिणीवल्लभस्तथा ॥
शिरोन्तः षोडशार्णोऽयं रुक्मिणीवल्लभाह्वयः ॥

अस्य मन्त्रस्य नारदऋषिरनुष्टुप्छन्दो रुक्मिणीवल्लभो देवता पुरुषार्थ-चतुष्टये विनियोगः । ओं हृदयाय नमः । नमश्शिरसे स्वाहा । भगवते शिखायै वषट् । रुक्मिणीवल्लभाय कवचाय हुम् । स्वाहा अस्त्राय फट् । इति पञ्चाङ्गमन्त्राः । विमलोत्कर्षिणी-ज्ञानाक्रियायोगाप्रह्वी-सत्या ईशानानुग्रहाः पीठशक्तयः । ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः । ध्यानम्—

तापिन्तच्छविरङ्कगां प्रियतमां स्वर्णप्रभामम्बुजां
प्रोद्यद्वामभुजां स्वबाहुलतयाश्लिष्यन् स्वचिन्तक्ष्मया ।
श्लिष्यन्तीं स्वयमन्यहस्तविलसत्सौवर्णवेत्रश्चिरम्
पायाद्वोऽशनसूनु पीतवसनो नानाविभूषो हरिः ॥

स्वचिन्ताश्मयाश्लेषेण चिन्तामणियुजयेत्यर्थः। क्वचित्सचिन्ताश्मयेत्यपि पाठः ।

अथावरणपूजा-केशरेष्वग्न्यादिकोणेषु-हृदयशिरःशिखाकवचानि। दिक्ष्वस्त्रम्। दलेषु-नारद, पर्वत, जिष्णु, निशत्रोद्धर, दारुक, विष्वक्सेन, शैलेयान्। अग्रे-गरुडम्। तद्बहिरिन्द्रादीन्। तद्बहिस्तदस्त्राणि च पूजयेदिति।

ध्यात्वैवं रुक्मिणीनाथं जपेल्लक्षमिमं मनुम्।
अयुतं जुहुयात्पुष्पैररुणै-र्मधुराप्लुतैः॥
नीलादण्डावधो गोपीजनसंसक्तदोःपदम्।
दण्डान्ते बालरूपेति मेघश्यामपदन्ततः॥
भगवन्विष्णवेत्युक्त्वा वह्निजायान्तिको मनुः।
एकोनत्रिंशद्वर्णस्य मुनिर्नारद ईडितः॥

अस्य मन्त्रस्य नारदऋषिरनुष्टुप्छन्दो नीलादण्डहरिर्देवता सकलजनपूज्यत्वसम्पत्योर्विनियोगः। नीलादण्डगोपीजनसंसक्तदोर्दण्डहृदयाय नमः। बालरूपशिरसे स्वाहा। मेघश्यामशिखायै वषट्। भगवान् कवचाय हुँ। विष्णोः स्वाहा अस्त्रायफट्। इति पञ्चाङ्गमन्त्राः। विमलोत्कर्षिणी ज्ञाना क्रियायोगाप्रह्वीसत्येशानानुग्रहाः पीठशक्तयः। ओं नमो भगवते विष्णवे इत्यादि पीठमन्त्रः। ध्यानम्—

सम्मोहयन्निजकरामकरस्थलीलादण्डेन गोपयुवतीः पुरसुन्दरीश्च।
दिश्यान्निजां प्रियतमां सदक्षहस्तो देवः श्रियं निहतकंसतरुक्मो वः॥

प्रियतमस्याङ्गः। आवरणपूजायाम्— केशरेष्वग्न्यादिकोणेषु-हृदयशिरःशिखाकवचानि। दिक्ष्वस्त्रम्। तद्बहिरिन्द्रादीन्, तद्बहिस्तदस्त्राणि च पूजयेदिति।

ध्यात्वैवं प्रजपेल्लक्षमयतन्तिलतण्डुलैः।
त्रिमध्वक्तैर्हुनेदङ्ग दिङ्मालास्त्रैः समर्चयेत्॥
चक्रीमुनिस्वरयुतः सप्तेकार्णो मनुर्मतः।
कृष्णेति द्व्यक्षरः काम पूर्वस्त्र्यर्णः स एव च॥

स एव चतुर्वर्णः स्यात् ङेन्तोऽन्यश्चतुरक्षरः ।
वक्ष्यते सर्ववर्णः स्यात् अस्त्राय नम इत्यपि ॥
कृष्णायेति स्मरद्वन्द्वमध्ये पञ्चाक्षरो मनुः ।
षडक्षरः प्रागुदितः कृष्णगोविन्दकौ पुनः ॥
स चतुर्थो सप्तवर्णः सप्तार्णोऽन्यः पुरोदितः ।
कृष्णगोविन्दकौ ङेन्तौ स्मराद्यौ वसुवर्णकौ ॥
दधिभक्षणङेवह्नि - जायाद्भिरपरोऽष्टकः ।
प्राक्प्रोक्तो मूलमन्त्रश्च नवार्णः स्मरसम्पुटः ॥

कृष्णगोविन्दकौ ङेन्तावेतेषां नारदो मुनिः । प्रथममन्त्रेषु मुनिस्वरयुत इत्यत्र वसुस्वरयुत इति क्वचित्पाठः । एषु सप्ताक्षराष्टाक्षरयोर्वक्ष्यमाणस्य च तत्तावदक्षरप्रसङ्गमात्रेण कथनम्, नत्वत्रोक्तविधिप्राप्त्यर्थम् । पूजाविधिविशेषस्य तत्रतत्रादर्शितत्वात् ।

अष्टाक्षरे ऋषिर्ब्रह्मा समुदिष्ट इति ऋष्यन्तरस्य सप्ताक्षरे-आचक्रादैरङ्गक्लृप्तिरित्यादिना ऋष्यादित्रयाङ्गान्तराणाञ्चाभिधानात् । छन्दसि विकल्पस्याप्यभावात् । वक्ष्यमाणचतुरक्षरे ऋष्यारमङ्गषट्कञ्च प्रागुक्तं प्रोक्तमस्य त्वित्यनेन पूर्वमन्त्रोक्तं ऋष्यादतिदिश्यते, नत्वस्यैव प्रागुक्तमित्यभिधीयते । अन्यथा प्रागुक्तमेव ब्रूयात् न तु प्रागुक्तं प्रोक्तमस्यत्विति । एवञ्चैतदपि वचनं यथोक्त एव प्रमाणं भवति । अतएव तत्र तत्र पुरश्चरणमप्यन्यथैव दर्शितम् ।

तथा चैतेषां नारदो मुनिरित्येतच्छब्देनापि न ते गृह्यन्ते । तदन्यमन्त्राणान्तु नारदऋषिर्गायत्रीछन्दः श्रीकृष्णो देवता पुरुषार्थचतुष्टये विनियोगः ।

क्लां हृदयाय नमः । क्लीं शिरसे स्वाहा । क्लूँ-शिखायै वषट् । क्लैं कवचाय हुँ । क्लौं नेत्राभ्यां वौषट् । क्लः अस्त्राय फट् इत्यङ्गमन्त्राः । विमलोत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानानुग्रहाः पीठशक्तयः । ओं नमो भगवते विष्णवेत्यादि पीठमन्त्रः । ध्यानम्—

अव्याद्याकोषलीलाम्बुजस्थोवालोजङ्घाकटी-
वक्षःस्थलकलितरणत्किङ्किणीकोमुकुन्दः ।
दोर्भ्यां हैयङ्गवीनं दधति विमलं पायसं विश्ववन्द्यो
गोगोपीगोपवीतोरुरुनखविलसत्कण्ठभूषश्चिरम्बः ॥

रुरुर्व्याघ्रः । अथवा भुवनमोहनोक्तस्वरूपन्ध्यानम् । आवरणपूजायां केश-रेष्वग्न्यादिकोणेषु - हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् । दिक्ष्वस्त्रम् । तद्बहिरिन्द्रादीन् । तद्बहिर्वज्रादींश्च पूजयेत् । जपानन्तरं तर्पणञ्च कुर्यात् ।

ध्यात्वैवमेवमेतेषां लक्षं जप्यान्मनुन्ततः ।
सर्पिः सितोपलोपेतैः पायसैरयुतं हुनेत् ॥
तर्पयेत्तावदेतेषामनूनं हुतसंख्यया ।
सद्य. फलप्रदं मन्त्रं रक्षयेन्नं चतुरक्षरम् ॥
सप्रोक्तो मारयुग्मान्तरस्थकृष्णपदेन तु ।
मारयोरस्य मांसाद्यो रक्तञ्चेदपरो मनुः ।

अनयोः प्रथममन्त्रस्य नारदऋषिर्गायत्री छन्दः श्रीकृष्णो देवता धनाद्य-भीष्टसिद्धौ विनियोगः । क्लीं हृदयाय नमः । क्लां शिरसे स्वाहा । क्लुं शिखायै वषट् । क्लैं कवचाय हुँ । क्लौं नेत्राभ्यां वौषट् । क्लः अस्त्राय फट् । इति षड़ङ्गमन्त्राः । विमलोत्कर्षिणी-ज्ञानाक्रियायोगाप्रह्वी सत्येशानानुग्रहाः पीठ-शक्तयः । ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोग-पद्मपीठात्मने नम इति पीठमन्त्रः । ध्यानम्—

श्रीमत्कल्पद्रुमूलो हृतकमललसत्कर्णिकासंस्थितो यः
तच्छखालम्बिपद्मोदरविसरदसंख्यातरत्नाभिषिक्तः ।
हेमाभःसुप्रभाभिस्त्रिभुवनमखिलं भासयन्वासुदेवः
पायाद्वः प यसादोऽनवरतनवनीतामृताशीरशीरः ॥

आवरणपूजायां केशरेष्वग्न्यादिकोणेषु-हृदयशिरःशिखाकवचानि । अग्रे नेत्रं । दिक्ष्वस्त्रम् । दलेषु—इन्द्रनील, मुकुन्द, मकर, आनन्द, कच्छप, शङ्ख,

पद्मनिधीन्। तद्बहिरिन्द्रादीन् तद्बहिस्तदस्त्राणि च पूजयेदिति। मधुघृत-शर्कराबुद्ध्या पूजान्ते प्रत्यहन्तर्पयेत्। द्वितीयमन्त्रस्य तु ध्यानवर्ज्जं सर्वं प्रथममन्त्रवत्। ध्यानम्—

आरक्तोद्यानकल्पद्रुमशिखरलसत्स्वर्णदोलाधिरूढं
गोपीभ्यां प्रेक्ष्यमाणं विकसितनवबन्धूकसिन्दूरभासम्।
बालं लोलालकान्तं कटितटविलसत् क्षुद्रघण्टाढ्य बन्दे
शार्दूलकामाङ्कुशलसितगलाकल्पदीप्तं ज्वलन्तम्॥

शार्दूलकामाङ्कुशम् - शार्दूलनखमित्यर्थः।

वक्ष्ये मनुद्वयमथाभिरहस्यमन्यत्
संक्षेपतो भुवनमोहननामधेयम्।
ब्रह्मेन्द्र वामनयनेन्दुभिरादिमोऽन्यः
तत्पूर्वको वियद्धृषीकयुतेश ङेहृत्॥

वियद्धृषीकम् हृषीकमिति रूपं पीठमन्त्रभूतम्। गरुडमन्त्रमुद्धरतीति टीकायामभिधानाद् गरुड़मन्त्र एव पीठमन्त्रः। युक्तञ्चैतत्। स पूर्वकृत्य-भूतशुद्धिमातृकान्यासकेशवकीर्त्यादिन्यासतत्त्वन्यासप्रणायामान् कृत्वा विमलो-त्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानानुग्रहरूपपीठशक्तिपर्यन्तं पीठन्यासं कृत्वा पक्षिराजाय स्वाहेति पीठमन्त्रेण गरुड़मासनं विन्यास्यनयो-र्मन्त्रयोस्सम्मोहन• नारदऋषिर्गायत्रीछन्दः त्रैलोक्यसम्मोहनविष्णुर्देवता पुरुषार्थचतुष्टये विनियोगः इति स्मृत्वा ऋष्यादीन् मस्तकादिषु च विन्यस्य क्लां हृदयाय नमः। क्लीं शिरसे स्वाहा। क्लूं शिखायै वषट्। क्लैं कवचाय हुँ। क्लौं नेत्रत्रयाय वौषट्। क्लः अस्त्राय फट्। इति षड्ङ्गमन्त्रानङ्गुष्ठा-द्यङ्गलिषुकरतलकरपृष्ठयोश्च विन्यस्याङ्गुष्ठयोः ह्रां पोषणबाणाय नमः। तर्ज्जन्योः- ह्रीं मोहनबाणाय नमः। मध्यमयोः क्लीं दीपनबाणाय नमः। अना-मिकयोः- क्रीं सन्तापनबाणाय नमः। कनिष्ठयोः- सः सादनबाणाय नमः इति विन्यस्य मूलपुटितमातृकावर्णान् हृदयादिषु षड्ङ्गानि विन्यस्य शिरस्यङ्गुष्ठेन ह्रां पोषणबाणाय नमः। मुखे तर्ज्जन्या ह्रीं मोहनबाणाय

नमः । हृदि-मध्यमया क्लीं दीपणवाणाय नमः । जानुनोः-अनामिकया क्लूं सन्तापनवाणाय नमः । पादयोः- कनिष्ठया सम्मोहनबाणाय नम इति न्यसेत् ।

दशतत्त्वन्यासो मूर्त्तिपञ्जरन्यासश्च यदि विधीयेते तदा दशाक्षरपटले ऽनुसन्धेयौ । ततः ऋष्यादि न्यासम्विधाय मुद्राः प्रदर्श्य ओं नमः सुदर्शनायास्त्राय फडिति दिग्बन्धनं कुर्यात् । ध्यानम्-

दिव्यतरूद्यानोद्यद्रुचिरमहा कल्पपादपाधस्तात्
मणिमयभूतलविलसद्भद्रपयोजन्मपीठ निष्ठस्य ।
विश्वप्राणस्योद्यतप्रद्योतनसद्युतेः सुपर्णस्य
आसीनमुन्नताङ्गे विद्र मभङ्गाङ्गमङ्गजोन्मथितम् ॥

चक्रदवाऽङ्कुशपाशकसुमनोबाणेक्षुचापकमलगदाः
दधत स्वदोर्भिररुणायतविपुलविघूर्णिताक्षियुगलनिनम् ।
मणिमयकिरीटकुण्डलहाराङ्गदकङ्कणोघवसनाद्यैः
अरुणैर्माल्यविलेपै - रादीप्तं पीतवस्त्रपरिधानम् ॥

निजवामोरुनिषण्णां श्लिष्यन्तीं वामहस्तधृतनलिनाम्
क्लिद्यद्योनिकमलां मदमदनव्याकुलोज्वलाङ्गलताम् ।
सुरुचिमाल्यविभूषणानुलेपपांसुसितवसनपरिवीताम्
निजमुखकमलव्यापृतचटुलासितनयनमधुकरां तरुणीम् ॥
श्लिष्यन्तं वामभुजादण्डेन दृढन्धृतेषुचापेण ।
तज्जनितपरमनिर्वृतिनिर्भरहृदयञ्च वाचकैकगुरुम् ॥
सुरादितिजभुजग गुह्यकगन्धर्वाद्यङ्गजनसहस्रैः ।
मदमन्मथालसासाङ्गैरभिवीतं दिव्यभूषणोल्लसितम् ।
स्वात्ममभिन्नितयेत्थं ध्यात्वैकाक्षरमथाष्टवर्णं वा ॥

जपेत्यादि ।ततोऽर्घ्यस्थापनं कृत्वा-त्रैलोक्यमोहनाय विद्महे स्मराय धीमहि । तन्नो विष्णुः प्रचोदयात । इति विष्णुगायत्र्याऽऽत्मानं पूजोकरणानि

भूमिञ्चाभिषिञ्चेत् । तत आन्तरपूजाम्विधाय त्रैलोक्यक्तमोहनेत्याद्य गायत्रीजपं कृत्वा मूलमन्त्रञ्जप्त्वा जपोत्तरकृत्यं कुर्यादिति ।

ततो बाह्यपूजा—

विलिप्य गन्धतोयेन लिखेदष्टदलाम्बुजम् ।
कर्णिकायान्तु षट्कोणं समाध्यन्तत्र मन्मथम् ॥

शिष्टैस्तं सप्तदशभिरक्षरैर्वेष्टयेत्स्मरम् ।
प्राग्रक्षोनिलकोणेषु श्रियं शिष्टेषु सम्विदम् ॥

षडक्षरं सन्धिषु च केशरेषु त्रिशस्त्रिशः ॥
विलिखेत्स्मरगायत्रीं मालामन्त्रं दलाष्टके ॥

षटकं संलिख्य तद्बाह्ये वेष्टयेन्मातृकाक्षरैः ।
भूरि स्वञ्च लिखेद्बाह्ये श्रीमाये दिग्विदिक्ष्वपि ॥

शिष्टैः उपयुक्तबीजत्रयातिरिक्तविंशत्यक्षरीयैः सम्वित मायाबीजं क्लीं कृष्णाय नम इति षडक्षरमन्त्रः । कामदेवाय विद्महे पुष्पबाणाय धीमहि । तन्नोऽनङ्गः प्रचोदयात् । इति स्मरगायत्री । नमः कामदेवाय सर्वजनप्रियाय सर्वजनसम्मोहनाय ज्वलत्प्रज्वलसर्वजनस्य हृदयं मम वशं कुरु स्वाहा । इति मालामन्त्रः ।

एवं लक्षणं यन्त्रं लिखित्वा-तत्र गुर्वादिज्ञानात्मपर्यन्तं सम्पूज्य केशरेषु मध्ये च विमलोत्कर्षिणी -ज्ञानाक्रियायोगा - प्रह्वीसत्येशानानुग्रहाः पीठशक्तयः सम्पूज्य परीक्षाजायेति स्वाहामन्त्रेण गरुड़रूपमासनं सम्पूज्य तस्य स्कन्धे मूलेन मूर्तिंपरिकल्प्य कल्पद्रुमछायास्थितां मूलेन सम्पूज्य देवमावाह्य भूषणदानपर्यन्तम्विधाय देवशरीरे यथा स्थानं षडङ्गानि-शिरसि ह्रां पोषणबाणाय नमः । मुखे ह्रीं मोहनबाणाय नमः । हृदि क्लीं दीपनबाणाय नमः । जानुनोः- क्लूं सन्तापनबाणाय नमः । पादयोः सः मोहनबाणाय नमः इति बाणान् ।

शिरसि-कीरीटम्। कर्णयोः- कुण्डले । हस्तेषु चक्राङ्कुशपाशपुष्पशरेक्षुचापगदाः । स्तनयोरुपरि श्रीवत्सकौस्तुभौ । कण्ठे बनमालाम् । नितम्बे पीतवस्त्रम् । वामाङ्के श्रीमितिबीजेन श्रियं सम्पूज्य गन्धाद्यप्रदीपान्तैरभ्यर्च्य आवरणपूजां कुर्यात् ।

कर्णिकायां यथा-आग्नेयादिकोणेषु हृदयशिरःशिखाकवचानि । अग्रे नेत्रम् , दिक्ष्वस्त्रम्, सम्पूज्य पूर्वादिदिक्चतुष्टये-ह्रीं पोषण,ह्रां मोहन, क्लीं दीपन, क्लूं सन्तापन बाणानग्न्यादिकोणेषु - सः मोहनबाणञ्च । अग्न्यादि दलेषु-लक्ष्मीसरस्वतीरतिप्रीतिकीर्त्तिकान्तितुष्टिपुष्टीः । तद्बहिरिन्द्रादीन् पूजयेत् ।

जपादौ च प्रथमं विष्णुगायत्रीं जप्त्वा मन्त्रञ्जपेत् । त्रैलोक्यमोहनाय विद्महे स्मराय धीमहि । तन्नो विष्णुः प्रचोदयात् । इति विष्णुगायत्री । अथ लक्ष्म्यादिध्यानम् — लक्ष्मीसरस्वती च सुवर्णाभे, अरुणतरे रतिप्रीत्यौ । कीर्तिः कान्तिश्च सिते । तुष्टिः पुष्टिश्च मरकतप्रतिमे ।

दिव्याङ्गरागभूषणमाल्यदुकूलैरलङ्कृताङ्गलताः
स्मराननाः स्मरार्त्ताः धृतचामरचारुकरतलान्तात् ।
प्रजपेद्दिनकरलक्षं त्रिमधुरसिक्तैश्च किंशुकप्रसवैः
जुहुयादवर्कसहस्रं विमलैः सलिलैश्च तर्पयेत्तावत् ।।

अथ सत्यशौरिच तृतीयतुर्यकाः शिखराननेत्रशशिखण्डमण्डिताः ।
जयकृष्णयुग्मगणिरःतरात्मभूः शिखिशक्तितास्यावृत्तिशक्तिवर्णकाः ।।
प्रणिमध्यतो मुदितचेतसस्ततस्सपरक्तदृगितिगुरुमारुताक्षराः ।
सचतुर्थिकृष्णपदमिषुकार्मुको दशवर्णकश्च मनुवर्यकस्त्वसौ ।।
सलवाधराचलसुतारसाक्षरैः पुटितः क्रमोत्क्रमगतैस्समुद्धरत् ।
इति दण्डतूर्यवसुवर्ण उद्धृतः कवितान्तरं जनवामकरोययत्कृत् ।।

सत्यशौरी-दकारनकारौ । जयकृष्णयुग्मकेति - जयकृष्णेति पदद्वयस्य द्वयं जयकृष्ण, जयकृष्ण इति रूपम् । परक्तदृगिति प्रि इति रूपम् । य गुरु इति या इति रूपम् । दण्डसूर्यवसुवर्णको द्विपञ्चाशदक्षरः ।

अत्र भूतशुद्धिपर्यन्तं विधाय केवल सविन्दुसविसर्गोभयकेशवकीर्त्यादि सहितान् श्रीवीजकेशवकीर्त्यादिसहिताँश्च मातृकावर्णान्विन्यस्य तत्त्वन्यासं विदध्यात् । तत्र केशवकीर्त्यादिन्यासः तत्त्वन्यासश्च विष्णुपूजापरिच्छेदोपक्रमे द्रष्टव्यः ।

ततश्शरीरे योगपीठन्यासः । तत्र विमलोत्कर्षिणी, ज्ञाना, क्रिया, योगा, प्रह्वी, सत्येशानानुग्रहाः पीठशक्तयः । ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नम इति पीठमन्त्रः ।

तत अमुकमन्त्रस्य आनन्दनारदऋषिर्विराट्छन्दस्त्रिजगन्मोहनः कृष्णो देवता पुरुषार्थचतुष्टये विनियोगः । इति स्मृत्वा शिरोरसनाहृदयेषु ऋषिछन्दोदेवतांश्च विन्यस्य दशाक्षरीयमृष्यदिन्यासङ्करयोः कुर्यात् । तद्यथा दक्षिणाङ्गुष्ठे-ओं गों ओं नमः । तर्ज्जन्याम्-ओं पीं ओं नमः । मध्यमायाम् ओं जं ओं नमः । अनामिकायाम्-ओं नं ओंनमः । कनिष्ठायाम् - ओं वं ओं नमः । वामकनिष्ठायाम्-ओं ल्लं ओं नमः । अनामिकायाम्-ओं भां ओं नमः मध्यमायाम्-ओं यां ओं नमः । तर्ज्जन्याम्-ओं स्वां ओंनमः । अङ्गुष्ठे-ओं हां ओं नम इति न्यसेत् । इति सृष्टिः ।

दक्षिणाङ्गुष्ठाद्यङ्गुलिपञ्चके-ओं गों ओं नमः इत्यादि पञ्चकं विन्यस्य वामाङ्गुष्ठादितत्कनिष्ठाद्यङ्गुलिपञ्चके-ओं ल्लं नम इत्यादि पञ्चकं न्यसेत् । वामाङ्गुष्ठादिदक्षिणाङ्गुष्ठान्तम्-ओं गों ओं नम इत्यादि दशकं न्यसेदिति संहारः ।

ततः करन्यासस्तत्रमन्त्रः-ऐं ह्लीं श्रीं ह्लीं ल्रीं ज्रीं स्त्रीं-जयकृष्ण श्रीं ह्लीं ऐं हृदयाय नमः । जयकृष्ण ऐं ह्लीं शिरसे स्वाहा । ऐं ह्लीं श्रीं प्रमुदितचेतसे श्रीं ह्लीं ऐं शिखायै वषट् । ऐं ह्लीं श्रीं नित्यप्रियाय कृष्णाय श्रीं ह्लीं ऐं कवचाय हुँ । ऐं ह्लीं श्रीं ऐं नेत्राभ्यां वौषट् । इति विन्यस्य हृदि-भां नमः पराय महदात्मने नमः । ल्लं नमः परायाहङ्कारात्मने नमः । शिरिसि-वंनमःपरायाकाशात्मने नमः । मुखे-नं नमः पराय वाय्वात्मने नमः । हृदि-जंनमःपराय तेजसात्मने नमः । लिङ्गे-पीं नमः परायावात्मने नमः । पादयोः गों नमः पराय पृथिव्यात्मने नम इति न्यसेत् ।

तत आकेशादापादम्-ओङ्कारद्वयमध्यस्थं मूलमन्त्रं त्रिशो हस्ताभ्यां विन्यस्य शरीरे सृष्ट्यादिमार्गेण दशाक्षरे वर्णान्विन्यसेत्। यथा शिरसि-गो, नेत्रयोः पी, कर्णयोः-ज, घ्राणे न, मुखे-न, हृदि-ल्ल, उदरे-भा, लिङ्गे-य, जानुनोः-स्वा, पादयोः हा। इति सृष्टिः। पादयोः गो। जानुद्वये-पी। लिङ्गे-ज। उदरे न। हृदि-व। मुखे-ल्ल। घ्राणे-भाय, कर्णयोर्नेत्रयोः स्वा। शिरसि-हा। इति संहारः।

हृदि-गो। उदरे-पी। लिङ्गे ज। जानुनोः न। पादयोः-व। शिरसि-ल्ल। नेत्रयो. भा। कर्णयोः-य। घ्राणयोः स्वा। मुखे-हा। इति स्थितिः।

त्रिष्वपि प्रकारेषु शिरस्यक्ष्णोः मध्यमातर्ज्जनीभ्याम्। कर्णयोरनङ्गुष्ठाभिः। घ्राणेऽङ्गुष्ठानामिकाभ्याम्। मुखे सर्वाभिः। हृद्युदरयोरंगुष्ठतर्ज्जनीभ्याम्। नाभौ लिङ्गे चाङ्गुष्ठमध्यमाभ्याम्। जानुनोरङ्गुष्ठेतराभिः। पादयोः पञ्चभिरंगुलीभिर्न्यासो विधेयः। न्यासश्चायं गृहस्थस्य सृष्टिस्थितिसंहारक्रमेण।

अथ विभूतिपञ्जरन्यासः

हृदि-गो। लिङ्गे-पी। नाभौ-ज। हृदि-न। मणौ-ब। मुखे-ल्ल। अंशयोः-भाय। उर्वोः-स्वाहा। कन्धरानाड्योः-गोपी। कुक्षौ-ज। हृदि-न। स्तनयोः-वल्ल। पार्श्वयोः-भाय। श्रोण्योः-स्वाहा। शिरसि-गो। मुखे-पी। नेत्रयोः-जन। कर्णयोः-वल्ल। नासापुटयोः भाय। कपोलयोः-स्वाहा। दक्षिणबाहुसन्ध्यग्रे-गोपीजनव। वामवाहोस्सन्ध्यग्रे-ल्लभायस्वाहा। दक्षिणपादसन्ध्यग्रेषु-गोपीजनव। वामपादसन्ध्यग्रेषु-ल्लभायस्वाहा। दक्षिणकराङ्गुष्ठाद्यङ्गुलिपञ्चके-गोपीजनव। वामकरकनिष्ठाद्यङ्गुलिपञ्चके ल्लभायस्वाहा। दक्षिणपादकनिष्ठादिषु-गोपीजनव। वामपादकनिष्ठादिषु-ल्लभाय स्वाहा। शिरसि-गो। शिरसःपूर्वादिदिक्चतुष्टये-पीजनव। सकले शिरसि-ल्ल। भुजयोः-भाय। उरुद्वये-स्वाहा। शिरसि-गो। नेत्रयोः-पी। मुखे-ज। कण्ठे-न। हृदि-ब। तुन्दे ल्ल। मूलाधारे भा। लिङ्गे-य। जानुनोः-स्वा। पादाग्रयोः हा। श्रोत्रयोः-गो। गण्डयोः-पी। अंशयोः-ज। स्तनयोः-न पार्श्वयोः-व। कण्ठे ल्ल। उर्वोः-भा। जानुनोः य।

जङ्घयोः स्वा । पादयोः हा । इति दशावृत्त्या दशवर्णान्न्यसेत् । ततो मूर्तिपञ्जरन्यासः—

ललाटे-ओंअं केशवधातृभ्यां नमः । उदरे-न आं नारायणार्यमाभ्यां नमः । हृदि-मो इं माधवमित्राभ्यां नमः । गलकवरके-भ इं गोविन्दवरुणाभ्यां नमः । दक्षिणपार्श्वे-उं विष्णुवसुभ्यां नमः । दक्षिणांशे-व ऊं मधुसूदनभगाभ्यां नमः । गलदक्षिणभागे-ते एं त्रिविक्रमविवस्वद्भ्यां नम इति विन्यस्य वामपार्श्वे-धात्रे । वामनेत्राभ्याम-नमः । वामांशे वा सु श्रीधरपूषाभ्यां नमः । गलवामभागे-दे ओं हृषीकेशपर्यन्याभ्यां नमः । पृष्ठे-वा अं पद्मनाभत्वष्टभ्यां नमः । ककुदि य अः दामोदरविष्णुभ्यां नम इति विन्यस्य शिरसि द्वादशाक्षरं वासुदेवमन्त्रं न्यसेत् ।

ततः पूर्ववत्शरीरे सृष्टिस्थितिन्यासः । ततो दशाङ्गन्यासः । तत्र मन्त्राः- गों हृदयाय नमः । पीं शिरसे स्वाहा नमः । जं शिखायै वषट् । नमः नं कवचाय नमः । वं अस्त्राय नमः । ल्लं दक्षिणपार्श्वाय नमः । भां वामपार्श्वाय नमः । यं कट्यै नमः । स्वा पृष्ठाय नमः । हां मूर्ध्ने नमः ।

केचिच्चन्मते-गों नमः, पीं नम इत्यादयएवमन्त्रः । ततः षडङ्गानि पूर्ववत्पञ्चबाणांश्च विन्यस्य शिरोरसनाहृत्सु ऋषिछन्दोदेवतानि च विन्यस्य बिल्वादिमुद्राः प्रदर्श्य ओं नमस्सुदर्शनायास्त्राय फडिति मन्त्रेणास्त्रमुद्रया दिग्बन्धनं कुर्यात् । ततो ध्यानम्—

अथ भूधरोदधिपरिष्कृते महोन्नतशालगोपुरविशालवीथिके ।
घनबुध्युदग्रसितसौधसङ्कुले मणिहर्म्यविस्तृतकपाटके ॥
द्विजपूपविटचरणजन्मनाङ्गृहैर्विविधैश्च शिल्पिजनवेश्मभिस्तथा ।
इह सप्त्यूरग्रपुरधेनुसैरिभछगलालयैश्चलसिते सहस्रशः ॥
विविधापणाश्रितमहाजनाहृतक्रयविक्रयद्रविणसञ्चयान्वितैः ।
जनमानसाहृतिविदग्धसुन्दरीजनमन्दिरैः सुरुचिरैश्च मण्डिते ॥
पृथुदीर्घिका विमलपाथसि स्फुटद्विकचारविन्दमकरन्दलम्पटैः ।
वरहंससारसरथाङ्गनामानसविहगैर्विघ्नष्टककुभिः स्वके पुरे ॥
सुरपादपैः सुरभिपुष्पलोलुपभ्रमराकुलैर्विविधकामदैर्नृणाम ।

शिरमन्दमारुतचलच्छिखैर्वृते मणिमण्डपे रविसहस्रसप्रभैः ॥
मणिदीपिकानिकरदीपितान्तरेऽतनुचित्रचित्रितविशालशालिनि ।
लसिते त्रिकस्वरविचित्रदामभिः ससुगन्धिगन्धसलिलोक्षितस्थले ॥
प्रमदाशतैर्मदविघूर्णितेक्षणैर्मदनालसैः करविलोलचामरैः ।
अतिसेविते स्खलितमञ्जुभाषिभिः स्तनभारभङ्गुरकृशावलग्नकैः ॥
अविरामधारमणिवर्यवर्षिणिश्रमहानिदाऽमृतरसस्रुतोऽधरे ।
सुरपादपस्य मणिभूतलोल्लसत् पृथसिंहवक्त्रचरणाम्बुजासने ॥
अभिचिन्तयेत्सुखनिविष्टमच्युतं नवनीतनीररुहकोमलच्छविम् ।
कुटिलाग्रकुण्डललसत्किरीटकं स्मितपुष्परत्नरचितावतंसकम् ॥
सुललाटमुल्लसमुदञ्चितभ्रुवं विपुलारुणायतविलोललोचनम् ।
मणिकुण्डलोस्रपरिदीप्तग्रन्थकनवबन्धुजीवकुसुमारुणाधरम् ॥
स्मिचन्द्रिकोज्वलितदिङ्मुखं स्फुरत्पुलकश्रमाम्बुकणमण्डितनानम् ।
स्फुरदंशुरत्नगणदीप्तभूषणोत्तमहारदामभिरुपस्कृताङ्गकम् ।
घनसारकुङ्कुमविलिप्तविग्रहं पृथुदीपषटकभजाविराजितम् ।
तरुणारुणाब्जमङ्गजोल्लसिताङ्गमङ्कगकराम्बुजद्वयम् ॥
स्वाङ्कस्थभीष्मकसुतोरुयुगान्तरस्थं सन्तप्तहेमरुचिरासरमात्मजायाम् ।
श्लिष्यन्त आर्द्रजघनामुपगूहमानामात्मानमायतलसत्करपल्लवाभ्याम् ॥
आनन्दोद्रेकनिघ्नां मुकुलितनयनेन्दीवरां स्रस्तगात्रीम
प्रोद्यद्रोमाञ्चसान्द्रश्रमजलजलकालकाङ्कृताङ्गीम ।
आत्मन्यालं नवाह्यान्तरकरणगणमङ्गकैर्न्निस्तरङ्गै-
र्मज्जन्तं नीलनालामनिमित्तलमहानन्दसन्दोहसिन्धौ ॥
सत्याजासुरतीभ्यां दिव्यदुकूलानिलेपना भरणाभ्याम् ।
मन्मथशरमथिताभ्यां मुखकमलालोललोचनभ्रमाभ्याम ॥
भजयुगलाश्लिष्टाभ्यां श्यामारुणललितकोमलाङ्गलताभ्याम् ।
आदिष्टमात्मदक्षिणवामकराभ्याङ्करोल्लसत्कमलाभ्याम् ॥
पृष्ठगया कलिन्दसुतया करकमलयुजासंपरिरब्धमञ्जनरुचा मदनमर्थितया ।
पद्मगदारथाङ्गदरभृद्भुजयुगयुगलं दोर्द्वयसंसक्तवंशविलसन्नखसरसिरुहम् ॥

दिक्षु वहिः सुरर्षिपतिभिः खेचरपरिदृढैर्भक्तिभावावनम्रतनुभिः स्तुतिमुखरमुखैः। सन्ततसेव्यमानममलो वचनविषयकमर्थचतुष्टयप्रदममुन्त्रिभुवनजनकम् ॥

सान्द्रानन्दसुधाब्धिमग्नममदोर्भ्याङ्करेऽवस्थितम् ।
ध्यात्वैवं परमं पुमांसमनघं सम्प्राप्य ध्यातं गुरोः ॥

ततोऽर्घस्थापनं विधायान्तरपूजां कुर्यात् । यथा मूर्ध्नि गुरुमारभ्य तेजस्त्रयं वीजेनैकीकृत्येत्यन्तम्विधाय देवशरीरे विभूतिसृष्टिस्थितिदशाङ्ग-षडङ्गशरान् विन्यस्यास्यान्तैरभ्यर्च्य देवशरीरे यथान्यासं विभूति-सृष्टिस्थितिदशाङ्गषड्ङ्गशरान् सम्पूज्य गन्धपुष्पाभ्यामभ्यर्च्य तुलस्यादि पुष्पाञ्जलिपञ्चकं पाद्यादिषु दत्वा धूपदीपौ समर्प्य सुधारसैः सन्तर्प्य मुखवासादिकं दत्वा पुनर्गन्धादिभिरभ्यर्च्य वाद्यादिभिस्सन्तोष्य चुलूकजलेन ब्रह्मार्पणमन्त्रेण ब्रह्मार्पणं कुर्यात् । ततः प्राणायामत्रयं कृत्वा सुप्रसन्नं देवञ्चिन्तयन् जपं कृत्वा शेषं समापयेदिति ।

अथ वाह्यपूजा

अष्टदलपद्मस्य कर्णिकायां षट्कोणम् । तन्मध्ये ससाध्यजं कामवीजस्य पश्चिमपूर्व-दक्षिणोत्तरेषु-क्रमेण-ह्रीं क्रीं क्लीं स्त्रीं बीजानि विलिख्य जय-कृष्णेत्यादि स्वाहेत्यन्तैर्द्विचत्वारिंशदक्षरैस्तद्बीजचतुष्कं सम्वेष्ट्य च षट्कोणस्यै-शानपूर्वाग्नेयकोणेषु तथा नैरृतिवारुणवायव्यकोणेषु यथा क्रमं वाग्वीज-भुवने-श्वरी-श्रीवीजानि विलिख्य षट्कोणसन्धिषु षडक्षरमन्त्राक्षराणि केशरेषु त्रीणि त्रीणि गायत्र्यक्षराणि दलेषु षट्षट्मालामन्त्रान्विलिख्य मातृकाक्षरैः पद्मं वेष्टयित्वातद्वहिर्भूगृहं विलिख्य तस्य दिक्षु श्रीवीजं,विदिक्षु मायावीजं विलिखेत् । क्लीं कृष्णाय नम इति षडक्षरमन्त्रः। कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोऽनङ्गः प्रचोदयात् । इति स्मर गायत्री । नमः कामदेवाय सर्वजन प्रियाय सर्वजनसम्मोहनाय ज्वलत्प्रज्वलनाय हृदयं मम वशं कुरु स्वाहा इति मालामन्त्रः ।

अष्टवज्रसमन्वितं चतुरस्रं भूगृहमन्त्रं विलिख्य गुर्वादिज्ञानात्मपर्यन्तं सम्पूज्य-केशरेषु मध्ये च विमलोत्कर्षिणीज्ञानाक्रियायोगा प्रह्वी सत्येशानानु-ग्रहाः पीठशक्तयः सम्पूज्याः ।

ओं नमो भगवते विष्णवे सर्वभूतात्मने नम इति कल्पतरुच्छायायां मूर्त्तिं सम्पूज्य आवाहनादिकं विधाय मातृकावर्णान् तत्त्वमन्त्राश्च न्यसेत् ।

सकलीकृत्य दानान्तं विधाय मन्त्रपुटितमातृकावर्णैर्देवं गन्धादिभिस्सम्पूज्य देवशरीरे विभूतिसृष्टिस्थितिदशाङ्गं षडङ्गं शराशनं सम्पूज्य मूलेन गन्धपुष्पाञ्जलिभिः सम्पूज्य तुलस्यादिपुष्पाञ्जलिपञ्चकं पादादिषु दत्वा आवरणपूजां कुर्यात् ।

यथा-देवस्याग्रदक्षिणवामपृष्ठस्थवीजेषु यथाक्रमं रुक्मिणी, सत्याजाम्ववतीकालिन्द्यः । षट्कोणेषु यथाक्रमं षडङ्गानिपूर्वादिदिक्केशरेषु ह्रां शोषण शराय नमः । एवम् ह्रीं मोहन, क्लीं दीपन, क्लूं सन्तापन शरान् । कोणकेशरेषु-सम्मोहन शराय नमः इति सम्पूज्याग्न्यादिदलमध्येषु लक्ष्मी, सरस्वतीरतिप्रीतिकीर्त्तिकान्तितुष्टिपुष्टीन् ।

तद्बहिर्देवस्याग्रे ध्वजम् । पार्श्वयोः शङ्खपद्मनिधीन् । देवस्याग्निकोणचतुष्टये-हेरम्बमातृदुर्गाविष्वक्सेनान् । तद्बहिरिन्द्रादीन् । तद्बहिर्वज्रादींश्च पूजयेदिति, शेषं समापयेत् ।

अथ ध्वजादिध्यानम्

ध्वजः श्यामः , गरुडोऽरुणः, निधी श्वेतरक्तवर्णौ सप्तधाराभिः पृष्ठघनपुञ्जौ । हेरम्बमातृदुर्गाविष्वक्सेना विद्रुममरकतदूर्वास्वर्णाभाः । लक्ष्मीसरस्वती च स्वर्णाभे । अरुणतरे रतिप्रीत्यौ । कीर्तिः कान्तिश्च सिते । पुष्टिस्तुष्टिश्च मरकतप्रतिमे ।

दिव्याङ्गरागभूषणमाल्यदुकूलैरलङ्कृताङ्गलताः
स्मेराननास्सवार्त्ता धृतचामरचारुकरतला एताः ।
लब्ध्वा स्वमन्त्रमादरान् निश्चितधीर्लक्षञ्जपे-
द्योषितावार्त्ताकर्णनदर्शनादिरहितो गुरुणामपि ।
जुहुयाच्च दशांशतो हुताशे ससिताक्षौद्रघृतेन पायसेन ॥

श्रीमद्भवानन्दसमीपवर्त्ती गोविन्दशर्मा गुरुभक्तिभव्यः ।
उपासकानामुपकारहेतोः पूजाप्रदीपं कृतवान्विमृश्य ॥

इति श्रीभवानन्दरायकारितो महामहोपाध्याय
श्रीमद्गोविन्दकृतः
पूजाप्रदीपः

★ समाप्तः ★

इति पण्डित श्रीजयमन्त - श्रीरामसेवक - श्रीरामचन्द्र-
श्रीप्रभुनारायणशर्मसम्पादितः महामहोपाध्यायश्रीगोविन्दठक्कुरकृतः
★ पूजाप्रदीपः सम्पूर्णः ★

★ श्रीगणेशाय नमः ★

महामहोपाध्यायश्रीगोविन्दठक्कुरकृतः

पुरश्चरणपद्धतिः

श्रीगोविन्दपदाम्भोज-भ्रामरायितमानसः ।
गोविन्दः कुरुते सम्यक् पुरश्चरणपद्धतिम् ।।

पूर्वदिने निरामिषमेकवारं भुक्त्वाऽग्रिमदिने स्नानादिकम्विधाय-ओमद्यामुकमन्त्रस्य पुरश्चरणसिद्धये इयं भूमिर्गृह्यते मया मन्त्रो मे सिद्ध्यतामिति । ग्रामे क्रोशमात्रम्, नगरादौ क्रोशं क्रोशयुगं वा, नदीपर्वतादौ यथेच्छं भूमिं परिगृह्य तेषु क्षीरवृक्षोद्भवान् वितस्तिपरिमितानष्टौ कीलकान्विधायास्त्रमन्त्रेण प्रत्येकमेकम्वा दशवारम्वा शतवारं वाऽभिमन्त्र्य तेष्वस्त्रदेवतां सम्पूज्य परिगृहीतक्षेत्रमध्ये क्षेत्रपालं स पूज्य तस्मै बलिं दद्यात् । तत्र प्रकारः—

क्षेत्रपालमन्त्रस्य ब्रह्माऋषिर्गायत्रीछन्दः क्षेत्रपालो देवता रक्षणार्थे विनियोगः। इति स्मृत्वा ऋष्यादीन्मन्त्रकादींश्च विन्यस्य क्षां क्षीं क्षूं क्षैं क्षौं क्षः एभिर्यथाक्रमं कराङ्गन्यासौ विधायाधारशक्त्यादिज्ञानात्मपर्यन्तं सम्पूज्य वामा, ज्येष्ठा रौद्री, काली, कलविकरिणी, बलविकरिणी, बलप्रमथिनी, सर्वभूतदमनी, मनोन्मनापीठशक्तीन् सम्पूज्य-ओं नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नम इति पीठं सम्पूज्य—

नीलाञ्जनाद्रिनिभमूर्ध्वपिशङ्गकेशं
वृत्तोग्रलोचनमुपात्तगदाकपालम् ।
आशाम्बरं भुजगभूषणमुग्रदंष्ट्रं
क्षेत्रेशमद्भुततनुं प्रणमामि देवम् ।।

इति ध्यात्वा वाह्ये क्षौं क्षेत्रपालाय नम इत्यादिना पूजयेत् । ततः केसरेष्वङ्गानि, पत्रे ष्वनलाख्यमग्निकेशकरालघण्टारवमहाकोपपिसितासनपिङ्गलाक्षोर्ध्वकेशान् सम्पूज्य तद्बहिरिन्द्रादीन् तद्बहिस्तदस्त्राणि च पूजयेत् ।

ततः एह्ये हि 'वविद्विषि स्वरु स्वरु भञ्जय भञ्जय नर्त्तय नर्त्तय विघ्न विघ्न महाभैरव क्षेत्रपालबलिं गृह्ण गृह्ण स्वाहा, एष बलिः ओं सपरिवारक्षेत्रपालाय नमः । इति माषबलिं सोपदंशं बृहत्पिण्डं तत्करे दद्यात् । ततोऽन्येभ्योऽपि दद्याद्यथा —

ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ।
मातरोऽप्युग्ररूपाश्च गणानामधिपाश्च ये ॥
वघ्नभूतास्तथाऽन्ये च दिग्विदिक्षु समाश्रिताः ।
सर्वे ते प्रीतिमनसः प्रतिगृह्णन्त्विमं वलिम् ॥

इत्यष्टदिक्षु दद्यात् । ततः-

ओं भूतानि यानीह वसन्ति भूतले
बलिं गृहीत्वा विधिवत्प्रयुक्तम् ।

अन्यत्र वासं परिकल्पयन्तु
क्षमन्तु यान्यत्र नमोऽस्तु तेभ्यः ॥

इत्यष्टदिक्षु भूतबलिन्दद्यात् । ततः परिगृहीतक्षेत्रस्य पूर्वसीमाङ्गत्वा

ये चात्र विघ्नकर्त्तारो दिवि भुव्यन्तरिक्षगाः ।
विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु ॥
मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः ।
अपसर्पन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥

इति पूर्वसीमायां कीलकमारोप्येन्द्रनाम्ना तच्चतुर्थ्यन्तपदेन पूजा बलिदानञ्च दद्यात् । एवमेवाग्नेयादिसप्तदिक्षु पूर्वोक्तमन्त्रेण कीलकार्पणम्वि-

धाय तत्तद्दिक्पालनाम्ना पूजाबलिदाने कुर्यादिति। ततः परिगृहीतक्षेत्रमध्ये कूर्मक्षेत्रं विचिन्त्य तस्य मुखे वातातपसहं मण्डपं यथास्वरूपं कुर्यात्।

अथ पुरश्चरणतृतीयदिने हविष्यान्नेनैकवारं भुक्त्वाऽग्रिमदिने स्नानादिकं विधाय मन्त्रसिद्धिप्रतिबन्धकज्ञाताज्ञातसकलपापक्षयार्थमयुतगायत्रीजपादिप्रायश्चित्तं विधाय गुरुं विविधवस्त्रादिभिः सन्तोष्य गुरोराज्ञां गृहीत्वा हविष्यान्नमेकवारभोजनं कुशशय्यायामधश्शयनं कुर्यात्।

ततोऽग्रिमदिने ब्राह्मे मुहूर्त्ते उत्थाय ब्रह्मरन्ध्रोपरि सितसहस्रदलकमले व्याख्यामुद्राकरं परमात्मस्वरूपं ध्यात्वा तत्पादपूतामृतधारया क्षालितदेहं विचिन्त्य हृदयाम्बुजे देवतां ध्यात्वा तत्प्रभावपटलपूरितदेहं विचिन्त्य प्रणम्य तदनुज्ञां गृहीत्वा मन्त्रार्थं स्मरज्जलाशयङ्गत्वा स्वगृह्योक्तविधिना मज्जनं विधाय पश्चात्स्वमन्त्रऋष्यादिकन्यासपूर्वकं तज्जले इष्टदेवतां ध्यात्वा तीर्थमन्त्रेणांकुशमुद्रया तीर्थमावाह्य वमिति धेनुमुद्रयाऽमृतीकृत्वाऽस्त्रेण संरक्ष्य तज्जले देवतान्तूष्णीं ध्यात्वा मनसा मन्त्रमुच्चरन् वारत्रयं निमज्य मन्त्रजप्ताऽद्भिरात्मानमभिषिञ्चेत्।

ततस्तर्पणान्तङ्कर्म कृत्वा मूलमन्त्रमष्टाविंशतिवारं जप्त्वा अष्टाविंशतिवारं देवतान्तर्पयेत्। तत्र प्रकारः—

जले देवतायाः पीठं विचिन्त्य सर्वेऽप्याधारबुद्ध्या जलैरेव सम्पूज्य सकृत् सकृत् पीठदेवतास्सन्तर्प्य तत्र देवतामावाह्य सम्पूज्य धेनुमुद्रया तोये तर्पणद्रव्यं सम्पाद्यसुवर्णवयकीजलाञ्जलिना देवमुखे तर्पयेत्। ततः स्वात्मानं मन्त्रजपाद्भिरभिषिञ्चेत्। एकैकाञ्जलिना परिवारान् तर्पयेत्। ततः कलशमुद्रया वारत्रयमात्मानमभिषिञ्चेत्। तद्देवतागायत्रीन्दशकृत्वो जपेत्।

ओं घृणि सूर्य आदित्यष्टार्णेन अन्येन वा भानवेऽर्घन्दत्वा मूलमन्त्रन्दशधा जपेत्। जलैराचम्य दिक्पतीन्नमस्कुर्यात्।

ततो मण्डपनिकटे समागत्याचम्य दिक्पालान् प्रणम्य प्राङ्मुखः कुशाक्षतजलैः सङ्कल्पं कुर्यात् । तद्यथा-ओममुकमन्त्रस्य सिद्धिकामोऽद्यादि-इयतसंख्यकतन्मन्त्रजपतद्दशांशतन्मन्त्रकरणकामुकद्रव्यहोमं तद्दशांशतर्पणंतद्दशांशमार्ज्जनतद्दशांश-ब्राह्मणभोजनात्मकपुरश्चरणमहङ्करिष्ये ।

केषाञ्चिन्मतेन जपदृशांशेनैव होमतर्पणमार्ज्जनदेवताचिन्तनञ्च । तत्र दशांशेन ब्राह्मणभोजनन्तत्राङ्गमिति तत्र दशांशान्वयः । तत्तु होमादिसंख्यायाङ्कल्पविशेषोऽस्ति । तत्तथैव संकल्पः कर्त्तव्यः ।

ततोऽमुक मन्त्रस्यामुकऋषिरमुकछन्दोऽमुकदेवताऽमुकं बीजममुकशक्तिःपुरश्चरण जपे विनियोग इति कुशाक्षतजलेनसङ्कल्पान्तर कृत्वा ततो द्वारसमीपङ्गत्वा द्वारपूजादिकमासनोपवेशनादि विधाय बलिदानम् । यथा

ओं ये रौद्रारौद्रकर्माणो रौद्रस्थाननिवासिनः ।
योगिन्योप्युग्ररूपाश्च गणानामधिपाश्च ये ॥
विघ्नभूतास्तथा चान्ये दिग्विदिक्षु समाश्रिताः ॥
सर्वे ते प्रीतमनसः प्रतिगृह्णन्त्विमं बलिम् ॥

इत्यष्टदिक्षु बलिन्दद्यात् । ततो भूतबलिदानम् , यथा—
ओं भूतानि यानीह रमन्ति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम् ।
सन्तोषमासाद्य व्रजन्तु सर्वे क्षमन्तु यान्यत्र नमोऽस्तु तेभ्यः ॥

ततः पूजां समाप्य पुष्पमाघ्राय देवतां हृदयपङ्कजे उद्वास्य मानसैरुपचारैरिष्ट्वा ऋष्यादिन्यासं कराङ्गन्यासञ्च कृत्वा प्राणायामत्रयं विधाय देवतां सञ्चिन्त्य मन्त्रं यथाशक्ति जपेत् । जपस्थानानि तु—

पुण्यक्षेत्रं नदीतीरं गूहापर्वतमस्तकम् ।
तीर्थप्रदेशाः सिन्धूनां कूलं च पावनं वनम् ॥

उद्यानानि विविक्तानि विल्वमूलं गिरेस्तटः ।
तुलसीकाननं गोष्ठं बृषशून्यः शिवालयः ॥
अश्वत्थामलकीमूलं गोशालाजलमध्यतः ।
देवतायतनं कूलं समुद्रस्य निज गृहम् ॥
गुरूणां सन्निधानञ्च चित्तैकाग्रस्थलन्तथा ॥

एतानि जपसंख्यायां समाप्तायामुक्तद्रव्येण यथासङ्कल्पहोमः कर्त्तव्यः। ततः तर्पणं मार्जनञ्च । तत्प्रकारः—

जलदेवतायाः पीठं विचिन्त्य सकृत् सकृत् पीठदेवतास्सन्तर्प्य तत्र देवतामावाह्य सर्वोपचारबुद्ध्या तोयैरेव सम्पूज्य परिवारानपि पूजयित्वैकैकाञ्जलिना तान् तर्पयेत् । ततो मूलमुच्चार्य्यामुकं तर्पयामीति देवतामञ्जलिना तर्पयित्वा पुनरङ्गादिभ्य एकैकमञ्जलिन्दद्यात । ततो देवता सपरिवारान् हृदये उद्वासयेत् । केषाञ्चिन्मते नमोन्तोऽयं मन्त्रः । तर्पणे समाप्ते मार्जनम् । तद्यथा—

आत्मानं देवतारूपं ध्यात्वा प्रपूज्य मूलमन्त्रं नमोन्तमुच्चार्य्याञ्जलिना जलं मूर्ध्नि क्षिपेत् । अन्तेऽमुकमभिषिञ्चामीति मार्जनमन्त्रः । ततो दशांशेन ब्राह्मणभोजनम् । तद्यथा—

ब्राह्मणमामन्त्र्य तत्रानीयासनं दत्वा देवतां ध्यात्वा मूलेन देवतां ब्राह्मणाङ्गे समावाह्य देवतारूपं तं पाद्यादिभिरभ्यर्च्य नानावर्णोपेतमन्नं भोजयेत्, दक्षिणाञ्च दद्यात्, गन्धमाल्यभक्षभोज्यैर्ब्राह्मणान् तोषयेत् । गोहिरण्यवस्त्राद्यैः गुरुं सम्पूज्य प्रणम्य बन्धुभिस्सहमिष्टमन्नं भुञ्जीत । तद्दिने महोत्सवश्च कर्त्तव्यः ।

अथ पुरश्चरणकर्तुर्नियमः

वर्णक्रमोक्तकर्माचरणम् । शक्तौ त्रिसन्ध्यायां स्नानम् । अशक्तौ द्विःसकृद्वा शिरो नैर्मल्यम्। पञ्चगव्येन केवलामलकेन वा स्नानम् । स्नानकाले मन्त्रजप्तजलेनात्मसेकः । अधिकारे सति पितृतर्पणम् । विंशतिवारमूलमन्त्रजप्तजलेनाचमनादि । तावत्संख्यजप्तस्यान्नस्य च भोजनम् । तच्च मध्यपत्रवर्जितपलाशपत्रे, रात्राविति केचित् ।

भैक्ष्यं हविष्यं शाकानि पयो मूलं फलन्तथा ।
सक्तुकं क्षीरमात्रं वा भक्ष्यं वाभावदूषितम् ॥

देवतायै अनिवेदितञ्च न भुञ्जीत । क्षारमधुमांसनिवृत्तिः, शयनीयपरिधानीयवस्त्रमविपर्यासेन धारणं प्रत्यहं क्षालनञ्च, कुशशय्यायामधश्शयनम्, कल्पोक्तगोशुश्रूषा, गोग्रासदानम्, मन्त्राधिष्ठातृदेवतावन्दनानि, भूतानुकम्पा, ब्रह्मचर्यम्, एकग्रामवासः, प्रत्यहं गुरुनमस्कारः, परदोषाभाषणम् ।

इन्द्रियप्रलोभनातिप्रयासजनककर्म, चाण्डालादिस्पर्शादिः, दिवाशयनम्, स्त्रीषुसम्भाषणम्, नृत्यगीतादिदर्शनम्, गन्धमाल्यताम्बूलादिसेवनम्, क्षौरकर्माभ्यङ्गकौटिल्यतप्तोदकस्नानं काम्यकर्मादीनि वर्जयेत् ।

इति महामहोपाध्याय - सठक्कुर - श्रीगोविन्दविरचिता
पुरश्चरणपद्धतिः

★ समाप्ता ★

इति पण्डितश्रीजयमन्त-श्रीरामसेवक-श्रीरामचन्द्र-श्रीप्रभुनारायण-
शर्मसम्पादिता महामहोपाध्याय
श्रीगोविन्दठक्कुरकृता पुरश्चरणपद्धतिः

★ समाप्ता ★

कामेश्वरसिंह-दरभंगा-संस्कृत-विश्वविद्यालय

कामेश्वरनगर, दरभंगा

विक्रेतव्य पुस्तकें

क्र० सं० पुस्तक नाम		लेखक एवं सम्पादक	मूल्य
१ विद्यापति-संस्कृत-ग्रन्थावली---			
(१) प्रथमभाग (हिन्दीअनुवादसहित) (विभागसार एवं शैवसर्वस्वसार)	स०	(१) डॉ० जयमन्त मिश्र (२) डॉ० इन्द्रकान्त झा	७५।=
(२) द्वितीय भाग (हि.अ.स.) (शैवसर्वस्वसार-प्रमाणभूत-पुराणसंग्रह एवं दानवाक्यावली)	स०	(१) डॉ० जयमन्त मिश्र (२) प० श्री आनन्द झा	७५।=
२ म० म० गोकुलनाथ-ग्रन्थावली---			
(१) रसमहार्णवः	स०	(१) प० श्री धर्मनाथ झा (२) प० श्री कुमुदनाथ मिश्र	६।-
(२) आलोकमंगलविचारः	स०	,, ,, ,,	२०।-
(३) मासमीमांसा		(१) प० श्री धर्मनाथ झा	६।=
(४) अनुमितिदीधितिविद्योतः	स०	(१) ,, ,, ,, (२) प० श्री रामसेवक झा	७।=
(५) गोकुलनाथग्रन्थगुच्छः (दिक्कालनिरूपणम् रूढिव्याख्या-रहस्यम् मिथ्यात्वनिरूपणञ्च)	स०	,, ,, ,,	७।=
(६) कुण्डकादम्बरी	स०	(१) प० श्री धर्मनाथ झा (२) प० श्री कुमुदनाथ मिश्र संशोधक-विद्यावारिधि प० श्री रामचन्द्र झा	२०।-
(७) तत्त्वचिन्तामणौ उपमान-रश्मिचक्रम्)	स०	(१) प० श्री रामसेवक झा (२) प० श्री रामचन्द्र झा	

३ म० म० वाचस्पतिग्रन्थावली---

(१) कृत्यप्रदीपः	स० (१) डॉ० जयमन्त मिश्र	
	(२) प० श्री धर्मनाथ झा	२४।-
	संशोधक पं० श्री कृष्णानन्द झा	
(२) श्राद्धचिन्तामणिः	स० (१) डॉ० जयमन्त मिश्र	३०।-
	(२) प० श्री धर्मनाथ झा	
	(३) प० श्रीरामचन्द्र झा	
(३) आचारचिन्तामणिः	स० (१) डॉ० जयमन्त मिश्र	
	(२) प० श्री धर्मनाथ झा	
	(३) प० श्री कृष्णानन्द झा	
	(४) प० श्री शशिनाथ झा	३५।-
(४) पितृभक्तितरङ्गिणी	(१) प० श्रीरामसेवक झा	
(प्रायश्चितव्यवस्थासारसमुच्चयसहिता)	(२) प० श्री प्रभुनारायणशर्मा	
	(३) प० श्रीरामचन्द्र झा	२५।-
(५) कृत्यमहार्णवः	(१) प० श्रीरामसेवकझा प्रभृति	३०
(६) व्यवहारचिन्तामणिः	प० प्रभुनारायणशर्मा प्रभृति	१७।-
(७) शुद्धिचिन्तामणिः	डॉ० जयमन्तमिश्रप्रभृति	२०।-

४ सुलभसंस्कृतग्रन्थमाला---

(१) मेघदूतम् (गुटका मूल)	प० श्री रामचन्द्र मिश्र	०५०
(२) हरविजयम् (प्रथमसर्गः)	,, ,, ,,	१।-
(३) रघुवंशम् (मूलमात्र सम्पूर्ण)	,, ,, ,,	४।-
(४) समासशक्तिदीपिका	ले० महावैयाकरण दीनबन्धु झा	५।-
(५) उपसृष्टधात्वर्थसंग्रह	ले० ,, ,, ,,	
	स डॉ० शशिनाथ झा	६ -
(६) मेघदूतम्	स० डॉ० हृषीकेश झा	१२।-
(जगद्धरीयरसदीपिनी-व्याख्योपेतम्)		
(७) कुमारभार्गवीयम् भानुदत्तकृतम्)	स० प० श्री रामचन्द्र मिश्र	०५।-
(८) ध्वनिकल्लोलिनी	ले० अनु० प० आनन्द झा	२५।-
(हिन्दी अनुवादसहित)		
(९) विज्ञानं समाजश्च	ले० डॉ० सरयू प्रसाद गुप्त	२५।-
	सं० वि० वा० रामचन्द्र मिश्र	
(१०) सुभाषितावली (हिन्दी अनुवादसहित)	ले० विद्यावाचस्पति प० श्री उदेन्द्र झा	२०।-

(११)	मिथिलामाहात्म्यम्	स० प० श्रीधर्मनाथ झा	५।-
(१२)	अभिनन्दनमाला	सं० प० श्रीरामचन्द्र मिश्र	६।-
(१२)	छन्दोगानां विवाहपद्धतिः	सं० प० श्रीतेजनाथ झा	५।-
(१४)	मिथिला का इतिहास	ले० डॉ रामप्रकाशशर्मा	७५।-
(१५)	स्मृति-साहस्री	ले० 'रमाकर'	१५।-
(१६)	लौकिकन्यायरत्नाकरः	सं० प० श्रीरामचन्द्र मिश्र	४५।-
(१७)	तिथिनिर्णयः	ले० म० म० राजनाथमिश्र	२४।- सजिल्द
	(सपरिशिष्टः)	सं० वि० वा० रामचन्द्रझा	२०।-अजिल्द
(१८)	ग्रहणमाला	ले० म० हेमाङ्गद ठाकुर सं० प० श्री ब्रजकिशोर झा	२०।-
(१९)	नियमावली एवं पाठ्यग्रन्थावली (१९८३ से प्रवृत्त)	प्रकाशक सं० वि० वि०, दरभङ्गा	७।-

५ महाराजाधिराजकामेश्वरसिंह ग्रन्थमाला--

(१)	परमलघुमञ्जूषा (म० म० शशिनाथ झा कृत-सरलाख्यव्याख्योपेता)	सं (१) वि० वा० श्रीरामचन्द्रमिश्र (२) डॉ० शशिनाथ झा	१५।-
(२)	भारतीयसर्वस्वम् (हिन्दीव्याख्योपेतम्)	ले० प० श्री भोलानाथ मिश्र	४५।-
(३)	प्रयोगपल्लवः (भवनाथकृतः)	डॉ० शशिनाथ झा	३७।-
(४)	तर्कसंग्रहः (न्यायबोधिनी सीता-पद्याख्याव्याख्यासहित)	प० श्री आनन्द झा	४५।-
(५)	शकुन्तलाविवृत्तिः	ले० प० श्री आँखी झा सं० प० श्री कृपाकान्त ठाकुर	१५।-
(६)	उपवनविनोदः (हिन्दीटीकासहित)	प० श्री कृष्णानन्द झा	१२।-
(७)	वातावरणनाटकम्	ले० प० श्रीगोविन्द झा अनु० डॉ० शशिनाथ झा	१२।-
(८)	हृत्परिवर्त्तननाटकम्	प० श्री आनन्द झा	७।-
(९)	म० म० माधवीयाद्भुतदर्पणः	प० श्री रामचन्द्र झा	४५।-

(१०) शुद्धिदीपिका म० म० कोणेश्वरकृता २५।=

(११) छन्दोगाह्निकोद्धारः म० म० शङ्करमिश्रकृत: १७।-

(श्रीदत्तकृतच्छन्दोगाह्निकं रघुनाथकृतव्याख्योपेतम्)

सं० डॉ० प्रभुनारायण शर्मा प्रभृति

डॉ० लक्ष्मीनाथझा प्रभृति १७।-

(१२) स्मृतितत्त्वसमुच्चय: म० म० सचलमिश्रकृत: ८।-

(१३) स्मृतिदीपिका म० म० उमापतिकृता डॉ० शशिनाथझाकृत-शुद्धिकौमुदीसहिता १६।-

(१४) गूढार्थदीपिका ले० म० म० वामदेव: ३५।-

सं० श्रीरामचन्द्रझा प्रभृति

यन्त्रस्थ पुस्तकें

(१) न्यायवैशेषिकवार्त्तिकम् सं० प० श्री अनन्तलाल ठाकुर

(२) उणादिरत्नकौमुदी प० श्री अर्जुन झा

(३) न्यायमञ्जरी (हिन्दी टीकोपेता) प० श्री आनन्द झा

(४) लघुशब्देन्दुशेखरः ,, ,, प० श्री ताराकान्त झा

(५) हस्तलेख सूची –

(६) प्रत्यभिज्ञाप्रदीप: प० श्री रङ्गेश्वरनाथ मिश्र

(७) रसिकमनोरञ्जिनी महावै० दीनबन्धु झा

(८) तत्त्वचिन्तामणि: सं० प० श्री आनन्द झा

(आलोक दीपिकाकण्टकोद्धार इत्यादि व्याख्यासहित)

(९) द्वैतनिर्णयः (वाचस्पतिः) प० श्रीरामसेवकझा प्रभृति

विशेष:—प्रकाशन की कीमत कुलसचिव कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, कामेश्वरनगर, दरभंगा के पदनाम से (भारतीय स्टेट बैंक K.S.D.S, शाखा दरभंगा) बैंक ड्राफ्ट द्वारा पहले ही प्रेषनीय है। आदेश के उपरान्त प्रोफोरमा देयक भेजा जायगा। अथवा प्रकाशनमूल्य की राशि अग्रिम भेजकर किसी निकटस्थ बैंक के माध्यम से भी मंगवाया जा सकता है।

विशेष:—त्रैमासिक शोधपत्रिका "विश्वमनीषा" १५। रु० वार्षिक मूल्य [विगत ७ वर्षों से संचालित] भेजने पर प्राप्य है।

प्राप्तिस्थान—

प्रकाशन विभाग

कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालय, दरभङ्गा